50

राष्ट्रिय संस्कृत संस्थानम्
नवदेहली

गङ्गानाथ झा केन्द्रीय संस्कृत विद्यापीठ ग्रन्थमाला

॥ २६ ॥

॥ बालबोधिनी ॥

न्यायसिद्धान्तमुक्तावलीटीका

प्रत्यक्षखण्डम्

रचयिता
डॉ० रामशरण त्रिपाठी शास्त्री

सम्पादकः
डॉ० गयाचरण त्रिपाठी



श्री पं० रामशरणत्रिपाठिविरचिता

बालबोधिनी

श्री विश्वनाथभट्टाचार्यकृतयुक्तावली-प्रत्यक्षखण्डटीका

Rashtriya Sanskrit Sansthan

(*Under the auspices of the Ministry of Human Resources Development, Govt. of India*)

New Delhi

●

Ganganatha Jha
Kendriya Sanskrit Vidyapitha
TEXT SERIES

●

General Editor

Dr. G. C. Tripathi

●

No. 29

BĀLABODHINĪ

A commentary on the Nyāya-Siddhānta-Muktāvalī of Viśvanātha Bhaṭṭācārya

(Pratyakṣa Khaṇḍa)

or

The Section on Perception

by

(Late) Dr. Ram Sharan Tripathi Shastri
M.A., Ph.D. Kāvyatīrtha

Posthumously edited and brought out

by

Dr. Gaya Charan Tripathi



ALLAHABAD
1993

राष्ट्रियसंस्कृतसंस्थानम्
(केन्द्रीयमानवसंसाधनविकासमन्त्रालयस्याङ्गभूतम्)
नवदेहली
गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठग्रन्थमाला
प्रधानसम्पादकः
डॉ० गयाचरण त्रिपाठी
—•—
एकोनत्रिंशं प्रसूनम्
—•—

बालबोधिनी

विश्वनाथभट्टाचार्यकृतायाः
न्याय-सिद्धान्तमुक्तावल्याः टीका
[प्रत्यक्षखण्डम्]

—•—

रचयिता
(स्व०) डॉ० रामशरण त्रिपाठी शास्त्री
एम० ए०, पी-एच० डी०, काव्यतं
सम्पादकः
डॉ० गयाचरण त्रिपाठी
प्राचार्यः

—•—

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्
चन्द्रशेखर आजाद पार्क
इलाहाबाद–२११००२
१९९३

बालबोधिनी

(न्यायसिद्धान्तमुक्तावलीटीका)

(प्रत्यक्षखण्डमात्रम्)

●

रचयिता

डॉ० रामशरण त्रिपाठी, शास्त्री

एम० ए०, पी-एच० डी०, काव्यतीर्थ

सम्पादकः

डॉ० गयाचरण त्रिपाठी

प्राचार्यः

श्रीगङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्

चन्द्रशेखर आज़ाद पार्क

प्रयाग-२११००२

१९९३ ई०

प्रकाशक:
डॉ० गयाचरण त्रिपाठी
प्राचार्य:
गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्
चन्द्रशेखर आज़ाद पार्क
इलाहाबाद-२

●

पुनर्मुद्रणादिकाः सर्वेधिकाराः राष्ट्रियसंस्कृतसंस्थानेन स्वायत्तीकृताः

●

मूल्यम्

●

मुद्रक:
शाकुन्तल मुद्रणालय:
३४, बलरामपुर हाउस
इलाहाबाद-२

FOREWORD

In presenting the *Bālabodhinī*, a Sanskrit commentary on the *Pratyakṣa Khaṇḍa* of the *Muktāvalī* (also known as *Bhāṣā-pariccheda*), popularly ascribed to Viśvanātha Baṭṭācārya but believed to have been composed by one Kṛṣṇadāsa Sārvabhauma towords the beginning of the 16th century according to modern Authorities on Nyāya*, I have a feeling of double satisfaction : on the one hand the satisfaction of bringing a hitherto unknown commentary on the said work to light and on the other, the satisfaction of doing a humble duty as a son towards my respected father who authored this work more then sixty years ago as a young scholar of Sanskrit but who could unfortunately not get it published in his life-time—

Full many a gem of purest ray serene,
The dark unfathomed waves of ocean bear !

—Thomas Gray

The work on *Bālabodhinī* must have been started by my revered father, Dr. Ram Sharan Shastri, M. A. (Hindi, Sanskrit), Ph. D., Kāvyatīrth, (1 08-1977 A. D.) in the years 1928-30 A. D. when he was a student of *Uttara Madhyamā* with his Guru Shri Pt. Jayadeva Sharma Tripathi at the Shri Bholānātha Sanskrit Vidyālaya in the village Uknī at Jaunpur. I have been told that the *Pratyakṣa Khaṇḍa* of *Muktāvalī* was then prescribed as a text-book for the students of Grammar studying at the Madhyamā standard of the Govt. Sanskrit College, Benares. The author very respetcfully pays his

---

* Cf बंगे नव्यन्याय चर्चा by D. C. Bhattacharya, p. 117 and *History of Indian Philosophy* by Dr. Umesh Mishra p. 422.

regards to his Guru in the opening verse of the *Praśnottarī* (cf. p. 125) printed as an Appendix to this commentary in the following words :

भिन्त्तो यौ संशयग्रन्थिं छिन्त्तोऽज्ञानान्धकारताम् ।
तावङ्घ्री सम्प्रणम्येते गुरूणामुकनोसदाम् ।।

It seems that he jotted down in his notebook the salient features of the intsructions which he received from his Guru and later elaborated it in the form of a regular commentary on the text in the years 1930-32 when he was serving as a teacher in the Shri Rāmanāma Sanskrit Vidyālaya at Chitrakūṭa. The press-copy of this work was made partly in the year 1932 and partly in 1933 when he was residing at Rājim, Raipur, M. P., preparing for the *Kāvyatīrha* examination, since the press copy in its later portion has some pages written in the hand of his elder brother Shri Pt Muktādatta Tripathi who was then the Principal of Shri Rājīvalocana Sanskrit Vidyālaya at Rajim.

Father was born at the end of the year 1908 (on the 30th of December). This means that he started work on this commentary when he was hardly 20 years of age and finished it when he was barely 22 and had passed only the Madhyamā examination of Benares. It is amazing to note what high standard of Sanskrit learning the students of those days really have had. Today you cannot expect of a student of Madhyamā that he even copies out his *Praśnottarī* correctly while cheating in the examination hall ! The *Bālabodhinī* especially its *Praśnottarī* section, demonstrates not only a good command over Nyāya of its Author but also his excellent knowledge of Vedānta, Sāmkhya and Bauddha Philosophy.

Bālabodhinī is most probably the first work of the Father, along with his *Siddhāntādarśa* and the *Rājīvalocanī* Vyākhyā on

certain Sūtras (पञ्चसन्धि) of the Kaumudī (both are still unpublished) which were all composed before he left for Lahore in July 1933 in order to continue his studies for the Shastri degree at the Oriental College there.

For the details of his further academic achievements and the course of his life, the reader is referred to his short biographical sketch published in the *Dr. Ram Sharan Shastri Commemoration Volume* of the Journal of the Ganganatha Jha Kendriya |Sanskrit Vidyapeeth (Vols. XXXVIII–XXIX, Pp. i–xvi). After serving as the Head of the Sanskrit Dept. at K. G. K. College, Moradabad he left for his heavenly abode at the holy city of Prayāg on the 4th of December 1977.

This is the *Seventh* work of the father to see the light of the day and the second published by this Vidyapeetha (the first being *Vyākṛti-vatsarājam*, 1990). His other writings include such famous works as *Kaumudī-kathā-kallolinī*, a prose novel illustrating the usage of Paṇinian sūtras (Chowkhamba 1961), *Vedāntasāra* with *Bhāvabodhinī* (Chowkhamba 1954, oft reprinted) and *Brahmasūtra-Bhāṣyapañcaka-samīkṣaṇam* (Chowkhamba 1971).

The *Siddhāntamuktāvalī* composed by its author for his favourite pupil *Rājīva*, is a hot-favourite with the students all over India who wish to have an access to the higher strata of the Navya Nyāya Philosophy. May this commentary finished at the holy kṣetra of *Rājīvalocana* (Rajim) fulfil the desire of the students and inspire them towards further and deeper study of Nyāyaśāstra and may the heavenly soul of my father, who has also been my विद्यागुरु, shower his blessings upon me.

It is realy true that –

यन्मातापितरौ क्लेशं सहेते सम्भवे नृणाम् ।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि ।।

–महाभारतात्

We, all his three children (myself, my younger brother Prof. Rama C. Tripathi of the Psychology Dept. of Allahabad University and our sister Dr. Aparna Shukla, Senior Lecturer in Psychology at the Basant College, Varanasi) shall forever remain obliged to him for whatever he has done for us functioning, as he did, both as a Mother and as a Father to us after the demise of our affectionate mother prematurely at the tender age of 26 when we all were small children. I bow to him with his own words which he uttered for *his* mother—

ततोऽनृणत्वं कथमत्र मादृशां
तथापि तत्पादनतिर्गतिर्मुहुः ।

In fine my sincere thank are due to my loving pupils Dr. Ram Kishore Jha and especially to Dr. Prakash Pandey of this Vidyapeetha who took the trouble of preparing a Press copy of this *Bālabodhinī* which had been written in a continuous manner without the original text of the *Muktāvali*, by adding the relevant text pieces of the original *Kārikās* and the text of the *Muktāvalī* to it. May God bless them.

G. N. Jha K. S. Vidyapeetha
Allahabad
July 1st, 1993

Gaya C. Tripathi
Principal



नैकशास्त्रेषु निष्णातो
वैनक्र्याजवभूषितः ।
अनुद्विग्नो य आपत्सु
स रामशरणः पुरः ।।

मध्यप्रदेशीय 'रायपुर' जनपदस्थे

'राजिम' संज्ञकतीर्थक्षेत्रे

अवस्थितायाः

श्री राजीवलोचनसंस्कृतपाठशालायाः

प्राचार्यवर्याणाम्

लेखकस्य ज्येष्ठभ्रातृणाम् आद्यविद्यागुरूणां च

'काव्यतीर्थ' विरुदभाजां

श्रीमतां मुक्तादत्तत्रिपाठिमहाभागानां

(१८९२–१९५२ ई०)

पुण्यस्मृतौ

सादरं समर्प्यते

अथ–

बालबोधिनीसंवलिता

न्यायसिद्धान्तमुक्तावली

॥ प्रत्यक्षखण्डम् ॥

नूतनजलधररुचये, गोपवधूटीदुकूलचौराय ।
तस्मै कृष्णाय नमः, संसारमहीरुहस्य बीजाय ॥१॥

बालबोधिनी

हेरम्बमवलम्ब्यादौ गुरोरंघ्रचोरनुस्मरन् ।
एषा मुक्तावली व्याख्या तन्यते बालबोधिनी ॥

नूतनेत्यादि—नूतना जलधरास्तेषां रुचिरिव रुचिः नूतनजलधररुचिस्तस्मै नूतनजलधररुचये = सजलजलदकान्तये । गोपानां वधूट्यो गोपवधूट्यः, तासां दुकूलानि गोपवधूटीदुकूलानि तेषां चौरस्तथोक्तस्तस्मै गोपवधूटीदुकूलचौराय = गोपालबालाक्षौमापहारकाय । संसार एव महीरुहः संसारमहीरुहस्तस्य संसार-महीरुहस्य = जगत्तरोः । बीजाय = निमित्तकारणाय । तस्मै = पूर्वोक्तविशेषणवि-शिष्टाय । कृष्णाय = वासुदेवाय । नमः = नमस्कुर्मः ।

ननु नूतनजलधरेति विशेषणदानस्य किं कारणम्, अन्यदेव किमपि विशेषणं कथं नोक्तमिति चेच्छृणु—यथा नूतनजलधरा वृष्ट्या ग्रीष्मसंतप्तानामाशुसुखप्रदा भवन्ति तथैवाज्ञानोपहतानामस्माकं ज्ञानसलिलवृष्ट्या श्रीकृष्णः आनन्दप्रदो भवत्विति तात्पर्येण तद्विशेषणम् ।

ननु भगवति वस्त्रापहारकत्वेन चौरत्वस्थापनस्यायुक्ततया तद्विशेषणमनु-चितमिति चेन्न, "अवसरे खलु सिद्धयति याचना" इति स्मृत्याऽऽनन्दावस्थाव-स्थितस्य भगवतश्चौररूपवर्णने सर्वकार्यसिद्धिसम्भवेन सर्वसामञ्जस्यात् ।

केचित्तु—भगवतश्चौररूपवर्णनमयोग्यमिति विशेषणमिदं, गाम् इन्द्रियं पातीति गोपं मनः, तस्य वधूटी स्त्री बुद्धिः, तस्या दुकूलं आवरणम् अज्ञानम्, तस्य चौराय = अज्ञानविनाशकायेत्थं व्याख्यान्तीति कारिकार्थः ॥१॥

सिद्धान्तमुक्तावली

चूडामणीकृतविधुर्वलयीकृतवासुकिः ।
भवो भवतु भव्याय लोलाताण्डवपण्डितः ।।१।।

बालबोधिनी

"ग्रन्थादौ ग्रन्थमध्ये च यस्य ग्रन्थस्य मङ्गलम् ।
तत्पठन्पाठयन्वापि दीर्घायुर्धार्मिको भवेत्" ।।

इत्युक्तेः प्रारिप्सितप्रतिबन्धकव्यूहोपशमनायाध्यापकाध्येतॄणामनुषङ्गतो मङ्गलाय च मङ्गलमाचरन्निबध्नाति ग्रन्थनिर्माता **चूडामणीकृतेति**—न चूडामणिरचूडामणिः, अचूडामणिः चूडामणिः कृतः इति चूडामणीकृतः । चूडामणीकृतो विधुर्येनासौ चूडामणीकृतविधुः = शिरोरत्नीकृतचन्द्रः । न वलयोऽवलयः, अवलयो वलयः कृतः इति वलयीकृतो वासुकिर्येनासौ वलयीकृतवासुकिः = कटकीकृताहिराजः । भवः = शिवः । भव्याय = कल्याणाय । भवतु = अस्तु । कथंभूतो भवः ? लीलया ताण्डवम् लीलाताण्डवम्, तस्मिन् पण्डित इति लीलाताण्डवपण्डितः = विलासलास्यविचक्षणः ।

ननु, चूडामणीत्यस्य समाप्तपुनरात्तत्वदोषदुष्टत्वेन मङ्गलत्वमनुपपन्नम्, दोषस्वरूपं तु "विशेषणान्वयेन शान्ताकाङ्क्षस्य विशेष्यवाचकपदस्य विशेषणान्तरेणान्वयार्थं पुनरनुसंधानं च यत्र" इत्याकारकम् । तथा च प्रकृते चूडामणीकृतविधुर्वलयीकृतवासुकिरिति विशेषणद्वयेन शान्ताकाङ्क्षस्य भव इति विशेष्यवाचकपदस्य लीलाताण्डवपण्डित इति विशेषणान्तरेण अन्वयार्थं पुनरनुसन्धानं भवतीत्यस्त्येव दोष इति चेन्न, आद्यविशेषणद्वयेनान्वये किमर्थं विधोश्चूडामणीकरम्, किमर्थं वा वासुकेर्वलयीकरणम् इत्याकारिकाया आकाङ्क्षाया जागरूकत्वेन भव इति पदस्य शान्ताकाङ्क्षत्वाभावत्वेन तद्दोषलक्षणस्यात्राप्रवृत्त्या, भवशब्दस्य यौगिकत्वमभ्युपगत्य जगदुत्पतिकर्तृरूपार्थकतया, तस्यैव विशेषणत्वेन 'लीलाताण्डवपण्डित' इत्यस्य विशेष्यत्वेन वा, 'चूडामणीकृतविधुर्वलयीकृतवासुकिः लीलाताण्डवपण्डितो भवो भव्याय भवतु' इत्येवमन्वयकल्पनेन वा, तद्दोषलेशक्लेशस्य दूरापहतत्वात् ।।१।।

सिद्धान्तमुक्तावली

निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरन्तनोक्तिभिः ।
विशदीकरवाणि कौतुकान्ननु राजीवदयावशंवदः ।।२।।

बालबोधिनी

निजनिर्मितेति—राजीवदयया वशंवद इति राजीवदयावशंवदः = राजीवनामकान्तेवासिदयालुः [अहं विश्वनाथ-पञ्चाननः] अतिसंक्षिप्ताश्च ताश्चिरन्तनोक्तयोऽतिसंक्षिप्तचिरन्तनोक्तयः, ताभिः अतिसंक्षिप्तचिरन्तनोक्तिभिः सरलतमप्राचीनोक्तिभिः । निजनिर्मिता चासौ कारिकावली निजनिर्मितकारिकावली ताम् तथोक्ताम् = स्वरचितकारिकावलीम् कौतुकात् = लीलया न विशदामविशदाम् अविशदां विशदां करवाणि इति विशदीकरवाणि = स्पष्टीकरवाणि ननु ॥२॥

सिद्धान्तमुक्तावली

सद्द्रव्या गुणगुम्फिता सुकृतिनां सत्कर्मणां ज्ञापिका,
सत्सामान्यविशेषनित्यमिलिताऽभावप्रकर्षोज्ज्वला ।
विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली,
विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम् ॥३॥

बालबोधिनी

सद्द्रव्येति—"यद्दासि यदश्नासि यत्करोषि जुहोषि यत् ।
यत् तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ।"

इत्यत्र गीतायां भगवद्वाक्यस्यानुस्मरन् मुक्ताहारनिभं मुक्तावलीग्रन्थमर्पयति ग्रन्थकारो विष्णवे **सद्द्रव्येत्यादिना** । सर्वाणि विशेषणानि ग्रन्थपक्षे मालापक्षे च तुल्यानि । तथाहि—सन्ति द्रव्याणि यस्यां सा सद्द्रव्या = विद्यमानद्रव्या, मालापक्षे सन्ति समीचीनानि द्रव्याणि मुक्ताफलानि यस्यां सा सद्द्रव्या = समीचीनमुक्ताफला । गुणैश्चतुर्विंशतिगुणैः गुम्फितेति तथोक्ता = चतुर्विंशतिगुणैर्युक्ता, मालापक्षे गुणेन सूत्रेण गुम्फिता तथोक्ता = सूत्रावनद्धा । ग्रन्थपक्षे—सुकृतिनां विदुषां मनसश्चेतसः मुदम् आनन्दम्, वितनुतामित्यत्रान्वयः । सतां भावरूपाणामुत्क्षेपणादीनां कर्मणां ज्ञापिका = अनुमापिका । मालापक्षे—सुकृतं पुण्यं विद्यते येषु ते सुकृतिनस्तेषां तथोक्तानां = पुण्यशालिनाम् । सत्कर्मणां सदाचाराणाम् । ज्ञापिका अनुमापिका । यतो हि धनिन एव मुक्ताहारं धारयन्त्यतस्तेन तेषां जन्मान्तरीयं सत्कर्मत्वमभिव्यज्यते । सामान्यञ्च विशेषश्च नित्यमिलितश्चेति सामान्यविशेषनित्यमिलिताः सन्तः सामान्यविशेषनित्यमिलिता यस्यां सा सत्सामान्यविशेषनित्यमिलिता =

वर्तमानजातिविशेषसमवाया । मालापक्षे—सामान्यञ्च विशेषश्चेति सामान्यविशेषौ, सन्तौ च तौ सामान्यविशेषौ सत्सामान्यविशेषौ ताभ्यां नित्यं मिलिता इति सत्सामान्यविशेषनित्यमिलिता = वर्तमानसाधारणासाधारणमुक्ताफलनित्यसंयुक्ता । अभावस्य प्रकर्षः अभावप्रकर्षः तेनोज्ज्वलेति तथोक्ता = अभावप्राचुर्ययुक्ता । मालापक्षे—अभावे तेजोऽभावे प्रकर्षेण उज्ज्वला तथोक्ता = अन्धकारेऽत्यन्तदेदीप्यमाना । सत्यो युक्तयो यस्यां सा सद्युक्तिः = समीचीनवाग्विन्यासा । मालापक्षे—सतीयुक्तिर्यस्याः सा सद्युक्तिः समीचीनयोजना । एषा पूर्वोक्तविशेषणविशिष्टा । सिद्धान्तमुक्तावली = एतन्नामकग्रन्थः । विश्वनाथश्चासौ कृती तेन तथोक्तेन = विश्वनाथविदुषा । विष्णोः परमात्मनः । वक्षसि = वक्षःस्थले विन्यस्ता प्रतिक्षिप्ता सती चिरं = चिरकालं यावत् । मनसः = चेतसः । मुदम् = आनन्दम् । वितनुताम् = वितनोतु ॥३॥

ननु सर्वग्रन्थप्रवृत्तिम्प्रति विषयप्रयोजनाधिकारिसम्बन्धरूपानुबन्धचतुष्टयज्ञानं प्रयोजकम्, अनुबन्धत्वञ्च "प्रवृत्तिप्रयोजकज्ञानविषयत्वम्" तथा च ग्रन्थेऽस्मिन् किमनुबन्धचतुष्टयमिति चेत्—द्रव्यादयः पदार्थाः विषयाः, 'तेषां तत्त्वज्ञानं प्रयोजनम्, तज्जिज्ञासवोऽधिकारिणः, प्रतिपाद्यप्रतिपादकभावः सम्बन्धः, इत्युत्तरं गृहाण ।

विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति ।
नूतनेत्यादि ।

ननु ग्रन्थादौ कृतस्य नमस्काररूपमङ्गलाचरणस्य तल्लेखनस्य च किं प्रयोजनमित्याशंक्य समभिधत्ते **विघ्नविघातायेति**—मङ्गलस्य विघ्नविध्वंसः फलमिति वदतां नवीनानां मते विघ्नविघातायेत्यत्र विघ्नानां विघातो विघ्नविघातस्तस्मै इति षष्ठीसमासः । मङ्गलस्य समाप्तिः फलमिति वदतां प्राचां मते तु विघ्नानां विघातो यस्मिन् कर्मणि तद् विघ्नविघातम् तस्मै समाप्तिरूपकर्मणे इत्थं समासो बोध्यः । तथा च विघ्नविघाताय यन्नूतनजलधरेत्यादि मङ्गलं कृतं तच्छिष्यशिक्षायै अर्थात् शिष्या अप्येवमेवकुर्युरिति बुद्ध्या निबध्नाति । आचार्यः ग्रन्थघटकीकरोति इत्यर्थः । नूतनेत्यादि कारिका तु पूर्वमेव व्याख्याता ।

ननु हन् धातोः करचरणानुकूलव्यापारार्थतया मङ्गले तदभावेन तस्य कथं

विघ्नविघातत्वमितिचेत् न, विघ्नविघातायेत्यस्य विघ्नात्यन्ताभावाय, द्वितीय-समासबलेन समाप्तये वेत्यर्थकल्पनेनादोषात् ।

ननु, घातपदस्यैवोत्पत्तिमदभावरूपार्थवाचकत्वेन विघ्नविघातायेत्यत्र **वि**-पदोपादानमनर्थकमिति चेन्न, 'सति पृथग्विशेषणवाचकपदसमवधाने विशिष्टवाचकानां पदानां विशेष्यमात्रपरकत्वम्" इति स्वीकारेण **वि**पदसमभिव्याहारे **घात**-पदस्य अभावमात्रपरकत्वेन उत्पत्तिमदभावरूपार्थज्ञापनाय विपदस्य सार्थक्यात् । अत एव रघुवंशे *कीचक*-पदस्य मारुतपूर्णरन्ध्रत्वविशिष्टवेणुबोधकत्वेऽपि *मारुतपूर्ण-रन्ध्रै*रिति विशेषणवाचकपदसमवधाने *कीचक*–पदस्य वेणुमात्रपरतया *'स कीचकैः···'* इत्यत्र पृथक् *कीचक*–पदोपादानं सार्थकम् । नन्वेवं पूर्वोक्तरीत्या मङ्गलस्य विघ्नविघातत्वे समाप्तिफलकत्वे वा सिद्धेऽपि कादम्बर्यादौ सत्यपि मङ्गले *'रजोजुषे जन्मनि सत्ववृत्तये स्थितौ प्रजानां प्रलये तमःस्पृशे । अजाय सर्गस्थितिनाश-हेतवे त्रयीमयाय त्रिगुणात्मने नमः ॥'* इत्याद्याकारके समाप्तिदर्शनाभावान्नास्तिक-ग्रन्थे किरणावल्यादौ च मङ्गलाभावेऽपि समाप्तिदर्शनान्न मङ्गलं विघ्नध्वंसे समाप्तौ वा कारणम् । एवञ्च 'मङ्गलं निष्फलं, फलविशेषशून्यत्वात्, जल-ताडनवत् ।' इत्यनुमानेन मङ्गलस्य निष्फलत्वमित्याशयवानाक्षिपति—

ननु मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणं, विनापि मङ्गलं नास्तिकादीनां ग्रन्थे निर्विघ्नपरिसमाप्तिदर्शनादिति चेन्न, अविगीतशिष्टाचार-विषयत्वेन मङ्गलस्य सफलत्वे सिद्धे तत्र च फलजिज्ञासायां सम्भवति दृष्टफलकत्वे अदृष्टफलकल्पनाया अन्याय्यत्वात् उपस्थितत्वाच्च समाप्तिरेव हि फलं कल्प्यते ।

ननुमङ्गलमिति—सत्यमुच्यते श्रीमद्भिर्यत् कादम्बर्यादौ सत्यपि मङ्गले समाप्त्यभावात्, किरणावल्यादौ च मङ्गलाभावेऽपि समाप्तिदर्शनात् मङ्गलं नान्यतरयोः कारणमिति, तदुपरीत्थं दन्द्वन्यतेऽस्माभिर्यत् न हि प्रत्यक्षमेव प्रमाणम्, अपि तु अनुमानोपमानादिकमपि । एवञ्च—"मङ्गलं सफलं, अविगीतशिष्टाचार विषयत्वात्, यत्र-यत्राविगीतशिष्टाचारविषयत्वं तत्र-तत्र सफलत्वम्, दर्शश्राद्धवत्" इत्यनुमानेन तस्य सफलत्वे सिद्धे तत्र च किं फलमिति विचिकित्सायां यावद् दृष्टफलं स्यात् तावद् अदृष्टफलकल्पनस्यायुक्ततयोपस्थितत्वेन च—"मङ्गलं समाप्ति-फलकम्, समाप्त्यन्याफलकत्वे सति सफलत्वात्, यन्नैवं तन्नैवं यथा घटः अथवा

पटः'' इति व्यतिरेकिणा मङ्गलस्य ग्रन्थपरिसमाप्तिरेव फलं कल्प्यते। तदेवोक्तं मूले **'अविगीते'** त्यादि **'कल्प्यते'** इति पर्यन्तम् ।

नन्वतः पूर्वं मङ्गलस्य समाप्तिं विघ्नध्वंसं प्रति कारणत्वाकथनान्मङ्गलं न विघ्नध्वंसं प्रति कारणमिति शङ्का, अविगीतेत्यादितत्समाधानञ्चोभयमेवायोग्य मिति चेन्न, विघ्नविघातायेत्यत्रैव षष्ठीबहुव्रीहिसमासाभ्यामस्याः शङ्कायाः समाधानसौकर्यात् ।

इत्थं च यत्र मङ्गलं न दृश्यते तत्रापि जन्मान्तरीयं तत् कल्प्यते। यत्र च सत्यपि मङ्गले समाप्तिर्न दृश्यते तत्र बलवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्यम्, प्रचुरस्यैवास्य बलवत्तरविघ्ननिराकरणकारणत्वम्, विघ्नध्वंसस्तु मङ्गलस्य द्वारमित्याहुः प्राञ्चः।

अस्तु च तावद्, यद्यनयारीत्याऽनुमानेन मङ्गलस्य ग्रन्थपरिसमाप्तिरेव फलं कल्पितं तदा कादम्बर्यादौ सत्यपि मङ्गले कथं न समाप्तिः ? किरणावल्यादौ च तदभावेऽपि कथं समाप्तिरिति चेच्छृणु । मङ्गलस्य समाप्तिफलकत्वे सिद्धे यत्र किरणावल्यादौ मङ्गलाभावेऽपि समाप्तिर्दृश्यते तत्र ''नास्तिकग्रन्थः समङ्गलः, समाप्तिमत्त्वात्, यो यो हि समाप्तिमान् स स समङ्गलः, सिद्धान्तकौमुद्यादिवत्'' इत्यनुमानेन तत्रापि पूर्वकृतं मङ्गलं कल्प्यते, अर्थात् ग्रन्थकर्त्रा मङ्गलमवश्यं कृतं किन्तु ग्रन्थे न लिखितम्। अपरञ्च यत्र कादम्बर्यादौ मङ्गले सत्यपि समाप्त्यदर्शनम्, तत्र तु बलवत्तरो विघ्नो बभूव, विघ्नबाहुल्यं वा मध्ये मध्ये जातम्, अतो न समाप्तिरिति कल्प्यते। यद्यपि वह्निः प्रदीप्य काष्ठान्नाशयति किन्तु स्वल्पे वह्नौ विशेषकाष्ठस्थापने न शक्नोति भस्मसात् कर्तुम् । एवमेव प्रचुरस्यैव मङ्गलस्य बलवत्तरविघ्ननिराकरणकारणत्वमपि ततश्च तदभावान्नसमाप्तिः।

ननु यदि मङ्गलस्य समाप्तिरेव फलं तर्हि कादम्बर्यादौ विघ्नध्वंसो भवतु मा वा, किन्तु समाप्त्या त्ववश्यं भाव्यमिति चेन्न, यतो हि विघ्नध्वंसो मङ्गलस्य व्यापारः, व्यापारत्वञ्च 'तज्जन्यत्वे सति तज्जन्यजनकत्वम्', एवञ्च विघ्नध्वंसो मङ्गलजन्यः, मङ्गलजन्या या समाप्तिस्तज्जनकश्च । एवं मङ्गलं विघ्नध्वंसद्वारैव समाप्तिमुत्पादयति यावद्विघ्नध्वंसो न स्यात्तावन्न समाप्तिरित्याकलनीयम् । एतदेव सर्वमभिप्रेत्योक्तं मूले **'इत्थ'** मित्यारभ्य **'द्वार'** मित्यन्तेन। इति प्राचीनमतम् ।

किन्तु प्राचीनमते मङ्गलं विघ्नध्वंसद्वारैव समाप्तिं जनयतीति मङ्गलस्य पूर्वं विघ्नध्वंसं प्रति कारणत्वम्, ततः समाप्तिं प्रतीत्थं विघ्नध्वंसघटित-परम्परया कारणत्वकल्पने मनसि गौरवं विधाय नवीनानामुपन्यस्यति मतमाचार्यः—

नव्यास्तु मङ्गलस्य विघ्नध्वंस एव फलं समाप्तिस्तु बुद्धिप्रतिभादिकारण-कलापात्। न च स्वतःसिद्धविघ्नविरहवता कृतस्य मङ्गलस्य निष्फलत्वापत्तिरिति-वाच्यम् । इष्टापत्तेः। विघ्नशङ्क्या तदाचरणात्, तथैव शिष्टाचारात्। न च तस्य निष्फलत्वे तद्बोधकवेदाप्रामाण्यापत्तिरिति वाच्यम्, सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात्। अत एव पापभ्रमेण कृतस्य प्रायश्चित्तस्य निष्फलत्वेऽपि न तद्बोधकवेदाप्रमाण्यम्। मङ्गलं तु विघ्नध्वंसविशेषे कारणं विघ्नध्वंसविशेषे च विनायकस्तवपाठादि ॥

नव्यास्त्विति—अर्थान्मङ्गलं तु विघ्नध्वंसमेव करोति, समाप्तिस्तु बुद्धि-प्रतिभादेशकाललेखनादिकारणसमूहादेव सम्भवति । न चैवं 'यो जनः स्वयं विघ्नविरहवान् अस्ति तत्कृतमङ्गलस्य वैयर्थ्यापत्तिः स्यात्' इति चेत्, एवंभूतस्थले मङ्गलवैयर्थ्यमेवास्ति, किन्तु कदाचिन्मध्ये विघ्नो भवेदिति शङ्क्या तत्करणस्य सार्थक्यम् । यथा न हि सर्वेषां पशुशाले गृहाभ्यन्तरे वा वृकादिहिंसकजीवास्त-स्करादयो वा प्रत्यहं प्रविशन्ति किन्तु तदाशङ्क्या कपाटपिधानं प्रतिदिनं क्रियते, तथैव यद्यपि स जनो विघ्नविरहवानस्ति तथापि विघ्नाशङ्क्या तथैव शिष्टाचार-मवलोक्य सोऽपि मङ्गलमाचरतीति न कोऽपि दोषः ।

ननु, यदि समाप्तिं प्रति मङ्गलस्य किमपि कारणत्वमेव नाभ्युपगम्यते तदा "समाप्तिकामो मङ्गलमाचरेत्" इत्यादि तद्बोधकवेदस्याप्रामाण्यापत्तिः स्यादिति चेन्न, सत्येव विघ्ने तन्नाशार्थं तथाभूतस्य वेदस्य प्रामाण्यात् । अतएव यदि कश्चि-ज्जनः पापभ्रमेण प्रायश्चित्तं करोति तदा न तत्र तद्बोधकवेदस्याप्रामाण्यम् ।

ननु "सर्वे विघ्नाः शमं यान्ति गणेशस्तवपाठतः" इत्यादौ गणेशस्तवपाठा-दीनामपि विघ्नध्वंसे कारणत्वात् तेनैव विघ्नध्वंससम्भवे किमिति ग्रन्थे मङ्गला-चरणञ्चेत्, न हि विघ्नध्वंसत्वावच्छिन्नं प्रति (सर्वविघ्नविनाशं प्रति) मङ्गलस्य-कारणत्वमभ्युपेयते अपितु मङ्गलाव्यवहितोत्तरजायमानं विघ्नध्वंसं प्रति मङ्गलं

कारणम्, गणेशस्तवपाठाद्यव्यवहितोत्तरजायमानविघ्नध्वंसं प्रति गणेशस्तवपाठादि कारणमिति न कोऽपि दोषः ।

ननु मङ्गलं यदि विघ्नध्वंसमेव करोति न समाप्तिं जनयति तदा समाप्तिकामस्य जनस्य तत्र प्रवृत्तिरेव न स्यात् । अतः समाप्तिकामोऽपि मङ्गलं यथाऽऽचरेदिति समाप्तिं प्रति अपि कारणत्वमावश्यकं मङ्गलस्य, अपरञ्च यदि समाप्तिं प्रत्यपि मङ्गलस्य कारणत्वं कथ्यते तदा यत्र स्वतो विघ्नविरहत्वेन समाप्तिर्जाता तत्र विघ्नध्वंसाभावेऽपि समाप्तिदर्शनाद्दोषः स्यादिति किमभ्युपगन्तव्यमित्याशयेनाह—

क्वचिच्च विघ्नात्यन्ताभाव एव समाप्तिसाधनं, प्रतिबन्धकसंसर्गाभावस्यैव कार्यजनकत्वात्। इत्थं च नास्तिकादीनां ग्रन्थेषु जन्मान्तरीयमङ्गलजन्यदुरितध्वंसः, स्वतःसिद्धविघ्नात्यन्ताभावो वास्तीति न व्यभिचार इत्याहुः ।

क्वचिच्चेति—अर्थात् यथा समाप्तिम्प्रति विघ्नध्वंसस्य कारणताऽस्ति तथैव विघ्नात्यन्ताभावस्यापि कारणता, एवञ्च स्वतःसिद्धविघ्नविरहवतो जनस्य समाप्तौ विघ्नात्यन्ताभावरूपकारणतायाः सत्त्वेन न दोषलेश इत्यवधेयम् । न चैवं कारणताद्वयस्वीकारे कारणतावच्छेदके गौरवं स्यादिति वाच्यम् । प्रतिबन्धकसंसर्गाभावस्यैव कार्यजनकत्वस्वीकारे संसर्गाभावेन ध्वंसाभावात्यन्ताभावयोरुभयोरपि ग्रहणसंभवे कारणतावच्छेदके गौरवाभावात् । इत्थञ्च किरणावल्यादिनास्तिकग्रन्थे मङ्गलादर्शनेऽपि समाप्तौ जन्मान्तरीयमङ्गलजन्यविघ्नध्वंसकल्पने स्वतःसिद्धविघ्नात्यन्ताभावकल्पने वा न दोष इत्याकलनीयम् । एतदेवोक्तं मूले **'नव्यास्त्व'**त्यारभ्य **'आहु'**रित्यन्तेन । इति नवीनमतम् ।

ननु ईश्वरस्य प्रत्यक्षतो दर्शनाभावा'त्तस्मै कृष्णाय नमः' इति नमनमयोग्यम्, न च "सहस्रशीर्षा" इत्यादि वेद एव तत्सत्तायां प्रमाणं, यावदीश्वरसत्तायामेव शङ्का तावद्वेदस्यापि तत्प्रतिपादयितृत्वेन गणनैव केत्याशङ्क्येश्वरस्य जगत्कारणत्वमभ्युपगच्छँस्तत्सत्तायामनुमानप्रमाणमप्युपन्यस्यति आचार्यः—

संसारेति । संसार एव महीरुहो वृक्षस्तस्य बीजाय, निमित्तकारणायेत्यर्थः । एतेन ईश्वरे प्रमाणमपि दर्शितं भवति । तथाहि यथा घटादिकार्यं कर्तृजन्यं तथा

क्षित्यङ्कुरादिकमपि । न च तत्कर्तृत्वमस्मदादीनां संभवतीत्यतस्तत्कर्तृत्वेनेश्वरसिद्धिः । न च शरीराजन्यत्वेन कर्त्रजन्यत्वेन कर्त्रजन्यत्वसाधकेन सत्प्रतिपक्ष इति वाच्यम्, अप्रयोजकत्वात् । मम तु कर्तृत्वेन कार्यत्वेन कार्यकारणभाव एव अनुकूलस्तर्कः । 'द्यावाभूमी जनयन्देव एकः' 'विश्वस्य कर्ता भुवनस्य गोप्ता' इत्यादय आगमा अप्यनुसंधेयाः ।

संसारेति—संसार एव महीरुहो वृक्षस्तस्य बीजाय, कोऽर्थः निमित्तकारणाय । एतदेव जगदुत्पत्तिकारणताप्रतिपादनमीश्वरसत्तायां प्रमाणं भवति । तथाहि यथा घटपटादिवस्तूनामस्मिन् संसारेऽवश्यमेव कोऽपि निर्माता भवति तथैव क्षित्यङ्कुरादीनामप्यवश्यमेव कोऽपि कर्ता भविष्यति, तांश्च पृथिवीवृक्षादीन् अस्मासु न कोऽपि शक्नोति कर्तुम् अतश्च य एतेषामुत्पादकः स एवास्माकमीश्वर इति भावः । अनुमानप्रयोगस्त्वित्थम्—'क्षित्यङ्कुरादिकं कर्तृजन्यम्, जन्यत्वात्, यद्यज्जन्यं तत् सर्वं कर्तृजन्यम्, घटवत् ।'

नन्वयमनुमानप्रयोगः सत्प्रतिपक्षहेत्वाभासयुक्तः, तस्मिंश्च सति न स्यादनुमानम् । कथं स दोषः समायात इति चेच्छृणु । पक्षसाध्यहेतूदाहरणव्याप्तयोऽनुमानस्य कारणानि, तथा च क्षित्यङ्कुरादिकमित्यनुमाने क्षित्यङ्कुरादिकं पक्षः, कर्तृजन्यत्वं साध्यम्, जन्यत्वात् इति हेतुः, यद्यज्जन्यम् इति व्याप्तिः, घटवत् इति उदाहरणम् । अपरञ्च 'साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः' इति तद्दोषलक्षणम् । एवञ्च अत्र यत् साध्यं 'कर्तृजन्यत्वं' तदभावः कर्त्रजन्यत्वेऽस्ति, तत्साधकं हेत्वन्तरञ्च शरीराजन्यत्वमस्ति । अतश्च 'क्षित्यङ्कुरादिकं कर्त्रजन्यं शरीराजन्यत्वात्, यद्यत् शरीराजन्यं तत्सकलं कर्त्रजन्यं, आकाशवत्' एवं रीत्या दोषस्य प्रत्यक्षतो दर्शनेन कथमनुमानमितिचेन्न, अप्रयोजकत्वात्, अनुकूलतर्काभावादितिभावः । अर्थात् शरीराजन्यत्वमस्तु कर्त्रजन्यत्वं मास्तु इत्यादिका यदि व्यभिचारशङ्का जायेत तदा तन्निवारकः कोऽप्यनुकूलस्तर्क एव नास्ति । अपरञ्च यदि 'क्षित्यङ्कुरादिकं कर्तृजन्यं, जन्यत्वात्' इति मदीयेऽनुमाने जन्यत्वमस्तु, कर्तृजन्यत्वं मास्तु इत्युच्यते तदा यदि कर्तृजन्यत्वं न स्यात् तदा तस्य कार्यत्वमेव न स्यादित्वेवानुकूलस्तर्कः । तदेवाभिहितं मूले, **न च शरीराजन्यत्वेनेत्यारभ्य कार्यकारणभाव-**

एवानुकूलस्तर्क इत्याद्यन्तेन । अनया रीत्या यदा ईश्वरः सिद्धः तदा तत्सत्तायां तद्-बोधकवेदोऽपि 'द्यावाभूमी'त्यादिः प्रमाणीभूतो जात इति दिक् ॥

॥ इति मङ्गलवादः ॥

पदार्थान् विभजते—

द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।
समवायस्तथाभावः पदार्थाः सप्त कीर्तिताः ॥२॥

पदार्थानिति । ननु पदार्थान् विभजते इत्यस्य कोऽर्थः ? शृणु । स्वसमभिव्याहृतपदार्थताऽवच्छेदकीभूतमिथोविरुद्धयावद्धर्मप्रकारकम् पृथक्करणकम् विभजेः = वि-पूर्वक-भज-धातोः अर्थः । तथा च प्रकृते वि पूर्वको भज धातुः, तत्समभिव्याहृतपदं 'पदार्थानि'ति पदम्, तदर्थः द्रव्यादयः, तदवच्छेदकीभूता मिथो विरुद्धधर्मा द्रव्यत्वादयः, तद्धर्मप्रकारकं पृथक्करणं 'द्रव्यं गुण' इत्याकारकम्, अयमेव तदर्थः । एवं विभजेः पृथक्करणरूपेऽर्थे लब्धे पदार्थानित्यस्य च तत्कर्मत्वेनाचार्यपदम् अध्याहृत्य आचार्यः पदार्थानां विभागं करोति इति सरलार्थो जातः ।

द्रव्यमिति—द्रव्यम्, गुणः, कर्म, विशेषेणसहितं सविशेषकम्, अर्थात् विशेषसहितं सामान्यञ्च = सामान्यं विशेषश्चेति, समवायः तथा अभावः, इमे सप्त पदार्थाः कीर्तिताः कथिता इति कारिकार्थः ।

द्रव्यं गुण इति । अत्र सप्तमस्याभावत्वकथनादेव षण्णां भावत्वं प्राप्तं तेन भावत्वेन पृथगुपन्यासो न कृतः । एते च पदार्था वैशेषिके प्रसिद्धा नैयायिकानामप्यविरुद्धाः । प्रतिपादितं चैवमेव भाष्ये । अत एवोपमानचिन्तामणौ सप्तपदार्थभिन्नतया शक्तिसादृश्यादीनामप्यतिरिक्तपदार्थत्वमाशङ्कितम् ।

अत्रेति—ननु प्राचीनग्रन्थे वैशेषिकदर्शने भावपदार्थानांपृथगुपात्तत्वाद् अभावपदार्थस्य च पृथगुपात्तत्वात् पदार्थद्वैविध्यम् । अत्र च सर्वेषामैकत्रैव पाठादैकविध्यम् । तत्कथमितिशङ्कां निराकरोति अत्रेत्यनेन । यथा बहुषु जनेषु स्थितेषु 'अयं शूरः' इति 'अयमशूरः' इति वा प्रतिपादनेनैवान्येषामशूरत्वं शूरत्वं वा स्वतः

सिद्धयति, तथेहापि एकस्याभावत्वप्रतिपादनेनैवान्येषां भावत्वं दण्डापूपायित मित्यवधार्य तथोक्ति : । एते पूर्वोक्तपदार्थाः वैशेषिकमते प्रसिद्धाः । यद्यपि गौतममते षोडशपदार्थाः सन्ति, तेषामपि किन्त्वेष्वेव सप्तस्वन्तर्भावः, अतो गौतममतानुयायि-नैयायिकानामपि मते एते पदार्थाः अविरुद्धाः । अत एव भगवता प्रशस्तपादेन भाष्ये-ऽपीत्थं प्रतिपादितम् यत् पदार्थाः सप्तैवेति । अत एवोपमानचिन्तामणौ "सप्तपदार्थ-भिन्नतया-शक्ति सादृश्यादयोऽपि भिन्नाः पदार्था" इति शङ्का कृता । तामेव शङ्कां प्रदर्शयति—

ननु कथमेत एव पदार्थाः शक्तिसादृश्यादीनामप्यतिरिक्तपदार्थत्वात् । तथाहि—मण्यादिसमवहितेन वह्निना दाहो न जन्यते तच्छून्येन तु जन्यते । तत्र मण्यादिना वह्नौ दाहानुकूला शक्तिर्नाश्यते, उत्तेजकेन मण्याद्यपसारणेन च जन्यत इति कल्प्यते । एवं सादृश्यमप्यतिरिक्तः पदार्थः । तद्धि न षट्सु भावेष्वन्तर्भवति सामान्येऽपि सत्त्वात् ।

नन्वित्यादिना—ननु शक्तिसादृश्ययोरप्यतिरिक्तपदार्थयोः सत्त्वेन कथं सप्तैव पदार्थाः ? शक्तिसादृश्ये स्तः इत्यत्रैव किं प्रमाणमिति चेच्छृणु । चन्द्रकान्तमण्यादि-युक्तेन (आदिना मन्त्रादिसंग्रहः) वह्निना दाहो न भवति, तद्रहितेन स्वतन्त्रवह्निना च भवत्यतो ज्ञायते यत् दाहं प्रति न वह्निः कारणम्, अपि तु तन्निष्ठाशक्तिरेव, यदि च वह्नेरेव कारणत्वं स्यात् तदा चन्द्रकान्तमण्यादिसमवहितेऽपि वह्नौ कथं न दाहो जायेत, तदानीमपि तु अग्निरूपकारणमस्त्येव, अतश्च चन्द्रकान्तमण्यादि-समवधानं वह्नेर्दाहानुकूलां शक्तिम् नाशयति, सूर्यकान्तमण्यादिसमवधानं चन्द्र-कान्तमण्याद्यपसारणञ्च वह्नेर्दाहानुकूलां शक्तिमुत्पादयतीति कल्प्यतेऽनयारीत्या शक्तिसत्ता स्पष्टैव ।

ननु शक्तिसत्तायां सिद्धायामपि शक्तिः सप्तस्वेव कुत्रचिदन्तर्भविष्यतीति चेन्न, यतो हि गुणकर्मवृत्तित्वान्न तस्या द्रव्येऽन्तर्भावः, स्ववृत्तित्वात्सामान्यादि-वृत्तित्वाच्च न गुणकर्मणोः, शक्तेरुत्पादविनाशशालितया सामान्यविशेषसमवाया-नाञ्च नित्यतया नापि तेष्वन्तर्भवति सा, भावत्वेन प्रतीयमानत्वान्नाप्यभावेऽन्तर्भ-विष्यति शक्तिरित्यनया रीत्या समायातं तस्याः पदार्थान्तरत्वम् । अत एव 'अव्ययं विभक्ती'ति पाणिनीये पदार्थानतिवृत्तेः शक्तिमनतिक्रम्य 'यथाशक्ति' इत्युदाहरणमपि

संगच्छते । एवं सादृश्यमपि पदार्थान्तरम् । तत्सत्तायां किम्प्रमाणमिति चेत्, चन्द्रवन्मुखं कमलवच्चरणमित्यादि लोकव्यवहार एवेति गृहाण । सादृश्यस्यापि न तावदन्तर्भावः षट्सु पदार्थेषु, यतो हि सादृश्यं सामान्येऽप्यस्ति । अपरञ्च द्रव्यादि-षट्पदार्थेषु नास्ति कोऽप्येवंभूतः पदार्थो यः सामान्येतरेषु वर्तमान्: सन् सामान्येऽपि स्यात् । अतः "सादृश्यं षड्भावान्तर्भूतम्, सामान्येतरवृत्तित्वे सति सामान्यवृत्ति-त्वात्, यन्नैवं, तन्नैवं यथा घट" इति व्यतिरेकिणा तस्य द्रव्यान्तर्भावो निरस्तः ।

यथा गोत्वं नित्यं तथाश्वत्वमपीति सादृश्यप्रतीतेः । नाप्यभावे सत्त्वेन प्रतीयमानत्वादिति चेत् न । मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रति स्वा-तन्त्र्येण मण्यभावादेरेव वा हेतुत्वं कल्प्यते । अनेनैव सामञ्जस्ये अनन्तशक्ति-तत्प्रागभावध्वंसकल्पनानौचित्यात् । न चोत्तेजके सति प्रतिबन्धकसद्भावेऽपि कथं दाह इति वाच्यम् । उत्तेजकाभावविशिष्टमण्यभावस्य हेतुत्वात् । सादृश्यमपि न पदार्थान्तरं किं तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् । यथा चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्त्वं मुखे चन्द्रसादृश्यमिति ।।

इदानीं सादृश्यं सामान्ये कया रीत्या वर्तते इति प्रदर्शयति **यथागोत्वमित्या-दिना**—सादृश्यस्यापि भावत्वेन प्रतीयमानत्वात् नाभावेऽन्तर्भावः । एवं रीत्या सादृश्यस्यापि पदार्थान्तरत्वे समायाते, शक्तिसादृश्ययोरुभयोरपि तत्त्वं सिद्धम्, किन्तु तन्न शोभनतरम्—"दाहत्वावच्छिन्नं प्रति मण्याद्यभावविशिष्टवह्निः कारणम्, अथवा दाहत्वावच्छिन्नं प्रति स्वातन्त्र्येण मण्यभावः कारणम्, एवञ्च यत्र चन्द्रकान्त-मणिविशिष्टवह्निरस्ति, तत्र मण्याद्यभावविशिष्टवह्निरूपकारणस्याभावान्न दाहो जायते, अनेनैव सर्वकार्यसिद्धेऽनन्तशक्तितत्प्रागभावध्वंसकल्पनाया अयोग्यत्वात् ।

ननु यदि दाहत्वावच्छिन्नं प्रति मण्याद्यभावविशिष्टवह्निः कारणमस्ति तदा सूर्यकान्तचन्द्रकान्तमणिविशिष्टवह्निसत्त्वे कथं दाहः ? तत्रापि मण्यभावविशिष्ट-वह्निरूपकारणाभावादिति शङ्कते—**न चोत्तेजकत्वेसतीति** । तत्समाधानमिदमव-धार्यम् यत्—दाहत्वावच्छिन्नं प्रति मण्यभावः कारणमित्यतश्च यत्र सूर्यकान्तचन्द्र-कान्तमणिद्वयविशिष्टवह्निरस्ति, तत्रापि उत्तेजकाभावविशिष्टमण्यभावस्य सत्त्वेन दाहे न किमपि बाधकम् । एवमेव सूर्यकान्तविशिष्टवह्नावपि उत्तेजकाभावविशिष्ट-मण्यभावस्य सत्त्वेन न दाहे कापि शङ्केत्याकलनीयम् । अनया निरुक्तयुक्त्या तु शक्तेः

पदार्थान्तरत्वं खण्डितं भवति। एवञ्च सादृश्यमपि न पदार्थान्तरम्, किन्तु तद्-भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् यथा चन्द्रवन्मुखमित्यत्र चन्द्रभिन्नत्वे सति चन्द्रगतभूयोधर्मवत्त्वं मुखे सादृश्यम्। तथा च धर्मस्य गुणत्वात्तत्रान्तर्भावेन तस्यापि न पृथक्त्वमिति निश्चीयते।

द्रव्याणि विभजते—

क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः।
द्रव्यणि....

क्षित्यबिति। क्षितिः पृथिवी, आपो जलानि, तेजो वह्निः, मरुद्वायुः, व्योम आकाशः, कालः समयः, दिक् आशा, देही आत्मा, मनश्च एतानि नव द्रव्याणीत्यर्थः।

ननु द्रव्यत्वजातौ किं मानम्। न हि तत्र प्रत्यक्षं प्रमाणम्, घृतजतुप्रभृतिषु द्रव्यत्वाग्रहादिति चेत्, न। कार्यसमवायिकारणतावच्छेदकतया संयोगस्य विभाग-स्य वा समवायिकारणतावच्छेदकतया तत्सिद्धेरिति।

द्रव्याणीति—गुणाश्रयत्वे सति क्रियाश्रयत्वं द्रव्यत्वमिति द्रव्यलक्षणम्। तथाचेत्थमेव काणादे 'क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम्' इति सूत्रम्। यद्यपि क्रियाश्रयत्वं गगनादावव्याप्तम् तथापि 'कर्मवद्वृत्तिपदार्थविभाजकोपाधि-मत्त्वमिति कल्पने तत्राप्यदोषः। एवमाद्यक्षणे घटादीनामपि गुणाश्रयत्वाभावेऽपि 'गुणवद्वृत्तिपदार्थविभाजकोपाधिमत्त्वम्' इति कल्पयित्वा दोषो निरसनीयः। ननु द्रव्यत्वजातौ किं प्रमाणम्? न च, इदं द्रव्यम् इदं द्रव्यमित्यनुगतप्रतीतौ प्रत्यक्षमेव प्रमाणमितिवाच्यम्, अनभिज्ञानां द्रव्यत्वव्यवहारस्य मुद्रादावेव दर्शनेन घृतजतुभस्म-प्रभृतिषु द्रव्यत्वाग्रहात्। अतश्च किमपि लक्षणमवश्यं स्वीकर्तव्यम्, येन च सर्व-त्रैवाभीष्टस्थले द्रव्यत्वं स्याद् इत्याशयवान् समादधाति—**कार्यसमवायिकारण-तयेति**। अयं भावः। यावन्ति कार्याणि सन्ति, तानि सर्वाणि प्रति द्रव्यस्यैव तादा-त्म्येन कारणता, सा च कारणता नूनमेव किञ्चिद्धर्मावच्छिन्नेति स धर्म एव द्रव्यत्व-रूपा जातिः, एवञ्चानुमानेनानयारीत्या द्रव्यत्वसिद्धिर्ज्ञेया—समवायसम्बन्धावच्छिन्न-कार्यत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्ना या कारणता सा

अवश्यमेव किञ्चिद्धर्मावच्छिन्ना, कारणतात्वात्, या या कारणता सा सा अवश्यमेव किञ्चिद्धर्मावच्छिन्ना घटगतकार्यतानिरूपितकपालगतकारणतावत् । द्रव्यस्य च कार्यमात्रं प्रति कारणताऽतोवश्यं किञ्चिद्धर्मावच्छिन्नेति द्रव्यत्वं जातिः सिद्धयति । परन्त्वनुमानेऽस्मिन् कार्यत्वस्य समवायसंबन्धावच्छिन्नत्वमयोग्यम्, यतो हि कार्यत्वं तु ध्वंसेऽप्यस्ति किंतु तस्य समवायेनोत्पत्तिर्न भवति, अपितु स्वरूपेणैव । ततश्चानुमानमिदमयोग्यमिति चेत्, प्रकारान्तरमादेहि—समवायसम्बन्धावच्छिन्नसंयोगत्वावच्छिन्नसंयोगनिष्ठकार्यतानिरूपिता तादात्म्यसम्बन्धावच्छिन्ना कारणता साऽवश्यमेव किञ्चिद्धर्मावच्छिन्ना, कारणतात्वात्, या या कारणता सा सा अवश्यमेव किञ्चिद्धर्मावच्छिन्ना घटगतकार्यतानिरूपितकपालगतकारणतावत् अनेनैवाशयेन **संयोगस्ये**ति मूले प्रतिपादितम् । परन्तु येषां मते विभुद्वयस्य संयोगः तेषां मते संयोगत्वस्य विभुद्वयेऽपि सत्त्वात्, तस्य च नित्यगतत्वेन नित्यत्वात् संयोगत्वं कथं कार्यं स्यात् इत्याशयेनानुमानान्तरार्थमाह मूले **विभागस्ये**ति—तथा च समवायसम्बन्धावच्छिन्नविभागत्वावच्छिन्नविभागनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्ना या कारणता साऽवश्यमेव किञ्चिद्धर्मावच्छिन्ना, कारणत्वात्, या या कारणता सा सावश्यमेव किञ्चिद्धर्मावच्छिन्ना, घटगतकार्यतानिरूपितकपालगतकारणतावत् । अनेनानुमानेन न कुत्रापि दोषो द्रव्यत्वसिद्धिश्चेति सर्वमभिप्रेत्याह मूले **कार्यसमवायिकारणतये**त्यारभ्य **तत्सिद्धेरि**ति यावत् ।

ननु दशमं द्रव्यं तमः कुतो नोक्तं ? तद्धि प्रत्यक्षेण गृह्यते । तस्य च रूपवत्त्वात् कर्मवत्त्वाच्च द्रव्यत्वं, तच्च गन्धशून्यत्वात् न पृथिवी, नीलरूपत्वाच्च न जलादिकं, तत्प्रत्यक्षे चालोकनिरपेक्षं चक्षुः कारणमिति चेत् न । आवश्यकतेजोभावेनोपपत्तौ द्रव्यान्तरकल्पनाया अन्याय्यत्वात् । रूपवत्ताप्रतीतिस्तु भ्रमरूपा । कर्मवत्ताप्रतीतिरप्यालोकापसरणौपाधिकी भ्रान्तिरेव । तमसोऽतिरिक्तद्रव्यत्वेऽनन्तावयवादिकल्पनागौरवं च स्यात् । स्वर्णस्य यथातेजस्यन्तर्भावस्तथा वक्ष्यते ।

ननु कन्दलीकारैः सांख्याचार्यैश्च तमसोऽप्यतिरिक्तद्रव्यत्वमभ्युपगतम्, युक्तमपि चैतत् । यतो हि तत्सत्त्वे किम्प्रमाणमिति चेत्, तस्य प्रत्यक्षतया गृह्यमाणत्वात्। कथं तस्य द्रव्यत्वमिति चेत् शृणु, 'गुणाश्रयत्वे सति क्रियाश्रयत्वं द्रव्यत्वमि'ति तल्लक्षणम् । एवञ्च 'नीलं तमश्चलति' इति लोकप्रतीत्या तस्य गुणाश्रयत्वं क्रियाश्रयत्वञ्च स्पष्टमेव । ननु सिद्धेऽपि तस्य द्रव्यत्वे निरुक्तेष्वेव कस्मिँश्चिदन्तर्भ-

विष्यतीति चेन्न, निर्गन्धत्वात् पृथिव्याम्, नीलरूपत्त्वाच्च जलादिके तस्यान्तर्भावाभावात्, अतोऽतिरिक्तमेव द्रव्यम् ।

नन्वतिरिक्तं तमो द्रव्यञ्चेत्तदा द्रव्यान्तरवदालोकादिसापेक्षेणैव चक्षुषा तस्यापि प्रत्यक्षं स्यादिति चेन्न, तत्प्रत्यक्षे आलोकादिनिरपेक्षस्यैव चक्षुषः कारणत्वात् । तथा च तस्यानतिरिक्तत्वे न किमपि प्रमाणम् इति चेन्न, आवश्यकतेजोविशेषाभावेनैवोपपत्तौ द्रव्यान्तरकल्पनाया अयुक्तत्वात् । नीलरूपवत्ताप्रतीतिस्तु गगन इव तत्र भ्रान्तिरूपा । कर्मवत्ताप्रतीतिरपि यथा धूमगन्त्र्यादिचलनौपाधिकी-तत्समीपस्थतरूणाञ्चलनप्रतीतिस्तत्रस्थितानां भ्रमयुक्ता, तथाऽऽलोकापसरणौपाधिकी भ्रान्तिरेव । तमसोऽतिरिक्तत्वेऽनन्तावयवादिकल्पनागौरवमपि स्यादिति न तमोऽतिरिच्यते ।

स्वर्णस्य तेजस्यन्तर्भावप्रकारोऽग्रेऽभिधास्यते ॥

गुणान् विभजते—

....अथ गुणा रूपं रसो गन्धस्ततः परम् ॥३॥

स्पर्शः संख्या परिमितिः पृथक्त्वं च ततः परम् ।
संयोगश्च विभागश्च परत्वं चापरत्वकम् ॥४॥

बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरुत्वकम् ।
द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ॥५॥

अथ गुणा इति । एते गुणाश्चतुर्विंशतिसंख्याकाः कणादेन कण्ठतश्च शब्देन च दर्शिताः । तत्र गुणत्वादिकजातिसिद्धिरग्रे वक्ष्यते ॥३॥४॥५॥

एतेगुणा इति । एते चतुर्विंशतिसंख्याका गुणाः "रूपरसगन्धस्पर्शाः संख्यापरिमाणानि पृथक्त्वम् संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः" इति सूत्रे कणादेन वैशेषिकदर्शने प्रयत्नाश्चेत्यन्तं सप्तदशकण्ठेन, अवशिष्टा "गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाः" च-शब्देन च प्रदर्शिताः । गुणत्वादिकजातिसिद्धिस्तु तन्निरूपणावसरे एव भविष्यति ॥५॥

कर्माणि विभजते –

उत्क्षेपणं ततोऽपक्षेपणमाकुञ्चनं तथा ।
प्रसारणं च गमनं कर्माण्येतानि पञ्च च ॥६॥

उत्क्षेपणमिति । कर्मत्वजातिस्तु प्रत्यक्षसिद्धा । एवमुत्क्षेपणत्वादिकमपि ॥६॥

ननु भ्रमणादिकमपि पृथक् कर्म पञ्चकर्माधिकतया कुतो नोक्तम् अत आह—

भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च ।
तिर्यग्ममनमप्यत्र गमनादेव लभ्यते ॥७॥

भ्रमणमित्यादि समेषामेषां भ्रमणादिकर्मणां गमन एवान्तर्भावः ॥७॥

सामान्यं निरूपयति—

सामान्यं द्विविधं प्रोक्तं परं चापरमेव च ।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥८॥

कर्मणि विशेषाभावात्सामान्यं व्याख्यायते—**सामान्यमिति** । सामान्यं, परम् अपरम् च एवं द्विविधं प्रोक्तम् । द्रव्यादित्रिके द्रव्यादिगुणकर्मसु वृत्तिः वर्तनं यस्याः सा सत्ता, सैव च परतया अर्थात् परा इत्युच्यते । आचार्यैरिति शेषः । इति कारिकार्थः ।

सामान्यमिति । तल्लक्षणं तु 'नित्यत्वे सति अनेकसमवेतत्वम्' । अनेकसमवेतत्वं संयोगादीनामप्यस्त्यत उक्तं नित्यत्वेसति इति । नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्त्यत उक्तमनेकेति । नित्यत्वे सति अनेकवृत्तित्वमत्यन्ताभावेऽप्यस्त्यतो वृत्तित्वसामान्यं विहाय समवेतत्वमित्युक्तम् । एकव्यक्तिमात्रवृत्तिस्तु न जातिः ।

ननु सामान्यस्य किं लक्षणम् इतिचेच्छृणु—'नित्यत्वे सत्यनेकसमवेतत्वम्', अर्थात् नित्यत्वे सति अनेकेषु समवायसम्बन्धेन वर्तमानत्वमित्येव सामान्यस्य लक्षणम् ।

नन्वेतल्लक्षणस्वीकृतौ येषां मते विभुद्वयस्य संयोगो भवति तेषां मते विभुद्वय-संयोगस्यापि नित्यत्वे सत्यनेकसमवेतत्वेन तत्रापि जातित्वं स्यादिति चेन्न, विभुद्वय-संयोगस्वीकर्तृमते एव तल्लक्षणस्वीकारात् ।

ननु तन्मतेऽपि अनेकसमवेतत्वमित्येवोच्यताम्, किं 'नित्यत्वे सति' ग्रहणेति चेन्न, संयोगादीनामपि गुणतया अनेकेषु द्रव्येषु समवायेनैव सत्त्वात्तत्र दोषापत्तेः ।

नन्वेवं चेत्तदा 'नित्यत्वे सति समवेतत्वम्' इत्येवोच्यताम् किमनेकग्रहणेनेति चेन्न, गगनपरिमाणादीनामपि नित्यत्वे सति समवेतात्तत्रदोषापत्तेः ।

ननु तथापि 'नित्यत्वेसतिसमवेतत्वम्' इत्येवाभिधीयताम्, किं तथा लक्षणेनेति चेन्न, अत्यन्ताभावस्यापि अनेकवृत्तित्वात्तत्र दोषापत्तेः । अतो निर्दोष-त्वादाह—**नित्यत्वेसतीति** । तेनानेकव्यक्तिवृत्तिधर्म एव सामान्यम्, नत्वेकव्यक्ति-मात्रवृत्तिधर्म इत्यादि फलितं भवति ।

तथा चोक्तम्—'व्यक्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थितिः ।
रूपहानिरसम्बन्धो जातिबाधकसंग्रहः ॥'

द्रव्यादीति । परत्वमधिकदेशवृत्तित्वम्, अपरत्वमल्पदेशवृत्तित्वं, सकल-जात्यपेक्षयाऽधिकदेशवृत्तित्वात् सत्तायाः परत्वम्, तदपेक्षया चान्यासां जातीनाम-परत्वम् ॥८॥

तदेव स्पष्टीकुर्वन्नाह—**व्यक्तेरभेद** इति । यदाश्रयीभूता व्यक्तिरेका तस्य न जातित्वम्, यथा आकाशत्वम् । **तुल्यत्वमिति**—ययोर्द्वयोर्धर्मयोः समनियतत्वम् तयोर्न पृथग्जातित्वम्, यथा कलशत्वं घटत्वञ्चेति । **सङ्करइति**—ययोः साङ्कर्यं, न तयोर्जातित्वम् यथा भूतत्वं मूर्तत्वञ्चेति । साङ्कर्यमिहेत्थं—"परस्परात्यन्ताभाव-समानाधिकरणधर्मयोरेकत्र समावेशः" इति संकरलक्षणम्, तथा च भूतत्वात्यन्ता-भाववति मनसि मूर्तत्वम्, मूर्तत्वात्यन्ताभाववति गगने भूतत्वम्, तयोश्च पृथिव्यादि-चतुष्टये समावेशत्वेन साङ्कर्यं समायातम् । कानि भूतानि कानि मूर्तानि इति चेत्, क्षित्यादिपञ्चभूतानि, क्षित्यप्तेजोमरुन्मनांसि मूर्तानीति गृहाण । एवञ्च पूर्वोक्तरीत्या साङ्कर्येण न भूतत्वमूर्तत्वे जातिरूपे । **अनवस्थिति**रिति—तात्पर्यमत्रेदमवधार्यम् यत्,

यथा घटे घटत्वं तथैव तत्र घटत्वत्वमपि कथं न जातिरितिशङ्का, किन्तु यदि तथा अभ्युपगम्येत तदा घटत्वत्वत्वेऽपि कापि जातिरवश्यं स्वीकर्तव्या भवेदिति इत्थं क्वापि विरामाभावादनवस्था स्यादिति न जातौ जात्यन्तरस्वीकृतिः। यद्यपि घटत्वे घटत्वत्वस्वीकारे तस्य चैकव्यक्तिवृत्तितया व्यक्तेरभेदः इत्यनेनैव जातित्वाभावः सेत्स्यति, पुनरनवस्थितेर्जातित्वाभावकथनमयोग्यम्, तथापि यथा घटमात्रे एकं घटत्वम् जातिरभ्युपगम्यते तथैव घटत्वपटत्वयोरुभयोरेका तादृशी एवानुगतजातिरभ्युपगन्तव्या इत्याशयेन तथोक्तिः। **रूपहानि**रिति—विशेषपदार्थस्य रूपहानिरिति भावः। अर्थाद् यदि विशेषेऽपि पदार्थे विशेषत्वं जातिः स्यात्तदा विशेषरूपहानिः स्यादिति विशेषे न विशेषत्वं जातिः। अयं भावः—'जातिभिन्नत्वे सति जातिमद्भिन्नत्वम्' इति विशेषपदार्थलक्षणम्। यदि च विशेषेऽपि विशेषत्वं जाति स्यात्तदा तस्य जातिमद्भिन्नत्वाभावात्तत्र तल्लक्षणप्रवृत्तौ विशेषोच्छेदापत्तिः स्यादिति न तत्र कापि जातिः। **असम्बन्ध** इति—प्रतियोगितानुयोगितान्यतरसम्बन्धेन समवायाभावः, समवायाभाववृत्तिधर्मयोर्जातित्वे बाधकः। प्रतियोगिताऽनुयोगिताऽन्यतरसंबन्धेन समवायाभाववतो न जातित्वमिति फलितोऽर्थः। यः समवायेन कुत्रचित्तिष्ठति तत्र प्रतियोगितासम्बन्धेन समवायो वर्तते। यत्र च तिष्ठति तत्रानुयोगितासंबन्धेन समवायो वर्तते। यथा नीलगुणो घटे समवायेन तिष्ठति, अतस्तत्र (गुणे) प्रतियोगितासम्बन्धेन समवायो वर्तते। अपरञ्च घटे स गुणोऽस्ति, अतो घटे अनुयोगितासम्बन्धेन समवायो वर्तते। समवायः अभावो वा न कुत्रापि समवायेन तिष्ठति, अतो न तत्र प्रतियोगितासम्बन्धेन समवायः। न वाऽनयोः कश्चित् समवायेन तिष्ठति इति तत्रानुयोगितासम्बन्धेनापि समवायः। एवञ्च प्रतियोगिताऽनुयोगिताऽन्यतरसम्बन्धेन तयोः समवायाभावत्वेन समवायत्वमभावत्वञ्च न जातिरूपे। यद्यपि समवायस्यैकत्वाद् व्यक्तेरभेद इत्यनेनैव तस्य जातित्वाभावसिद्धिः, तथापि येषां मते उत्पादविनाशशालिनो बहवः समवायास्तेषां मते न कापि विप्रतिपत्तिः ॥८॥

परभिन्ना च या जातिः सैवापरतयोच्यते।
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥९॥
व्यापकत्वात्परापि स्याद् व्याप्यत्वादपरापि च।

पृथिवीत्वाद्यपेक्षया द्रव्यत्वस्याधिकदेशवृत्तित्वाद् व्यापकत्वात् परत्वं, सत्ता-

पेक्षयाऽल्पदेशवृत्तित्वाद् व्याप्यत्वात् द्रव्यत्वस्यापरत्वं, तथा च धर्मद्वयसमावेशादु-भयमविरुद्धम् ॥

विशेषं निरूपयति—

अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः ॥१०॥

अन्त्य इति । अन्ते अवसाने वर्तते इत्यन्त्यः । यदपेक्षया विशेषो नास्ति इत्यर्थः । घटादीनां द्व्यणुकपर्यन्तानां तत्तदवयवभेदात्परस्परं भेदः ।

परापरयोर्विशेषाभावाद्विशेषो निरूप्यते—**अन्त्योनित्येति**—अन्तेऽवसाने वर्तते इति अन्त्यः, यतोऽग्रे किञ्चिदपिनास्ति इति भावः । नित्य द्रव्येषु आकाशादि-पञ्चसु, पृथिव्यप्तेजोवायूनां परमाणुषु च वृत्तिर्यस्यासौ नित्य द्रव्यवृत्ति विशेषः परिकीर्तितः, कथितः इति कारिकार्थः ।

तल्लक्षणं तु 'जाति रहितत्वे सति जातिमद्भिन्नत्वम्' । ननु किमर्थमयं विशेषाख्यः पदार्थः स्वीक्रियते इति चेच्छृणु, सावययानां घटादीनां द्व्यणुकपर्यन्ता-नाम्, अवयवभेदात्, अयम् घटोघटान्तराद्भिन्नः, भिन्नावयवारब्धत्वात्, पटवत्—इत्यनुभानेन परस्परभेद सिद्धेऽपि अवयव रहितानां परमाणूनां भेदसाधनाय युक्त्यन्तराभावात्परस्यरमभेदे द्व्यणुकत्र्यणुकादीनामभेदपत्तौ तज्जन्यनीलपीताल्य-महत्पुष्पादीनामप्यभेदापत्तिः स्यादिति, परमाणुभेदसाधको विशेषाख्यः पदार्थः स्वीक्रियते । तथा च अयं परमाणुः परमाण्वन्तराद्भिन्नो, विशेषात्, इत्यनुमानेन परमाणुभेदसिद्धौ कस्यचित् पुष्पस्यलघुत्वे, कस्यचिद्दीर्घत्वे, एकस्य नीलत्वे इतरस्य च पीतत्वेऽपि न कापि शङ्का, तदुत्पादक परमाणूनां भिन्नत्वात् ।

परमाणूनां परस्परभेदको विशेष एव । स तु स्वत एव व्यावृत्तः, तेन तत्र विशेषान्तरापेक्षा नास्तीति भावः ॥१०॥

ननु यदि परमाणुभेद साधनाय विशेषाख्यः पदार्थः पृथगभ्युपगम्यते तदा तत्रापि भेदसाधकः कश्चिदन्योभविष्यति इत्याशये नाह—**सतु स्वतएवेति** । अर्थात् यदि तत्रापि भेदकान्तर कल्पना क्रियेत तदा तदुत्तरमपि भेदकान्तरकल्पनाशङ्कायां न किमपि बाधकमितीत्थ मनवस्था जायेत तदेवाह मूले **तेन तत्र विशेषान्तरा-पेक्षानास्तीति** ॥१०॥

समवायं दर्शयति—

घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः ।
तेषु जातेश्च संबन्धः समवायः प्रकीर्तितः ॥११॥

घटादीनामिति । अवयवावयविनोर्जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवायः । समवायत्वं नित्यसम्बन्धत्वम् ।

घटादीनामिति—घटादीनाम् घटपटादीनाम्, कपालादौ तत्तदवयवेषु, द्रव्येषु पृथिव्यादिषु, गुणकर्मणोः, तेषु कोऽर्थः द्रव्यगुणकर्मसु, जातेश्च यः सम्बन्धः स समवायः प्रकीर्तितः, कथितः । इति कारिकार्थः ।

अत्र घटशब्दस्यावयविमात्रपरकत्वम्, कपालपदस्य चावयवमात्रपरकत्वमभिप्रेत्य मूले घटादीनामिति प्रतिपादयति । **अवयवावयविनोरिति**—कपालादि-घटादीनाम्, गोत्वादि-गवादीनाम्, नीलादि-घटादीनाम्, क्रिया-क्रियावताम्, परमाण्वाकाशादिविशेषाणाञ्च समवायसम्बन्ध इति भावः । किं नाम समवायसम्बन्धत्वमिति चेत्, समवायत्वं नित्यसम्बन्धत्वम् ।

तत्र प्रमाणं तु गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया, विशिष्टबुद्धित्वात्, दण्डी पुरुष इति विशिष्टबुद्धिवदित्यनुमानम् । एतेन संयोगादिबाधात् समवायसिद्धिः । न च स्वरूपसम्बन्धेन सिद्धसाधनम्, अर्थान्तरं वा । अनन्तस्वरूपाणां संबन्धत्वकल्पने गौरवाल्लाघवादेकसमवायसिद्धिः । न च समवायस्यैकत्वे वायौ रूपवत्ताबुद्धिप्रसङ्गः, तत्र रूपसमवायसत्त्वेऽपि रूपाभावात् । न चैवमभावस्यापि वैशिष्ट्यं सम्बन्धान्तरं सिद्धचेदिति वाच्यम्, तस्य नित्यत्वे भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसङ्गात्, घटाभावस्य तत्र सत्त्वात्, तस्य च नित्यत्वात् । अन्यथा देशान्तरेऽपि तत्प्रतीतिर्न स्यात्, वैशिष्ट्यस्य च तत्र सत्त्वात् । मम तु घटे पाकरक्ततादशायां श्यामरूपस्य नष्टत्वान्न तद्वत्ताबुद्धिः, वैशिष्ट्यस्यानित्यत्वे त्वनन्तवैशिष्ट्यकल्पने तवैव गौरवम् । इत्थं च तत्तत्कालीनं तत्तद्भूतलादिकं तत्तदभावानां सम्बन्धः ॥११॥

समवायोऽस्तीत्यत्रैव किं प्रमाणमितिचेत्तत्र प्रत्यक्षप्रमाणाभावादनुमानप्रमाणमिति गृहाण, तदेव मूले प्रदर्शयति—**गुणक्रियादिरिति**। अयम्भावः—यथा दण्डी पुरुष इत्युक्तौ दण्डे विशेषणत्वम्, पुरुषे विशेष्यत्वम्, तयोश्च संयोगसम्बन्धोऽवभासते, एवमेव रूपवत् पुष्पम्, रूपवान् पटः, क्रियावान् मनुष्यः इत्याद्युक्तावपि अवश्यमेव विशेष्यविशेषणत्वेन तयोः कश्चित् सम्बन्धो भविष्यतीति स सम्बन्ध एव समवाय इति कल्प्यते।

ननु यथा दण्डी-पुरुष इत्यादौ दण्डपुरुषयोः संयोगसम्बन्धोऽवभासते तथैव रूपवत् पुष्पम्, रूपवान् पटः, क्रियावान् मनुष्य इत्यादावपि संयोग एव संबन्धो भवत्विति चेन्न, द्वयोर्द्रव्ययोरेव संयोगसम्बन्धो भवतीति निगमात्। एतदेवाह मूले—**गुणक्रियादि विशिष्टबुद्धिरिति समारभ्य समवायसिद्धिरित्यन्तं यावत्**।

ननु यथा घटाभाववद्भूतलमित्याद्यभावस्थले स्वरूपसंबन्धो भवति, तथैव रूपवत्पुष्पमित्यादावपि स्वरूपसम्बन्ध एव कल्प्यतामिति चेन्न। 'ययोर्द्वयोरेकमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ' इति लक्षणेन गुणगुणिनोरयुतसिद्धत्वेन, अवयवावयविनोः, क्रियाक्रियावतोश्चापि तत्त्वेन, रूपवत् पुष्पम्, क्रियावान् मनुष्य इत्यादौ स्वत एव स्वरूपसम्बन्धे सिद्धे तस्यानुमानेन साधने सिद्धसाधनत्वापत्तेः। न च सिद्धस्यापि वस्तुनोऽनुमानेन सिसाधयिषायां न सिद्धसाधनत्वापत्तिरिति वाच्यम्, यतो ह्युक्तम् 'प्रत्यक्षपरिकल्पितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिका' इति। तदा सिद्धस्यापि स्वरूपसम्बन्धस्यानुमानेन साधने समवायसाधनप्रवृत्तानाम् नैयायिकानां मतेऽर्थान्तरापत्तेः। अतश्च घटसमवायो घटस्वरूपः, पटसमवायः पटस्वरूप इत्यादि रीत्या अनन्तस्वरूपकल्पनायां गौरवाल्लाघवादेक एव समवायः कल्पनीयः।

न च समवायस्यैकत्वे रूपसमवायस्य स्पर्शसमवायस्य चैकत्वेन वायौ स्पर्शसमवायस्य वर्तमानतया रूपवत्त्वाभावापत्तिरिति वाच्यम्, समवायस्यैकत्वेऽपि सम्बन्धिभेदाद् भिन्नतया वायौ स्पर्शसमवायस्य सत्त्वेऽपि रूपाभावात्तद्वत्तापत्तेरभावात्।

ननु यदि स्वरूपसम्बन्धकल्पने गौरवाधिक्यात् समवायः पृथक् साध्यते, तदा अभावस्यापि सर्वत्रैव स्वरूपसम्बन्धेन भानात्तत्रापि गौरवस्य स्पष्टतया वैशिष्ट्यनामकं संबन्धान्तरं किं न कल्पनीयम् स्यादिति चेत्, सत्यम्, किन्तु स्वीक्रियमाणः

सम्बन्धो नित्योऽनित्यो वा ? यदि च तस्य नित्यत्वम् कल्प्यते तदा घटाभाववति भूतले घटानयनान्तरमपि घटाभावस्य, वैशिष्ट्यस्य च नित्यतया तत्र सत्त्वाद् घटाभाववद् भूतलमिति बुद्धिः स्यात् ।

ननु यद्येवममिधीयते यत् स्वीक्रियमाणस्य वैशिष्ट्यस्य (सम्बन्धान्तरस्य) नित्यत्वे घटाभाववद्भूतलमित्यादौ घटानयनानन्तरमपि घटाभावबुद्धिः स्यात्तदा श्रीमत्स्वीकृतस्य समवायस्याप्येकतया, नित्यतया च, पाकेन घटे रक्ततादशायाम् नीलरूपनाशेऽपि नीलरक्तयोः समवायस्यैकतया तस्यां दशायां रक्तस्यैव सत्त्वेऽपि तयोः समवायस्यैकत्वात् नित्यत्वाच्च कथन्न नीलरूपताबुद्धिरिति चेन्न, यथा वायौ रूपसमवायसत्त्वेऽपि रूपाभावान्न तत्र रूपवत्ताबुद्धिस्तद्वदिहापि रक्तश्यामसमवाययोरेकत्वेनैकस्यैव रूपस्य सत्त्वेऽपि अन्यरूपवत्ताबुद्धिसंशीतौ तद्रूपस्य नष्टत्वात्तद्वत्ताबुद्धेरप्रसङ्गात् । अपरञ्च यदि स्वीक्रियमाणस्य वैशिष्ट्यस्य (सम्बन्धान्तरस्य) अनित्यत्वं कल्प्यते तदा त्वनन्तवैशिष्ट्यकल्पने गौरवं स्पष्टमेव ।

ननु सिद्धान्तेऽपि अभावस्य नित्यतया घटाभाववति भूतले अभावस्य स्वरूपसम्बन्धस्य च वर्तमानत्वेन घटानयनकालेऽपि कथन्न भवति घटात्यन्ताभावबुद्धिरिति चेन्न, तत्तत्कालिकतत्तद्भूतलादिकस्य तत्तदभावानां सम्बन्धत्वकल्पने तत्तत्कालिकभूतलादिकस्यैव तत्तदभावसम्बन्धतया घटानयनकाले कालभेदेन भूतलादीनां भिन्नत्वेन तदानीं घटाभावबुद्धेरभावात् । एतदेव निश्शेषमभिप्रैत्य मूले—**न चेत्यारभ्य सम्बन्ध** इत्यन्तमुक्तम् ॥११॥

अभावं विभजते—

अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ।
प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥१२॥
एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते ।

अतः परमभावो विभज्यते—**अभावस्त्वि**ति । अभावो द्विधा—संसर्गाभावः, अन्योन्याभावश्चेति । संसर्गाभावस्त्रिविधः—प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावश्चेति । अन्योन्याभावस्त्वेक एवेति कारिकातात्पर्यम् ।

अभावस्त्विति। अभावत्वं द्रव्यादिषट्कान्योन्याभाववत्त्वम्। संसर्गेति संसर्गाभावान्योन्याभावभेदादित्यर्थः। अन्योन्याभावस्यैकविधत्वात्तद्विभागाभावात् संसर्गाभावं विभजते—प्रागभाव इति। संसर्गाभावत्वमन्योन्याभावभिन्नाभावत्वम्। अन्योन्याभावत्वं तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वम्। विनाश्यभावत्वं प्रागभावत्वम्। जन्याभावत्वं ध्वंसत्वम्। नित्यसंसर्गाभावत्वं अत्यन्ताभावत्वम्। तत्र तु भूतलादौ घटादिकमपसारितं पुनरानीतं च तत्र घटकालस्य संबन्धाघटकतया अत्यन्ताभावस्य नित्यत्वेऽपि घटकाले न घटात्यन्ताभावबुद्धिः। तत्रोत्पादविनाशशाली चतुर्थोऽयमभाव इति केचित्।

वाक्यार्थज्ञाने पदार्थज्ञानस्य कारणत्वेन पूर्वमभावस्यैव लक्षणम् मूले प्रतिपादयति—अभावत्वमिति। षट्संख्या प्रमाणमस्येति षट्कः, सचासावन्योन्याभावः षट्कान्योन्याभावः। द्रव्यादीनां—'द्रव्यं न, गुणो न, कर्म न, इत्याद्याकारकः यः षट्कान्योन्याभावः स तथोक्तः, तस्य भावस्तत्त्वमिति भावः।

नन्वत्राभावलक्षणेऽन्योन्याभावरूपाभावस्य सन्निवेशात् परस्परापेक्षत्वेनान्योन्याश्रय इति चेन्न, प्रतियोगितासापेक्षप्रतीतिविषयत्वम्, नञ्पदजन्यप्रतीतिविषयत्वं वेत्यभावलक्षणस्वीकारेणादोषात्। **विनाश्यभावत्वमिति**। विनङ्क्ष्यतीति विनाशी, स चासावभावो विनाश्यभावः, तस्य भावस्तत्त्वम्, प्रागभावत्वम्।

ननु यद्यत्यन्ताभावो नित्यस्तदा घटाभाववति भूतले घटानयनानन्तरमपि घटात्यन्ताभावबुद्धिः स्यादित्यत आह—**यत्रेति**—अर्थात्तत्कालिकस्य तत्तद्भूतलादेः तत्तदभावानां सम्बन्धत्वकल्पनेन भूतलादौ घटादिकमपसार्य पुनरानयने तद्भूतलस्य तत्कालिकत्वाभावात्सम्बन्धाभावेनात्यन्ताभावस्य नित्यत्वेऽपि न घटादिकालेऽत्यन्ताभावबुद्धिः। केचित्तु त्रैकालिसंसर्गावच्छिन्नप्रतियोगिताको योऽभावः सोऽत्यन्ताभाव इति लक्षणमाश्रित्य शशविषाणाभावः, वन्ध्यापुत्राभाव इत्यादावेव तत्सत्त्वेन घटादिकमपसार्य पुनरानयने तदभावाभावात्तथाभूतस्थले उत्पादविनाशशालिनश्चतुर्थमभावं स्वीकुर्वन्ति।

ननु घटानयनकाले मास्तु घटात्यन्ताभावबुद्धिः किन्तु घटानयनात्प्राक् कथं न तदत्यन्ताभावबुद्धिरित्यत आह—

अत्र ध्वंसप्रागभावयोरधिकरणे नात्यन्ताभाव इति प्राचीनमतं, श्यामघटे

रक्तो नास्तीति धीश्च प्रागभावं ध्वंसं चावगाहते न तु तदत्यन्ताभावं, तयोर्विरोधात्। नव्यास्तु तत्र विरोधे मानाभावात् ध्वंसादिकालावच्छेदेनाप्यत्यन्ताभावो वर्तत इति प्राहुः। नन्वस्तु अभावानामधिकरणात्मकत्वं लाघवादिति चेत् न, अनन्ताधिकरणात्मकत्वकल्पनापेक्षयातिरिक्तकल्पनाया एव लघीयस्त्वात्। एवञ्च आधाराधेयभावोऽप्युपपद्यते। एवं च तत्तच्छब्दगन्धरसाद्यभावानां प्रत्यक्षत्वमुपपद्यते। अन्यथा तत्तदधिकरणानां तत्तदिन्द्रियाग्राह्यत्वादप्रत्यक्षत्वं स्यात्। एतेन ज्ञानविशेषकालविशेषाद्यात्मकत्वमत्यन्ताभावस्येति प्रत्युक्तमप्रत्यक्षत्वापत्तेः।

अत्रेति—श्यामघटे रक्तो नास्ति, रक्तघटे श्यामो नास्ति, इत्यादौ रक्तप्रागभावः; श्यामो ध्वस्तः, इत्थं प्रागभागध्वंसयोरेव बोधात्प्रागभावध्वंसयोरधिकरणेऽत्यन्ताभावाभावात् घटानयनात्प्रागपि श्यामघटे रक्तोत्पत्तिप्रागभाववद्घटप्रागभावबुद्धिरेव, न तु तदत्यन्ताभावबुद्धिरिति प्रत्नाः। नूत्नास्तु ध्वंसप्रागभावयोरधिकरणेऽत्यन्ताभावबुद्धौ किमपि न बाधकमित्यस्त्येवात्यन्ताभाव इति निजगदुः।

नन्वभावः सर्वत्रैव स्वरूपसम्बन्धेनैव तिष्ठतीति घटाभाववद्भूतलमित्यादावभावस्य भूतलादिस्वरूपाङ्गीकारेणैवाधिकरणस्वरूपतयाऽपि सर्वसामञ्जस्येऽभावो न पृथक् स्वीकर्तव्य इति चेन्न, अनन्ताधिकरणात्मकत्वकल्पनापेक्षया पृथक् स्वीकृतावेव लाघवात्। एवञ्चाधाराधेयभावोऽप्युपपन्नो भवति, अन्यथा घटाभाववद्भूतलमित्यादौ घटाभावस्य भूतलस्वरूपतया स्वस्य स्वाधिकरणत्वाभावादाधाराधेयभावोऽपि न स्यात्। किञ्च गन्धाभाववत्पुष्पमित्यादौ गन्धाभावस्य पुष्पादिस्वरूपतया 'यो गुणो येनेन्द्रियेण गृह्यते तन्निष्ठाजातिस्तदभावोऽपि च तेनैवेन्द्रियेण गृह्यते' इति तत्प्रत्यक्षमपि न स्यात्। यतो हि प्रत्यक्षं तु घ्राणेन्द्रियेण भवति गन्धस्य, यदि च गन्धाभावः पुष्पादिस्वरूपो भवेत्तदा पुष्पादिवस्तूनां चक्षुरिन्द्रियग्राह्यतया घ्राणेन कथं प्रत्यक्षं सम्भवेत्। अभावस्य पृथक्स्वीकृतौ तु गन्धस्य घ्राणेन्द्रियग्राह्यतया पुष्पादौ तदभावोऽपि तेनैवेन्द्रियेण समीचीनतया गृह्यते। अधिकरणस्वरूपस्वीकारे तु सर्वथा दुर्लभं तत्प्रत्यक्षम्। अतएवात्यन्ताभावो ज्ञानस्वरूप एव, कालस्वरूप एवेति वदन्तोऽपि परास्ताः। तात्पर्यमत्रेदमवधार्यम् यत् रूपरसगन्धस्पर्शादीनां प्रत्यक्षं तत्तदिन्द्रियैर्भवति। रूपाभावो ज्ञानविशेषः, रसाभावो ज्ञानस्वरूपः कालस्वरूपोवेत्येवं कल्पने तु ज्ञानकालादीनां तत्तदिन्द्रियैरग्राह्यतया समक्षमेव तदप्रत्यक्षमिति दिक्। तदेवोक्तं मूले—**एवञ्चेत्यारभ्य प्रत्युक्तमित्यन्तेन**। इति पदार्थनिरूपणम्॥

अथेदानीं पदार्थानां साधर्म्यं वैधर्म्यं च वक्तुं प्रक्रमते—

सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते ॥१३॥

सप्तानामिति । **समानो धर्मो येषां ते सधर्माणः, तेषां भावः साधर्म्यं, समानो धर्म इति फलितार्थः । एवं विरुद्धो धर्मो येषां ते विधर्माणः, तेषां भावो वैधर्म्यं, विरुद्धो धर्म इति फलितार्थः । ज्ञेयत्वं ज्ञानविषयता, सा च सर्वत्रैवास्ति । ईश्वरादिज्ञानविषयतायाः केवलान्वयित्वात् । एवमभिधेयत्वप्रमेयत्वादिकं बोध्यम् ॥१२॥१३॥**

इदानीं पदार्थनिरूपणानन्तरम् तेषां साधर्म्यवैधर्म्ये निरूप्येते—**सप्तानामिति ।** सप्तानां द्रव्यादीनां ज्ञेयत्वादिकम् अर्थात् ज्ञेयत्वम्, अभिधेयत्वम्, प्रमेयत्वादिकञ्च साधर्म्यम् । ननु बहवः पदार्थाः एवंभूताः याञ्च न वयं जानीमः, इति न तेऽस्मदादिज्ञानविषयाः, तथा च सर्वत्रैव ज्ञानविषयतायाः अभावात्कथं ज्ञेयत्वं साधर्म्यमित्याशयेनाह—**ईश्वरादिति ।** यद्यपि बहवः पदार्थाः नास्मज्ज्ञानविषयीभूतास्तथापि सर्वेषामेव पदार्थानाम् ईश्वरयोगिज्ञानविषयतया न व्याहन्यते तत्त्वमिति तत्त्वम् ॥१२॥१३॥

द्रव्यादयः पञ्चभावा अनेके समवायिनः ॥
सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः ॥१४॥

द्रव्यादय इति । द्रव्यादयः द्रव्यगुणकर्मसामान्यविशेषाः, इमे पञ्च भावाः अनेके, समवायिनः । तु पुनः, आद्यास्त्रयः द्रव्यगुणकर्माणि, सत्तावन्तः । गुणादिः गुणकर्मणी, निर्गुणक्रियः अर्थात् गुणो निर्गुणः, क्रिया च निष्क्रियेति कारिकार्थः ।

द्रव्येति । **द्रव्यगुणकर्मसामान्यविशेषाणां साधर्म्यमनेकत्वं समवायित्वं च । यद्यप्यनेकत्वमभावेऽप्यस्ति तथाप्यनेकत्वे सति भावत्वं पञ्चानां साधर्म्यम् । तथा चानेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वमिति फलितार्थः । तेन प्रत्येकं घटादावाकाशादौ च नाव्याप्तिः । समवायित्वं च समवायसंबन्धेन संबन्धित्वं न तु समवायवत्त्वं सामान्यादावभावात् । तथा च समवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वमिति फलितार्थः । सत्तावन्त इति । द्रव्यगुणकर्मणां सत्तावत्त्वमित्यर्थः । गुणादिरिति । यद्यपि गुणक्रियाशून्यत्वमाद्यक्षणे घटादावतिव्याप्तं,**

क्रियाशून्यत्वं च गगनादावतिव्याप्तं, तथापि गुणवदवृत्तिधर्मवत्त्वं कर्मवदवृत्ति पदार्थविभाजकोपाधिमत्त्वं च तदर्थः । न हि घटत्वादिकं द्रव्यत्वं वा गुणवदवृत्ति कर्मवदवृत्ति वा किन्तु गुणत्वादिकं तथा । आकाशत्वादिकं तु न पदार्थविभाजकोपाधिः ॥१४॥

द्रव्यगुणेति । द्रव्यगुणकर्मसामान्यविशेषाणां अनेकत्वं समवायित्वं च साधर्म्यम् । न चैतेषामनेकत्वसाधर्म्यस्वीकारेऽनेकत्वस्याभावेऽपि विद्यमानतयाऽनेकत्वमभावस्यापि साधर्म्यं स्याद् इति वाच्यम्, अनेकत्वे सति भावत्वं पञ्चानां साधर्म्यमिति स्वीकारेणादोषात् । न चैवमपि एकस्मिन् घटे आकाशादौ चानेकत्वाभावात् पूर्वोक्तलक्षणस्य द्रव्येष्वेवाव्याप्तिरितिवाच्यम्, अनेकभाववृत्ति पदार्थविभाजकोपाधिमत्त्वं साधर्म्यमिति कल्पने तत्राप्यदोषात् । तथाहि अनेके भावाः घटपटादयः तद्वृत्तिः पदार्थविभाजकोपाधिः द्रव्यत्वम् तद्वत्त्वस्य प्रत्येकघटादावाकाशादौ च वर्तमानतया लक्षणसमवन्वयः । एवमनेकत्वसाधर्म्यं संस्थाप्य समवायित्वं संस्थाप्यते—**समवायित्वमिति** । ननु समवायित्वमित्यस्य कोऽर्थः ? यदि च समवायोऽस्त्यस्मिन्निति व्युत्पत्या समवायाधारत्वमित्युच्यते, तर्हि सामान्यविशेषयोः समवायाभावात् समवायित्वं तयोस्साधर्म्यं न स्यादित्याशयेन **समवायित्वञ्चे**ति मूले प्रतिपादयति । एवञ्च समवायसम्बन्धेन सामान्यस्य व्यक्तौ नित्यद्रव्येषु च वर्तमानतया न कोऽपि दोषः । न चैवं नित्यद्रव्याणां (पृथिव्यादि चतुष्टयपरमाणूनां आकाशादिपञ्चकानां च) क्वापि समवायित्वाभावात्तत्र लक्षणाव्याप्तिरिति वाच्यम्, समवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वमितिफलितार्थं प्रकल्प्य, समवेता घटगुणादयः (यतो हि समवायेन घटः कपालद्वये गुणश्च समवायेनैव घटादौ तिष्ठति) तद्वृत्तिः पदार्थविभाजकोपाधिः द्रव्यत्वम्, गुणत्वादिकं तद्वत्त्वस्य च नित्यद्रव्येऽपि वर्तमानतया लक्षणसमन्वये दोषाभावबोधनात् । **सत्तावन्त** इति । द्रव्यगुणकर्मणां सत्तावत्त्वं साधर्म्यमितिभावः । **गुणादिरिति** । गुणकर्मणोः (गुणक्रिययोः) निर्गुणत्वं निष्क्रियत्वं च साधर्म्यम् । न च गुणक्रिययोरेवं साधर्म्यस्वीकारे—'आद्यक्षणोत्पन्नं द्रव्यं निर्गुणं निष्क्रियञ्च तिष्ठति' इति नियमेन आद्यक्षणोत्पन्नघटादेरपि निर्गुणत्वात्, आकाशस्य च निष्क्रियत्वात्, निर्गुणत्वं, निष्क्रियत्वं च द्रव्येऽतिव्याप्तं स्यादिति वाच्यम्, निर्गुणत्वस्य गुणवदवृत्तिधर्मवत्त्वम्, निष्क्रियत्वस्य च कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वमित्यर्थकल्पने, गुणवद् द्रव्यं, तदवृत्तिधर्मो गुणत्वादिः न हि

पुनः घटत्वादिः, द्रव्यत्वं वा, अपरश्च कर्मवद् द्रव्यम्, तद्वृत्ति यद्यपि आकाशत्वं, किन्तु तस्य पदार्थविभाजकोपाधित्वाभावात्तत्राप्यदोषे सर्वसामञ्जस्यात् ॥१४॥

सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः ।
पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम् ॥१५॥

सामान्येति । सामान्यानधिकरणत्वं सामान्यादीनामित्यर्थः । पारिमाण्डल्येति । पारिमाण्डल्यमणुपरिमाणं, कारणत्वं तद्भिन्नानामित्यर्थः । अणुपरिमाणं तु न कस्यापि कारणम् । तद्धि स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत्, तच्च न संभवति, परिमाणस्य स्वसमानजातीयोत्कृष्टप रमाणाजनकत्वनियमान्महदारब्धस्य महत्तरत्ववदणुजन्यस्याणुतरत्वप्रसङ्गात् ।

सामान्येति—सर्वे जात्यादयः सामान्यविशेष समवायाभावाः, **सामान्यपरिहीना** मताः। सामान्यपरिहीनत्वमेषां साधर्म्यमिति तत्त्वम्। पारिमाण्डल्यभिन्नानां, अणुपरिमाणुभिन्नानां कारणत्वं साधर्म्यम्, इति कारिकार्थः ।

ननु यथा अणुपरिमाणुभिन्नानां कारणत्वं साधर्म्यं, तथैव अणुपरिमाणस्यापि कारणता कथं नेत्याशयेनाह—**अणुपरिमाणस्त्विति** । तस्य कारणत्वे को दोष इत्यत आह—**तद्धीति** । हि यतः तत् अणु-परिमाणम्, स्वस्य अणुपरिमाणस्य आश्रयः तथोक्तः अर्थात् अणुः तेन आरब्धम् द्रव्यम् द्व्यणुकादि, तत्परिमाणारम्भकं भवेत् इति न सम्भवति ।

ननु कारणगुणानां कार्यगुणारम्भकत्वेन तन्तुपरिमाणस्य पटपरिमाणारम्भकत्ववद् अणुपरिमाणस्यापि कथन्न द्व्यणुकादिपरिमाणारम्भकत्वमिति चेन्न, यतो हि परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वमिति यथा महदारब्धं द्रव्यं महत्तरं भवति तथैव अणुजन्यस्य अणुतरत्वं स्यादिति द्व्यणुकादीनामपि परमाणुवदप्रत्यक्षतापत्तिः स्यादतो न परमाणुपरिमाणं कस्यापि कारणम् ।

ननु तर्हि द्व्यणुकादीनां किं कारणम् ? कारणं विना द्व्यणुकादिरूपकार्योत्पत्यभावादिति चेत्, परमाणुगतद्वित्वादिसंख्यैवेति गृहाण ।

एवं परममहत्परिमाणमतीन्द्रियसामान्यं विशेषाश्च बोध्याः । इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वं, ज्ञायमानसामान्यं न प्रत्यासत्तिः, ज्ञायमानं

लिङ्गं नानुमितिकारणमित्यभिप्रायेणोक्तम् । मानसप्रत्यक्षे आत्ममहत्त्वस्य कारणत्वात्परममहत्परिमाणमाकाशादेर्बोध्यम् । तस्यापि न कारणत्वमित्याचार्याणामाशय इत्यन्ये । तन्न । ज्ञानातिरिक्तं प्रत्येवाकारणतायां आचार्यैरुक्तत्वात् ॥१५॥

एवमेव परममहतामाकाशकालादीनाम् परिमाणस्य अतीन्द्रियसामान्यस्य (अणुत्वस्य) विशेषाणाञ्चापि अकारणत्वमेव साधर्म्यमिति बोध्यम् ।

ननु योगिनामणुप्रत्यक्षं तद्गतपरिमाणप्रत्यक्षञ्च भवतीति तत्तद्विषयकप्रत्यक्षं प्रति विषयस्य तादात्म्येन कारणतया अणुपरिमाणन्तु न कस्यापि कारणमिति भवदुक्तमसंगतमत आह—**इदमिति** । अर्थात् इदमकारणत्वसाधर्म्यकथनम् 'योगिप्रत्यक्षे न विषयस्य कारणत्वमपितु तेषां निर्विषयकज्ञानं भवति' इत्याशयेनोहनीयम्, अन्यथा तेषामपि प्रत्यक्षे विषयस्य कारणत्वे योगिनां भूतभविष्यज्ज्ञानित्वं व्याहन्येत ।

ननु योगिनामेकस्मिन्नणौ दृष्टे सामान्यलक्षणया सकलाणुप्रत्यक्षेऽणुत्वस्य कारणत्वेनातीन्द्रियसामान्यं न कस्यापि कारणमितिकथनमयोग्यमित्यत आह—**ज्ञायमानसामान्यमिति** । ज्ञायते इति ज्ञायमानम् तच्च तत्सामान्यमितितथोक्तम्, न प्रत्यासत्तिः, न प्रत्यक्षजनकमिति भावः । किन्तु सामान्यज्ञानमेव प्रत्यक्षजनकमिति तत्त्वम् । अन्यथा धूलिपटले धूमत्वभ्रमानन्तरं सकलधूमविषयकं ज्ञानं न स्यात् । तदानीं धूमत्वेन सहेन्द्रियसम्बन्धाभावेन ज्ञायमानसामान्याभावात् । यदि च सामान्यज्ञानस्य कारणत्वमभ्युपगम्यते तदा कस्मिंश्चित् काले धूमज्ञानं जातमेवेति धूलिपटले धूमत्वभ्रमानन्तरमपि सामान्यज्ञानस्य वर्तमानतया सकलधूमविषयकज्ञाने न किमपि बाधकम् ।

ननु विशेषनिरूपणावसरे '**परमाणूनां परस्परभेदसाधको विशेष एव**' इत्युक्ततया 'अयं परमाणुरस्माद्भिन्नः, विशेषात्', इत्यनुमाने न परमाणूनां परस्परभेदसाधने विशेषस्य कारणत्वेन विशेषस्याकारणत्वकथनमसङ्गतमत आह—**ज्ञायमानमिति** । अत्रापि ज्ञायते इति व्युत्पत्त्या वर्तमाने शानचि निष्पन्नस्य ज्ञायमानशब्दस्य तात्कालिकज्ञानमित्येवार्थः । एवञ्चैवंभूतं लिङ्गमपि नानुमितिकारणमपितु लिङ्गज्ञानमेवेति भावः । अन्यथा अयं पर्वतो वह्निमान् भविष्यति,

भाविधूमात्, अथवा अयं पर्वतः वह्निमान् आसीत्, भूतधूमात्, इत्यादौ लिङ्गस्य ज्ञायमानत्वाभावेनानुमितिर्न स्यात्। लिङ्गज्ञानस्य कारणत्वे तु 'भूतभाविधूमात्' इत्यादौ लिङ्गाभावेऽपि लिङ्गज्ञानस्य वर्तमानतया निर्बाधैवानुमितिरिति भावः।

मानस प्रत्यक्ष इति—कालखादीनां महत्परिमाणं न कस्यापि कारणमिति तात्पर्यम्। ये तु '**कारणत्वञ्चान्यत्रपारिमण्डल्यादिभ्यः**।' इति गौतमीये **आदि** पदेन परममहत्परिमाणस्यापि ग्रहणात् आत्ममहत्त्वस्यापि न कारणत्वमित्याचार्याणामाशयमभिदधति, तन्न। ज्ञातुः आत्मनः, धर्माः ज्ञानादयः, तदितरभावकार्यम्प्रति पारिमण्डल्यादिभिन्नानां कारणत्वमित्यर्थकेन **'कारणत्वञ्च ज्ञातृधर्मेतरभावकार्यापेक्षया'** इति सूत्रेणैव ज्ञानातिरिक्तं प्रत्यकारणतायां गतार्थत्वात् ॥१५॥

॥ अथ कारणनिरूपणम् ॥

ननु कारणत्वं किम् ? अत आह —

अन्यथासिद्धिशून्यस्य नियतापूर्ववर्तिता।
कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम् ॥१६॥
समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम्।
एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम् ॥१७॥

अन्यथेति। तस्य कारणत्वस्य ॥१६॥१७॥

यत् समवेतं कार्यं भवति ज्ञेयं समवायिजनकं तत्।
तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् ॥१८॥

अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता कारणत्वं भवेत्। 'अन्यथासिद्धिशून्यत्वे सति कार्याव्यवहितप्राक्क्षणावच्छेदेन नियतपूर्ववृत्तित्व'मिति सामान्यतः कारणलक्षणम् ॥

तस्य त्रैविध्यं परिकीर्तितम्, समवायिकारणत्वम्, अथापि असमवायिहेतुत्वम्, एवं न्यायनयज्ञैः नैयायिकैः तृतीयं निमित्तहेतुत्वम् उक्तम् ॥

यत् समवेतं कार्यं भवति तत् समवायि जनकं ज्ञेयम् । तत् समवायिकारणे आसन्नं जनकम् द्वितीयं असमवायिकारणम् । आभ्यां समवायिकारणासमवायिकारणाभ्यां परं भिन्नं कारणं निमित्तकारणं स्यादिति कारिकाशयः ।

तत्रेति । समवायिकारणे आसन्नं प्रत्यासन्नं कारणं द्वितीयम्, असमवायिकारणमित्यर्थः । अत्र यद्यपि तुरीतन्तुसंयोगानां पटासमवायिकारणत्वं स्यात्, एवं वेगादीनामभिघाताद्यसमवायिकारणत्वं स्यात्, एवं ज्ञानादीनामपीच्छाद्यसमवायिकारणत्वं स्यात्, तथापि पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगभिन्नत्वं देयम् । तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रत्यसमवायिकारणं भवत्येव । एवं वेगादिकमपि वेगस्पन्दाद्यसमवायिकारणं भवत्येवेति, तत्तत्कार्यासमवायिकारणलक्षणे तत्तदभिन्नत्वं देयम । आत्मविशेषगुणानां तु कुत्राप्यसमवायिकारणत्वं नास्ति तेन तद्भिन्नत्वं सामान्यलक्षणे देयम् ।

ननु समवायिकारणे प्रत्यासन्नं कारणमसमवायिकारणमिति असमवायिकारणलक्षणस्वीकारे तुरीतन्तुसंयोगानामपि तन्तुरूपसमवायिकारणे प्रत्यासन्नतया पटासमवायिकारणत्वं स्यात्, एवं वेगादीनामपि अभिघातसमवायिकारणे पृथिव्यादिरूपे प्रत्यासन्नतया अभिघाताद्यसमवायिकारणत्वम्, तथा च ज्ञानादीनामिच्छाद्यसमवायिकारणत्वं भवेत् ।

नन्वस्तु तत्र तेषामसमवायिकारणत्वं को दोष इति चेन्न, असमवायिकारणनाशे कार्यनाशनियमात् तुरीतन्तु संयोगनाशे पटनाशापत्तेः । एवं वेगादिनाशेऽभिघातनाशापत्तिः, ज्ञानादिनाशे इच्छायाश्च नाशापत्तिः स्यात् । तद्वारणाय तुरीतन्तुसंयोगभिन्नत्वे सति पटसमवायिकारणे प्रत्यासन्नं कारणं पटासमवायिकारणम्, एवं वेगादिभिन्नत्वे सति अभिघातसमवायिकारणे प्रत्यासन्नं कारणमभिघातासमवायिकारणमित्यादि तत्तल्लक्षणे तत्तद्भिन्नत्वं दत्त्वा लक्षणं कल्पनीयम् । तदेव **तथापीत्यादिना** मूले प्रदर्शितम् । तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रति असमवायिकारणम्, एवमेव वेगादिकमपि वेगस्पन्दाद्यसमयवायि कारणं भवत्येवेति तत्तत्कार्यासमवायिकारणलक्षणे तत्तद्भिन्नत्वं संयोजनीयम् । आत्मविशेषगुणानान्तु कुत्रापि असमवायिकारणत्वं नास्ति तेन ज्ञानादिभिन्नमिति सामान्यलक्षणे

वक्तव्यमेव। इत्थञ्च समवायिकारणे प्रत्यासन्नं ज्ञानादिभिन्नं कारणमसमवायिकारणमिति सामान्यलक्षणं निष्पन्नम्।

अत्र समवायिकारणे प्रत्यासन्नं द्विविधम् कार्यैकार्थप्रत्यासत्या कारणैकार्थप्रत्यासत्या च। आद्यं यथा—घटादिकं प्रति कपालसंयोगादिकमसमवायिकारणम्। तत्र कार्येण घटेन सह कारणस्य कपालसंयोगस्यैकस्मिन् कपाले प्रत्यासत्तिरस्ति। द्वितीयं यथा—घटरूपं प्रति कपालरूपमसमवायिकारणम्। तत्र स्वगतरूपादिकं प्रति समवायिकारणं घटः, तेन सह कपालरूपस्यैकस्मिन् कपाले प्रत्यासत्तिरस्ति। तथा च क्वचित् समवायसंबन्धेन क्वचित् स्वसमवायिसमवेतत्वसंबन्धेनेति फलितोऽर्थः। इत्थं च कार्यैकार्थकारणैकार्थान्तरप्रत्यासत्त्या समवायिकारणे प्रत्यासन्नं कारणं ज्ञानादिभिन्नसमवायिकारणमिति सामान्यलक्षणं पर्यवसन्नम्। आभ्यां समवायिकारणासमवायिकारणाभ्यां परं भिन्नं कारणं तृतीयं निमित्तकारणमित्यर्थः ॥१८॥

नन्वेतल्लक्षणस्वीकारे कपालरूपं घटरूपस्यासमवायिकारणम् न स्यात्, कथमिति चेच्छृणु—घटरूपस्य समवायिकारणं घटः, तत्र प्रत्यासन्नः कपालद्वयसंयोगः, न तु कपालरूपं प्रत्यासन्नम्, तस्य कपाले एव प्रत्यासन्नत्वात्, कपालस्य च घटसमवायिकारणत्वात्। इत्थं दोषोद्भवे किमभ्युपगम्यते इत्यत आह—**अत्रेति**। एवं प्रत्यासत्तिविभागे कृते तत्रापि कारणैकार्थप्रत्यासत्त्या वर्तमानतया न दोषः। निमित्तकारणत्वञ्च समवाय्यसमवायिभिन्नकारणत्वम् ॥१६॥१७॥१८॥

इदानीमन्यथासिद्धत्वमेव कियतां पदार्थानामत आह येनेत्यादिना—

येन सह पूर्वभावः कारणमादाय वा यस्य।
अन्यं प्रति पूर्वभावे ज्ञाते यत् पूर्वभावविज्ञानम् ॥१९॥
जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते।
अतिरिक्तमथापि यद् भवेन्नियतावश्यकपूर्वभाविनः ॥२०॥

यत्कार्यं प्रति कारणस्य पूर्ववृत्तिता येन रूपेण गृह्यते तत्कार्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः। यथा घटं प्रति दण्डत्वमिति। द्वितीयमन्यथासिद्धमाह—

कारणमिति । यस्य स्वातन्त्र्येणान्वयव्यतिरेकौ न स्तः, किन्तु कारणमादायैवान्वयव्यतिरेकौ गृह्येते, तदन्यथासिद्धम् । यथा दण्डरूपम् । तृतीयमाह—**अन्यं प्रतीति** । अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते, तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम् । यथा घटादिकं प्रति आकाशस्य । तस्य हि घटादिकं प्रति कारणत्वमाकाशत्वेनैव स्यात् । आकाशत्वं हि शब्दसमवायिकारणत्वम् । एवं च तस्य शब्दं प्रति जनकत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं ग्राह्यमतस्तदन्यथासिद्धम् ।

येन सह अर्थात् येन रूपेण सह कारणस्य पूर्वभावः पूर्ववृत्तिता तद्रूपमन्यथासिद्धमिति । यस्य कारणमादाय पूर्वभावः (पूर्ववृत्तिता) तद् द्वितीयमन्यथासिद्धम् । अन्यं प्रति पूर्वभावे ज्ञाते (पूर्ववृत्तितायां ज्ञातायाम्) यत् पूर्वभावविज्ञानम् (पूर्ववृत्तिताज्ञानम्) तत्तृतीयमन्यथासिद्धम् । जनकं प्रति पूर्ववृत्तितामपरिज्ञाय यस्य पूर्ववृत्तिता न गृह्यते अर्थात् जनकं प्रति पूर्ववृत्तितामपरिज्ञायैव यस्य पूर्ववृत्तिता परिगृह्यते तच्चतुर्थमन्यथासिद्धम् । अथापि (अतः परम्) नियतावश्यक पूर्वभाविनः अवश्यक्लृप्तनियतपूर्वभाविनः यदतिरिक्तं भवेत् तत्पञ्चममन्यथासिद्धमिति कारिकार्थः ।।

कारिकाप्रदर्शितान्यथासिद्धपञ्चविध्यमिह विशदीक्रियते—**यत् कार्यमित्यादिना**—कार्यम्प्रति कारणस्य कारणता यत् किञ्चिद्रूपेणैवेति नियमेन घटरूपकार्यं प्रति दण्डस्य दण्डत्वेन रूपेण कारणतया दण्डत्वमन्यथासिद्धमिति प्रथमम् ।

यस्येत्यादि—तत्सत्त्वे तत्सत्त्वमन्वयः, तदसत्त्वे तदसत्त्वं व्यतिरेकः । एवं च **यस्य स्वातन्त्र्येणेत्यस्यायमर्थः**—'यथा दण्डस्य घटम्प्रति दण्डसत्त्वे घटसत्ता, इत्येवंरूपेण स्वातन्त्र्येण अन्वयः, दण्डाभावे घटाभावः इत्येवंरूपेण स्वातन्त्र्येण व्यतिरेकः, तथा घटरूपकार्यं प्रति दण्डत्व-दण्डरूपयोः स्वातन्त्र्येण नान्वयव्यतिरेकौ, किन्तु दण्डत्व-दण्डरूपाभ्यां विना दण्डसत्ताभावाद्दण्डरूपकारणद्वारैव तयोरन्वयव्यतिरेकाविति दण्डत्व-दण्डरूपयोर्द्वितीयमन्यथासिद्धत्वम् ।

अन्यम्प्रतीति—अन्यं प्रति पूर्ववृत्तित्वं (जनकत्वं) गृहीत्वैव यस्य यत् कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रति अन्यथासिद्धत्वम् । यथा घटादिकं प्रत्याकाशस्य कारणत्वमाकाशत्वेनैवास्ति, आकाशत्वञ्च शब्दसमवायिकारणत्वम्

(शब्दजनकत्वम्, यत् यस्य समवायिकारणं तत्तस्य जनकमिति नियमात्) एवञ्चाकाशत्वस्य शब्दं प्रति जनकत्वं गृह्यतेऽतः आकाशत्वस्य घटादिकं प्रति तृतीयमन्यथासिद्धत्वम् ।

ननु शब्दाश्रयत्वेन तस्य कारणत्वे काऽन्यथासिद्धिरिति चेत्, पञ्चमीति गृहाण । नन्वाकाशस्य शब्दं प्रति जनकत्वे किमवच्छेदकमिति चेत्, कवत्वादिकं विशेषपदार्थो वेति ।

ननु यद्याकाशत्वस्य घटादिकम्प्रति शब्दसमवायिकारणत्वमस्वीकृत्य "आकाशत्वं शब्दाश्रयत्वम्" इत्येव स्वीक्रियेत तदा घटादिकार्यं प्रति आकाशत्वे कान्यथासिद्धिरित्यत आह—**पञ्चमीति ।** आकाशत्वस्य शब्दाश्रयत्वस्वीकारे तृतीयान्यथासिद्धिलक्षणासंघटितत्वेन 'अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसंभवे तद्भिन्नमन्यथासिद्धमिति' पञ्चमलक्षणेन तत्रान्यथासिद्धत्वमिति तात्पर्यम् ।

ननु शब्दं प्रति आकाशस्य जनकत्वे (समवायिकारणत्वे) किमवच्छेदकम् ? शब्दाश्रयत्वं नाम शब्दविशिष्टत्वम् । तच्च 'शब्दवान् आकाशः' इत्यत्र शब्दात्मकम् 'प्रकृतिजन्यबोधे प्रकारो भाव' इति नियमात् । अर्थात् योऽर्थः शब्दवत्त्वस्य, स एव शब्द इत्यस्यापि, तथाहि—प्रकृतिः शब्दसमवायिकारणम् (शब्दवान्) तज्जन्यबोधः शब्दविशिष्टः (आकाशः), तत्रप्रकारीभूतः शब्दः, एवं शब्दसमवायिकारणम् शब्दत्वम्, तत्तु शब्दस्वरूपमिति स्वस्य स्वावच्छेदकासम्भवात् शब्द एवावच्छेदको भवेदित्याशा तु कमठीस्तन्यायिता इत्यत आह—**कवत्वादिकमिति ।** ककारादीनां बहुत्वादवच्छेदकबहुत्वारुचिमाकलय्यावच्छेदकान्तरमाह— **विशेषपदार्थो वेति ।** सकलशब्दानामनुगमको यो विशेषः तस्यैवावच्छेदकत्वस्वीकारे न कोऽपि दोष इति भावः ।

चतुर्थमन्यथासिद्धमाह—जनकं प्रतीति । यत्कार्यजनकं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत् कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम् । यथा कुलालपितुर्घटं प्रति । तस्य हि कुलालपितृत्वेन

घटं प्रति जनकत्वेऽन्यथासिद्धिः । कुलालत्वेन जनकत्वे त्विष्टापत्तिः कुलालमात्रस्य घटं प्रति जनकत्वात् ।

चतुर्थमन्यथासिद्धिः स्पष्टैव । [द्र० परिशिष्टम्]

पञ्चममन्यथासिद्धमाह—अतिरिक्तमिति । अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसंभवे तद्भिन्नमन्यथासिद्धमित्यर्थः । अतएव प्रत्यक्षे महत्त्वं कारणम्, अनेकद्रव्यत्वमन्यथासिद्धम् । तत्र हि महत्त्वमवश्यं क्लृप्तं तेनानेकद्रव्यत्वमन्यथासिद्धम् । न च वैपरीत्ये किं विनिगमकमिति वाच्यं, महत्त्वजातेः कारणतावच्छेदकत्वे लाघवात् ।।१६।।२०।।

अतिरिक्तमिति—अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसंभवे तद्भिन्नस्य पञ्चमान्यथासिद्धत्वम् । अतएव प्रत्यक्षे महत्त्वस्यावश्यक्लृप्तनियतपूर्ववृत्तितया अनेकद्रव्यत्वस्यान्यथासिद्धत्वम् । न च विनिगमनाविरहेण वैपरीत्यमेव स्यादिति वाच्यम्, अनेकद्रव्यत्वापेक्षया महत्त्वत्वजातौ कारणतावच्छेदकत्वे लाघवाधिक्यात् ।।१६।।२०।।

एते पञ्चान्यथासिद्धा दण्डत्वादिकमादिमम् ।
घटादौ दण्डरूपादि द्वितीयमपि दर्शितम् ।।२१।।

तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः ।
पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ ।।२२।।

घटादौ दण्डत्वादिकम् आदिमम् (प्रथमम्) तत्रैव दर्शितम्, व्याख्यातम् च। दण्डरूपादि द्वितीयम्, अत्रैव व्योम तु तृतीयमन्यथासिद्धम् । अपरः चतुर्थः कुलालजनकः । पञ्चमश्च रासभादिरित्येते पञ्च अन्यथासिद्धाः । एतेषु पञ्चसु अन्यथासिद्धेषु असौ पञ्चमः अन्यथासिद्धः आवश्यक इति कारिकार्थः ।

रासभादिरिति । यद्यपि यत्किञ्चिद्घटव्यक्तिं प्रति रासभस्य नियतपूर्ववृत्तित्वमस्ति, तथापि घटजातीयं प्रति सिद्धकारणभावैर्दण्डादिभिरेव

तद्व्यक्तेरपि संभवे, रासभोऽन्यथासिद्ध इति भावः । एतेष्विति । एतेषु पञ्चस्वन्यथासिद्धेषु मध्ये, पञ्चमोऽन्यथासिद्ध आवश्यकः, तेनैव परेषां चरितार्थत्वात् । तथा हि दण्डादिभिरवश्यक्लृप्तनियतपूर्ववृत्तिभिरेव कार्यसंभवे दण्डत्वादिकमन्यथासिद्धम् ।

यद्यपीति । यद्यपि रासभानीतमृत्तिकोत्पन्नघटादिकं प्रति रासभस्यापि नियतपूर्ववृत्तित्वमस्ति तथापि घटत्वावच्छिन्नं प्रति रासभस्यानियतपूर्ववृत्तित्वेन सिद्धकारणभावैर्दण्डादिभिरेव तद्घटादिकस्यापि उत्पत्तिसंभवे रासभोऽन्यासिद्ध इति भावः । एतेषु पञ्चसु अन्यथासिद्धेषु पञ्चमोऽन्यथासिद्ध आवश्यकः, तेनैवापरेषाञ्चतुर्णां गतार्थत्वात् । तथाहि—अवश्यक्लृप्तनियतपूर्ववर्तिभिरेव कार्यसंभवे दण्डत्वादिकमन्यथासिद्धम् ।

न च वैपरीत्ये किं विनिगमकमितिवाच्यम्, दण्डत्वस्य कारणत्वे दण्डघटितपरम्परायाः सम्बन्धत्वकल्पने गौरवात् । एवमन्येषामप्यनेनैव चरितार्थत्वं संभवति ।

ननु दण्डत्वस्यैव कारणत्वम् दण्डस्य चान्यथासिद्धत्वमस्तु, विनिगमनाविरहेणैकत्रप्रमाणाभावादित्याशयवानभिधत्ते—**न चेति । दण्डत्वस्य कारणत्वे त्विति ।** अयं भावः—यदि च दण्डत्वस्य कारणत्वं स्यात्, तदा दण्डत्वघटयोः 'स्वाश्रयभ्रमिजन्यभ्रमिवत्त्वसंबन्धः स्यात्, तत्र स्व-शब्देन दण्डत्वम्, तदाश्रयो दण्डः, तज्जन्या या भ्रमिः (चक्रस्येति शेषः) तज्जन्या या मृत्तिकायाः (घटस्य) भ्रमिः तद्वत्त्वं घटे वर्तते । दण्डस्य कारणत्वे तु दण्डघटयोः 'स्वजन्यभ्रमिजन्यभ्रमिवत्त्व'सम्बन्धः । तत्र हि स्व-शब्देन दण्डः तज्जन्या या भ्रमिः चक्रस्येति शेषः तज्जन्या या मृत्तिकायाः (घटस्य) भ्रमिः तद्वत्त्वं घटे वर्तते । एवं च दण्डघटितपरम्परायाः सम्बन्धत्वकल्पने गौरवम्, दण्डस्य कारणत्वे तस्य साक्षात् सम्बन्धे लाघवञ्च स्पष्टमेव । एवमेवान्येषां गगनकुलालपित्रादीनामप्यनेनैव पञ्चमान्यथासिद्धेन गतार्थत्वं सम्भवति ॥२१॥ २२॥

समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम् ।
गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायि हेतुत्वम् ।।२३।।

समवायीति । स्पष्टम् । गुणकर्मेति । असमवायिकारणत्वं गुणकर्मभिन्नानां वैधर्म्यं, न तु गुणकर्मणोः साधर्म्यमित्यत्र तात्पर्यम् । अथवा असमवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्वं तदर्थः । तेन ज्ञानादीनामसमवायिकारणत्वविरहेऽपि नाव्याप्तिः ।।२३।।

समवायिकारणत्वं द्रव्यस्यैव साधर्म्यमिति विज्ञेयम् । कर्ममात्रं प्रति समवायेन द्रव्यस्यैव कारणतेति व्याख्यातत्वात् । अथापि असमवायिहेतुत्वं गुणकर्ममात्रवृत्तिज्ञेयमिति कारिकाशयः ।

नन्वात्मविशेषगुणानां कुत्राप्यसमवायिकारणत्वं नास्ति, तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेवेति मूल एवोक्ततया असमवायिकारणत्वं गुणकर्ममात्रवृत्ति इति कथनमयोग्यमित्याशयेनाह– **असमवायीति** । साधर्म्यप्रकरणे वैधर्म्यप्रतिपादनमयोग्यमित्याशयेनाह—**अथवेति** । एवञ्च असमवायिकारणं कपालद्वयसंयोग इत्यादि, तद्वृत्तिः सत्ताभिन्नाजातिः गुणत्वम्, तद्वत्त्वस्य ज्ञानादावपि सत्त्वेन न कुत्रापि दोष इत्येवाभिव्यनक्ति मूले **तेने**त्यादिना ।।२३।।

अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते ।

अन्यत्रेति । नित्यद्रव्याणि परमाण्वाकाशादीनि विहायाश्रितत्वं साधर्म्यमित्यर्थः । आश्रितत्वं तु समवायादिसंबन्धेन वृत्तिमत्त्वं, विशेषणतया नित्यानामपि कालादौ वृत्तेः ।।

इह न्यायशास्त्रे नित्यद्रव्येभ्यः अन्यत्र आश्रितत्वम् साधर्म्यमुच्यते इति कारिकार्थः ।

पृथिव्यादिचतुष्टयपरमाणवः, आकाशादिपञ्च एतानि नित्यद्रव्याणि तान्यपहायापरेषामाश्रितत्वं साधर्म्यम्—**आश्रितत्वं त्विति**—समवायसंयोगादिसंबन्धेन वृत्तिमत्त्वम् तल्लक्षणम् ।

नन्वाश्रितत्वस्य विशिष्य लक्षणं किमर्थमभ्युपगम्यत इति चेच्छृणु, तस्य तथालक्षणस्वीकारे आकाशादिनित्यपदार्थानामपि आश्रितत्वं साधर्म्यं स्यात्, यतो हि विशेषणतया नित्यपदार्थानामपि कालादौ वृत्तिर्भवति। अयम्भावः—विशेषणता नाम एकविधः सम्बन्धः, स च त्रिविधः १. कालिकः २. दैशिकः ३. अभावीयश्चेति। इत्थञ्च कालिकविशेषणतया (संबन्धेन) सकलपदार्थाः काले तिष्ठन्ति, दैशिकविशेषणतया सकलपदार्थाः देशे तिष्ठन्ति, अपरञ्च अधिकरणेऽभावस्य यः सम्बन्धः स अभावीय-विशेषणतोच्यते। तथा च पूर्वोक्तलक्षणास्वीकारे कालिकविशेषणतया आकाशादिनित्यपदार्थानामपि काले वर्तमानतया आश्रित्वं तेषामपि साधर्म्यं स्यादिति विशिष्य तल्लक्षणस्वीकृतिः। तथा सति आकाशादीनां कालादौ वृत्तित्वेऽपि समवायादिसंबन्धेनावर्तमानतया न तत्रातिव्याप्तिरिति ध्येयम्।

इदानीं द्रव्यस्यैव विशिष्य साधर्म्यं वक्तुमारभते—

क्षित्यादीनां नवानां तु द्रव्यत्वगुणयोगिता ।.२४॥

क्षितिर्जलं तथा तेजः पवनो मन एव च ।
परापरत्वमूर्तत्वक्रियावेगाश्रया अमी ॥२५॥

क्षित्यादीनामिति । क्षितिर्जलमिति । पृथिव्यप्तेजोवायुमनसां परत्वापरत्ववत्त्वं मूर्तत्वं कर्मवत्त्वं वेगवत्त्वं साधर्म्यम्। न च तत्र घटादौ परत्वमपरत्वं वा नोत्पन्नं तत्राव्याप्तिरिति वाच्यम्, परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। मूर्तत्वमपकृष्टपरिमाणवत्त्वम्, तच्च तेषामेव, गगनादिपरिमाणस्य कुतोऽप्यपकृष्टत्वाभावात्। पूर्ववत् कर्मवत्त्वं कर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वम्, वेगवत्त्वं वेगवद्वृत्तिद्रव्यत्वजातिमत्त्वं च बोध्यम् ॥२४॥२५॥

क्षित्यादीनां नवानां द्रव्यत्वम् गुणयोगित्वं च साधर्म्यम्।

पृथिव्यप्तेजोवायुमनसां परत्वापरत्ववत्त्वम्, मूर्तत्वम्, क्रियावत्त्वम्, **वेगवत्त्वञ्च साधर्म्यम्** ।

नन्वेतल्लक्षणे यत्राद्यक्षणोत्पन्नघटादौ परत्वमपरत्वं वा नोत्पन्नं तत्राव्याप्तिः स्यादित्यत आह—**परत्वेति** । अर्थात् परत्वादि-समानाधिकरणा या द्रव्यत्वव्याप्या जातिः (पृथिवीत्वादि जातिः) तद्वत्त्वस्य विवक्षितत्वेन दोषलेशाभावः । मूर्तत्वं च अपकृष्टपरिमाणवत्त्वम्, तच्च पृथिव्यप्तेजोवायु-मनसामेव साधर्म्यम् । गगनादिपरिमाणस्य कुत्राप्यपकृष्टत्वाभावात् सर्वत्रैवोत्कृष्टपरिमाणत्वादितिभावः। कर्मवत्त्वमित्यत्रापि कर्मसमानाधिकरण-द्रव्यत्वव्याप्यजातेः पृथिवीत्वादेः, वेगवत्त्वमित्यत्र च वेगवद्वृत्तिद्रव्यत्वव्याप्य-जातेर्जलत्वादेश्च विवक्षितत्वेन न तत्र दोष इत्याकलनीयम् ।।२४।।२५।।

कालखात्मदिशां सर्वगतत्वं परमं महत् ।
क्षित्यादिपञ्चभूतानि चत्वारि स्पर्शवन्ति हि ।।२६।।

कालखात्मदिशाम्, सर्वगतत्वं परमं महत् (साधर्म्यम्), क्षित्यादि-पञ्चभूतानि, हि, चत्वारि पृथिव्यादीनि स्पर्शवन्ति । इति कारिकार्थः ।

कालेति । कालाकाशात्मदिशां सर्वगतत्वं सर्वमूर्तसंयोगित्वं परम-महत्त्वं च । परममहत्त्वं जातिविशेषः, अपकर्षनाश्रयपरिमाणत्वं वा । क्षित्यादीति । पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वम् । तच्च बहिरिन्द्रिय-ग्राह्यविशेषगुणवत्त्वम् । अत्र ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वं बोध्यम् । तेन 'ज्ञातो' घट इत्यादिप्रत्यक्षे ज्ञानस्याप्युपनीतभानविषयत्वात्तद्वृत्ति आत्मनि नातिव्याप्तिः ।

कालाकाशात्मदिशां सर्वगतत्वं, सर्धमूर्तसंयोगित्वं परममहत्त्वञ्च साधर्म्यम्। परममहत्त्वञ्च जातिविशेषः । यदि तु जातिसाधिकायाः कार्यतावच्छेदकतायाः कारणतावच्छेकताया अनुगतप्रतीतेर्वा अभावेन कथं तत्र जातित्वमितिशङ्क्यते तदा अपकर्षनाश्रयत्वं तत्त्वमवगन्तव्यम् । पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वं साधर्म्यम् । भूतत्वं किमिति चेत्—

'बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम्' । अत्र भूतत्वलक्षणघटकग्राह्यत्वं नाम 'लौकिकप्रत्यक्षस्वरूपयोग्यत्वम्' (लौकिकसन्निकर्षाधीनबहिरिन्द्रियजन्य-लौकिकप्रत्यक्षविषयतावच्छेदकधर्मवत्त्वम्) बोध्यम्। तेन लौकिकसन्निकर्षाधीनम् यद् बहिरिन्द्रियजन्यलौकिकप्रत्यक्षम् (रूपरसादीनाम्) तद्विषयतारूपादीनामस्ति, तद्विषयतावच्छेदकम् रूपत्वम्, रसत्वं वा, तद्वत्त्वस्य च परमाण्वादावपि सत्त्वेन तत्र भूतत्वस्य नाव्याप्तिः। तत्रापि लौकिक सन्निकर्षाधीनबहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयतावच्छेदकधर्मस्य रूपत्वादेर्वर्तमानत्वात्। न वा कस्मिंश्चित् समये 'सुरभि चन्दनम्' इति ज्ञाने 'अयं घटः' इति वा ज्ञाने जाते घटचन्दनयोः कालान्तरे दर्शने 'सुरभि चन्दनम्' 'ज्ञातो घटः' इति स्मरणे तत्र ज्ञानलक्षणप्रत्यासत्त्या ज्ञानस्यापि ज्ञाने जाते तस्यापि चक्षूरूपबहिरिन्द्रियग्राह्यविशेषगुणत्वेन तद्वत्यात्मन्यतिव्याप्तिः। ज्ञानस्य ज्ञानलक्षणया ज्ञानेऽपि तस्य लौकिकप्रत्यक्षविषयतावच्छेदकधर्मवत्त्वाभावात्।

न वा प्रत्यक्षाविषयरूपादिमति परमाण्वादावव्याप्तिः। तस्यापि स्वरूपयोग्यत्वात्। महत्त्वलक्षणकारणान्तरासन्निधानाच्च न प्रत्यक्षम्। अथवा आत्मावृत्तिविशेषगुणवत्त्वम्। चत्वारीति। पृथिव्यप्तेजोवायूनां स्पर्शवत्त्वम्।

ननु परमाण्वादौ रूपत्वादि (लौकिकप्रत्यक्षस्वरूपयोग्यता) स्वीकारे कस्मिंश्चित् काले तेषामपि प्रत्यक्षं स्यादिति चेन्न, रूपत्वादीनां सत्त्वेऽपि तत्र महत्त्वस्याभावात् प्रत्यक्षत्वस्य वक्तुमशक्यत्वात्।

नन्वेवमपि चक्षुरादिगतरूपादिविशेषगुणानामनुद्भूतत्वेन बहिरिन्द्रियजन्यप्रत्यक्षीयलौकिकविषयतावच्छेदकोद्भूतरूपत्वादीनां चक्षुरादिगतरूपादावभावादव्याप्तिरत आह **अथवेति**—एवञ्च आत्मावृत्तिर्विशेषगुणः रूपरसादिः, तद्वत्त्वं च पृथिव्यादिषु वर्तत एवेति तद्वत्त्वमेव तेषां साधर्म्यम्। पृथिव्यप्तेजोवायूनां स्पर्शवत्त्वम् साधर्म्यम् ॥२६॥

द्रव्यारम्भश्चतुर्षु स्यादथाकाशशरीरिणाम्।
अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते ॥२७॥

द्रव्यारम्भ इति । पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारम्भकत्वम् । न च द्रव्यानारम्भके घटादावव्याप्तिः, द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्य-जातिमत्त्वस्य विवक्षितत्वात् ।

चतुर्षु क्षित्यप्तेजोवायुषु द्रव्यारम्भः स्यात् साधर्म्यमिति शेषः । अथ आकाशशरीरिणाम् = व्योमात्मनाम् अव्याप्यवृत्तिः क्षणिकविशेषगुण इष्यते साधर्म्यम् इति कारिकाशयः ।

पृथिव्यप्तेजोवायूनां द्रव्यारम्भकत्वं साधर्म्यम् । न चेदं द्रव्यानारम्भके घटादावव्याप्तमिति वाच्यम्, द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजाति-मत्त्वस्य विवक्षित्वात्, इत्थञ्च द्रव्यम् घटादि, तत्समवायिकारणं कपालादि, तद्वृत्तिर्द्रव्यत्वव्याप्याजातिः पृथिवीत्वादिजातिः तद्वत्त्वस्य च घटादावपि सत्त्वेन लक्षणसमन्वयः ।

आकाशशरीरिणामिति । आकाशात्मनामव्याप्यवृत्तिक्षणिकविशेषगुण-वत्त्वम् साधर्म्यमित्यर्थः । आकाशस्य विशेषगुणः शब्दः स चाव्याप्यवृत्तिः । यदा किंचिदवच्छेदेन शब्द उत्पद्यते तदान्यावच्छेदेन तदभावस्यापि सत्त्वात् । क्षणिकत्वञ्च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम् । योग्यविभुविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वात् प्रथमशब्दस्य द्वितीयशब्देन नाशः ।

आकाशशरीरिणामिति—आकाशात्मनामव्याप्यवृत्तिक्षणिकविशेषगुण-वत्त्वं साधर्म्यम् । तथाहि आकाशस्य विशेषगुणः शब्दः स चाव्याप्यवृत्तिः, अर्थात् न हि सर्वावयवावच्छेदेन वर्तमानः, किन्तु यत्किञ्चिद्देशावच्छेदेन वर्तमानः । यदा किञ्चिदवच्छेदेन शब्दः उत्पद्यते तदा अन्यावच्छेदेन तद-भावोऽपि तिष्ठत्येव, यथा केनचिदुच्चरितः 'रामः' इति शब्दः चेष्टावत्-प्राण्यधिष्ठितदेशावच्छेदेन वर्तते, घटावच्छेदेन च तदभावोऽपि अस्त्येवेति । इत्थमाकाशेऽव्याप्यवृत्तित्वम् । क्षणिकत्वञ्च 'तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्' यतो हि योग्यविभुविशेषगुणाः (आकाशानां व्यापकानां गुणाः) स्वोत्तरवर्ति-गुणैर्नाश्यन्ते, अतो द्वितीयशब्देन प्रथमशब्दस्य नाशो भवति, यथा राम-शब्दोच्चारणे आकारोच्चारणकाले रकारो नश्यति, एवं मकारोच्चारणे

आकारो नश्यतीति सर्वत्रैव आद्यक्षणे शब्दा उत्पद्यन्ते द्वितीयक्षणे तिष्ठन्ति, तृतीयक्षणे च नश्यन्ति इति तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वं सुस्थमेव । इत्थमाकाशे अव्याप्यवृत्तिमत्त्वं क्षणिकविशेषगुणवत्त्वञ्च समायातम् ।

एवं ज्ञानादीनामपि । ज्ञानादिकं यदात्मनि विभौ शरीराद्यवच्छेदेनोत्पद्यते तदा घटावच्छेदेन तदभावोऽस्त्येव एवं ज्ञानादिकमपि क्षणद्वयावस्थायि । इत्थं चाव्याप्यवृत्तिविशेषगुणवत्त्वम् क्षणिकविशेषगुणवत्त्वम् चार्थः।

इदानीमात्मनि अव्याप्यवृत्तिमत्त्वं क्षणिकविशेषगुणवत्त्वं च प्रदर्श्यते— **एवमित्यादिना** । यदा शरीराद्यवच्छेदेन ज्ञानादिकमात्मनि समुत्पद्यते तदा घटाद्यवच्छेदेन तदभावोऽप्यस्त्येव । इत्थमात्मविशेषगुणस्य ज्ञानादेरव्याप्यवृत्तित्वेन ज्ञानादीनाञ्चात्मन्येव सत्त्वेन आत्मन्यव्याप्यवृत्तिमत्त्वमायातम् । ज्ञानादिकमपि आद्यक्षणे उत्पद्यते, द्वितीयक्षणे तिष्ठति, तृतीयक्षणे नश्यति, इति आकाशविशेषगुणशब्दवत् ज्ञानादिष्वपि क्षणिकविशेषगुणत्वस्य सत्त्वात्तेषां चात्मविशेषगुणत्वेनात्मनि क्षणिकविशेषगुणवत्त्वमपि निर्बाधमेव । अमुना प्रकारेण "अव्याप्यवृत्तिविशेषगुणवत्त्वम्" "क्षणिकविशेषगुणवत्त्वञ्च" आकाशशरीरिणोः साधर्म्यम् सिद्धम् ।

पृथिव्यादौ रूपादिर्विशेषगुणोऽस्तीति अतोऽव्याप्यवृत्तीत्युक्तम् । पृथिव्यादावव्याप्यवृत्तिः संयोगादिरस्तीत्यतो विशेषणेत्युक्तम् ।

ननु विशेषगुणत्वमित्येवोच्यताम् किमव्याप्यवृत्तीत्यनेनेति चेन्न, विशेषगुणस्य रूपादेः पृथिव्यादावपि सत्त्वेन तत्त्वस्य पृथिव्यादीनामपि साधर्म्यापत्तेः ।

नन्वेवमपि अव्याप्यवृत्तिमत्त्वमाकाशशरीरिणोः साधर्म्यमित्येवोच्यताम् किं विशेषगुणवत्त्वमित्यनेनेति चेन्न, अव्याप्यवृत्तेः संयोगादेः पृथिव्यादावपि सत्त्वेन तत्र दोषापत्तेः । कृते तु तस्मिन् संयोगादेर्विशेषगुणत्वभावेन तत्र सत्त्वेऽपि दोषाभावः ।

न च रूपादीनामपि कदाचित् तृतीयक्षणे नाशसंभवात् क्षणिकविशेषगुणवत्त्वम् क्षित्यादावतिव्याप्तमिति वाच्यम्, चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य तदर्थत्वात् । अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति क्षणचतुष्टयं तु न किमपि जन्यज्ञानादिकं तिष्ठति । रूपत्वादिकं तु क्षणचतुष्टयस्थायिन्यपि रूपादौ वर्तत तद्व्युदासः ।

ननु किमपि आम्रपुष्पादि यद्याद्यक्षणे उत्पद्य द्वितीयक्षणे स्थित्वा, तृतीयक्षणे नष्टम् तदा तद्गतरूपादीनामपि तृतीयक्षणे नाशसंभवात् क्षणिकविशेषगुणवत्त्वस्य पृथिव्यादावपि वर्तमानतया तत्रातिव्याप्तिः स्यादिति चेन्न, चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य तदर्थत्वात् । चतुःक्षणवृत्तिजन्यम् घटपटादि, रूपरसादि, तत्र अवृत्तिर्जातिः, शब्दत्वज्ञानत्वादिरूपा, तद्वन्तो विशेषगुणाः शब्दज्ञानादयः, तद्वत्त्वस्य च आकाशशरीरिणोरेव सत्त्वेन दोषाभावात् । यतो हि 'अनेकैकत्वबुद्धिर्या साऽपेक्षाबुद्धिरिष्यते' इत्याश्रित्य 'अयमेकः, अयमेकः, अयमेकः' इत्याकारिका या बुद्धिः सा तु क्षणत्रयमेव तिष्ठति, क्षणचतुष्टयन्तु किमपि जन्यज्ञानादि न तिष्ठति, यत्र रूपत्वादीनामवृत्तित्वम् प्रतिपादयितुं शक्यते, किन्तु चतुःक्षणवृत्तिजन्यम् यद्रूपादि, तत्रापि रूपत्वादीनां वर्तमानतया तेषां चतुःक्षणवृत्तिजातिमद्विशेषगुणवत्त्वाभावान्न पृथिव्यादावतिव्याप्तेः शङ्कावसरः ।

ईश्वरज्ञानस्य चतुःक्षणवृत्तित्वाज्ज्ञानत्वस्य तद्वृत्तित्वाज्जन्येत्युक्तम् । यद्याकाशजीवात्मनोः साधर्म्यं, तदा जन्येति न देयम्, द्वेषत्वादिकमादाय लक्षणसमन्वयात् ।

ननु चतुःक्षणवृत्त्यवृत्तिजातिमद्विशेषगुणवत्त्वमित्येवोच्यताम्, किमर्थं जन्यपदोपादानमितिचेन्न, ईश्वरीयज्ञानस्य चतुःक्षणवृत्तित्वेन, ज्ञानत्वस्य च तद्वृत्तित्वेन परमात्मन्यव्याप्तिवारणाय जन्यपदस्य सार्थक्यात् । अन्यथा तथा लक्षणस्वीकारे चतुःक्षणवृत्ति ईश्वरीयज्ञानम्, ज्ञानत्वञ्च न तदवृत्ति, अपितु तद्वृत्ति एव, अतश्च तथाव्याप्तिः स्यात् ।

ननु व्यक्तिबहुत्वसूचकबहुवचनेन, शरीरमस्त्यस्येति व्युत्पत्त्या शरीरी-

त्यन्वर्थसंज्ञया च जीवात्मन एव बोधात् ईश्वरसाधर्म्यसिद्धये जन्यपदं व्यर्थमेवेत्याशयेनाह—**नदेयमिति**।

ननु तथा स्वीकारे चतुःक्षणवृत्तीश्वरीयज्ञाने ज्ञानत्वस्य वर्तमानतया ज्ञानत्वस्य च चतुःक्षणवृत्त्यवृत्त्यभावेन कथं जीवात्मन्यपि लक्षणसमन्वय इति चेत्तत्राह—**द्वेषत्वादिकमिति**—चतुःक्षणवृत्ति ईश्वरीयज्ञानम्, रूपादिकम् तत्रावृत्तिर्जातिः द्वेषत्वादिजातिः, तद्वत्त्वम् जीवात्मन इति लक्षणसमन्वयः।

परममहत्त्वस्य तादृशगुणत्वाच्चतुर्थक्षणे द्वित्वादीनामपि नाशाभ्युपगमाद् द्वित्वादीनामपि तथात्वात्तद्वारणाय विशेषेति। त्रिक्षणवृत्तित्वं वा वाच्यम्। इच्छात्वादिकमादायात्मनि लक्षणसमन्वयः।

ननु चतुःक्षणवृत्तिजन्यावृत्ति (वृत्त्यवृत्ति) जातिमद्गुणवत्त्वमेवास्तु किं विशेषपदोपादानेनेति चेदाह—**परमेत्यादि**—अर्थाद् विशेषपदोपदानाभावे चतुःक्षणवृत्तिजन्यम् रूपादिकम्, तत्रावृत्तिर्जातिः परममहत्त्वम्, चतुर्थक्षणे द्वित्वादीनामपि नाशाभ्युपगमाद् द्वित्वादिकम्वा, तद्वन्तो गुणाः परममहत्त्वद्वित्वादयः, तद्वत्त्वस्य च पृथिव्यादावपि वर्तमानतया तत्राप्यतिव्याप्तिस्स्यादतस्तद्वारणाय विशेषपदोपादानम्। तथात्वे हि परममहत्त्वस्य, द्वित्वरूपसंख्यादेश्च विशेषगुणत्वाभावान्नदोषः। **विशेषगुणाश्च—**

रूपं गन्धो रसस्पर्शौ स्नेहः सांसिद्धिको द्रवः।
बुद्ध्यादिभावनान्ताश्च शब्दो वैशेषिका गुणाः॥

इमे बोध्या। लाघवाय त्रिक्षणवृत्तित्वं (= त्रिक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वमिति भावः) वाऽस्तु।

न च तथा स्वीकारे जन्यज्ञानस्यापि त्रिक्षणवृत्तित्वेन ज्ञानत्वस्य तद्वृत्तित्वात् त्रिक्षणवृत्तित्वाभावाभावेन ज्ञानत्वमादायात्मनि लक्षणसमन्वयो न स्यादिति वाच्यम्, इच्छाद्वेषत्वादिकमादाय लक्षणसमन्वयात्। इच्छायाः परमात्मजीवात्मनोरुभयोः सत्त्वादिति भावः॥२७॥

रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः ।
गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः ॥२८॥

प्रथमास्त्रयः—पृथिव्यप्तेजांसि, रूपद्रवत्वप्रत्यक्षयोगिनः रूपद्रवत्व-प्रत्यक्षयोगीनि। द्वे क्षितिजले, रसवती रसयुक्ते, द्वयोः क्षितिजलयोः, नैमित्तिको द्रवः। इति कारिकार्थः ॥

रूपेति। पृथिव्यप्तेजसां रूपवत्त्वं प्रत्यक्षविषयत्वं चेत्यर्थः। न च, चक्षुरादीनां भर्जनकपालस्थवह्नेरौष्ण्यस्य रूपवत्त्वे किं मानमिति वाच्यम्, तत्रापि तेजस्त्वेन रूपानुमानात्। एवं वाय्वानीतपृथिवीजलतेजोभागानामपि पृथवीत्वादिना रूपानुमानं बोध्यम्। न च घटादौ द्रुतसुवर्णादिभिन्ने तेजसि च द्रवत्वमव्याप्तमिति वाच्यम्, द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजाति-मत्त्वस्य विवक्षितत्वात्। घृतजतुप्रभृतिषु, जलेषु, द्रुतसुवर्णादौ च द्रवत्व-सत्त्वात्तत्र च पृथिवीत्वादिसत्त्वात्तदादाय सर्वत्र लक्षणसमन्वयः।

पृथिव्यप्तेजसां रूपवत्त्वं, द्रवत्ववत्त्वं, प्रत्यक्षविषयत्वञ्च साधर्म्यम्।

ननु चक्षुरादीनां भर्जनकपालस्थवह्नेरौष्ण्यस्य च रूपवत्त्वे किम्प्रमाण-मिति चेदनुमानमेवेति गृहाण, तच्चेत्थम्—'चक्षुरिन्द्रियम् रूपवत्, तैजसत्वात्, यत्र यत्र तेजस्तत्र तत्र रूपम्, महानसीयवह्न्यादिवत्। एवं भर्जनकपालस्थवह्नेरौष्ण्यम् रूपवत्, तैजसत्वात्, इत्यादिपूर्वोक्तानुमान-वदिहापि बोध्यम्। एवं वाय्वानीत पृथिवीजलभागेष्वपि वाय्वानीतपृथ्वी-जलतेजोभागाः रूपवन्तः, पृथिवीत्वाद्यन्यतमत्वात्, इत्याद्यनुमानेन रूपानुमानं बोध्यम्।

न च घटादौ द्रुतसुवर्णादिभिन्ने तेजसि च द्रवत्वाभावाद् द्रवत्वस्य साधर्म्यप्रतिपादनमयोग्यमिति वाच्यम्, द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजाति-मत्त्वस्य विवक्षितत्वेन दोषाभावात्। एवञ्च द्रवत्ववन्तो घृतजतुतैलप्रभृतयः, सुवर्णञ्च, तद्वृत्तिः द्रवत्वव्याप्यजातिः पृथिवीत्वम्, तेजस्त्वञ्च तद्वत्वस्य घटादौ

द्रुतसुवर्णादिभिन्ने तेजसि च सत्त्वेन लक्षणसमन्वयः । एतदेव मूलेऽपि स्पष्टीकृतम् ।

न च प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तम्, अतिव्याप्तं च रूपादाविति वाच्यम्, चाक्षुषलौकिकप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् । आत्मन्यतिव्याप्तिवारणाय चाक्षुषेति ।

न च परमाणोः प्रत्यक्षाभावात् पार्थिवजलीयतैजसपरमाणूनां प्रत्यक्षविषयत्वं कथं साधर्म्यं स्यादिति वाच्यम्, परमाणूनामपि ईश्वरयोगिप्रत्यक्षविषयत्वेन दोषाभावात् ।

ननु तथापि रूपादीनां प्रत्यक्षविषयत्वेन तत्त्वं रूपादीनामपि साधर्म्यम् स्यादिति तत्रातिव्याप्तिवारणाय का वाचोयुक्तिरिति चेत्—चाक्षुषप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वेन दोषाभावात् । यतो हि चाक्षुषप्रत्यक्षविषयो घटादिः, तद्वृत्तिः द्रव्यत्वव्याप्यजातिः पृथिवीत्वादिरेव, न रूपत्वादि जातिः, तस्याश्च गुणत्वव्याप्यजातित्वात् ।

ननु प्रत्यक्षविषयेत्यादि एवोच्यताम्, किं चाक्षुषग्रहणेनेति चेन्न, प्रत्यक्षविषय आत्मा, तद्वृत्तिर्द्रव्यत्वव्याप्यजातिः, आत्मत्वम्, तद्वत्त्वस्य आत्मन्यपि सत्त्वेन तत्रातिव्याप्तिवारणाय तस्य चारितार्थ्यात् ।

गुरुणी इति । गुरुत्ववत्त्वं रसवत्त्वं पृथिवीजलयोरित्यर्थः । न च घ्राणेन्द्रियादीनां वाय्वानीतपार्थिवादिभागानां च रसादिमत्त्वे किं मानमिति वाच्यम्, तत्रापि पृथिवीत्वादिना तदनुमानात् ।

गुरुत्ववत्त्वं रसवत्त्वञ्च पृथिवीजलयोः साधर्म्यम् ।

ननु घ्राणेन्द्रियादिषु, वायुसमानीतपार्थिवादिभागेषु च प्रत्यक्षतो रसाद्युपलब्ध्यभावेन तेषां रसादिमत्त्वे किं प्रमाणमिति चेत्, तत्रापि 'घ्राणेन्द्रियम् रसवत्, पार्थिवत्वात्, यत्र यत्र पार्थिवत्वम् तत्र तत्र रसवत्त्वम्, इक्षुवत्', इत्याद्यनुमानेन तदनुमानात् ।

द्वयोरिति । पृथिवीतेजसोरित्यर्थः । न च नैमित्तिकद्रवत्ववत्त्वं घटादौ वह्न्यादौ चाव्याप्तमिति वाच्यम्, नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ।।२८।।

द्वयोरिति । पृथिवीतेजसोः नैमित्तिकद्रवत्ववत्त्वं साधर्म्यम् इति भावः ।

ननु नैमित्तिकद्रवत्ववत्त्वस्य घटादौ वह्न्यादौ चाव्याप्तत्वेन कथं तत्साधर्म्यमिति चेत्, नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षणेनादोषात् तथाहि—नैमित्तिकद्रवत्वम् घृतजतुतैलप्रभृतिषु, द्रुतसुवर्णे च, तद्वृत्तिर्द्रव्यत्वव्याप्यजातिः पृथिवीत्वम्, तेजस्त्वम्, तद्वत्त्वस्य च घटादौ वह्न्यादावपि सत्त्वेन लक्षणसमन्वय इति ध्येयम् ।।२८।।

आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः ।

आत्मान इति । पृथिव्यप्तेजोवाय्वाकाशात्मनां विशेषगुणवत्त्वमित्यर्थः ।

आत्मान इति । आत्मनः जीवात्मनः भूतवर्गाः पृथिव्यप्तेजोवाय्वाकाशाः, विशेषगुणयोगिनः विशेषगुणवन्तः, क्षित्यप्तेजोमरुद्व्योमात्मनाम् विशेषगुणवत्त्वम् साधर्म्यम् ।।

यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत् ।।२९।।

यदुक्तमिति । ज्ञेयत्वादिकं विहायेति बोध्यम् । तत्तु कस्यापि न वैधर्म्यम्, केवलान्वयित्वात् ।।२९।।

अत्र यद्यस्य साधर्म्यमुक्तम्, तदितरस्य अन्यस्य वैधर्म्यम् बोध्यम् ।

ननु '**सप्तानामपि**' इत्यादिना सप्तानाम् पदार्थानाम् ज्ञेयत्वादिकमपि साधर्म्यमुक्तम् तच्च केवलान्वयित्वान्न कस्यापि वैधर्म्यं भवितुमर्हतीत्याशङ्क्याह—**ज्ञेयत्वं विहायेति** ।।२९।।

।। इति साधर्म्यवैधर्म्यनिरूपणम् ।।

स्पर्शादयोऽष्टौ वेगाख्यः संस्कारो मरुतो गुणाः ।
स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः ॥३०॥

स्पर्शादयोऽष्टौ वेगश्च गुरुत्वं च द्रवत्वकम् ।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ॥३१॥

स्नेहहीना गन्धयुताः क्षितावेते चतुर्दश ।
बुद्ध्यादिषट्कं संख्यादि-पञ्चकं भावना तथा ॥३२॥

धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश ।
संख्यादिपञ्चकं कालदिशोः शब्दश्च ते च खे ॥३३॥

संख्यादयः पञ्चबुद्धिरिच्छा यत्नोऽपि चेश्वरे ।
परापरत्वे संख्याद्याः पञ्चवेगश्च मानसे ॥३४॥

स्पर्शादय इति । ते च खे आकाशे ॥३०॥३१॥३२॥३३॥३४॥

आसु कारिकासु सर्वपदार्थानां गुणाः पृथङ्निर्दिष्टाः ॥ [द्र० परिशिष्टम्]

साधर्म्यवैधर्म्ये निरूप्य संप्रति प्रत्येकं पृथिव्यादिकं निरूपयति—

तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता ।
षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः ॥३५॥

साधर्म्यवैधर्म्ये निरूप्य प्रत्येकं पृथिव्यादिकं निरुरूपयिषुः पृथिवीम् पूर्वं निरूपयति—**तत्रेति** ।

तत्र पृथिव्यादिषु नवसु क्षितिः गन्धहेतुः, नानारूपवती विविधरूपिणी, मता अभिमता । तत्र पृथिव्याम् रसस्तु षड्विधः गन्धस्तु द्विविधः **मत** इत्येवं स्पष्ट एव कारिकार्थः ।

तत्रक्षितिरित्यादिना । गन्धत्वहेतुरिति । गन्धसमवायिकारणमित्यर्थः । यद्यपि गन्धवत्त्वमात्रं लक्षणमुचितं तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तम् । तथा हि—पृथिवीत्वं हि गन्धसमवायिकारणतावच्छेदकतया सिद्धयति । अन्यथा गन्धत्वावच्छिन्नस्याकास्मिकत्वापत्तेः ।

क्षितिः गन्धहेतुरित्युक्तम्, तन्न योग्यम्, कालादेरपि गन्धहेतुतया तत्रातिव्याप्तेरित्याशयेनाह—**गन्धेति** ।

ननु गन्धवत्त्वं पृथिवीत्वमिति कथनेनैव पृथिवीत्वे सिद्धे कारणत्वोपन्यासो व्यर्थ इत्याशङ्क्याह—**पृथिवीत्वेति** ।

ननु पृथिवीत्वजातौ किं प्रमाणम् ? इयं पृथिवीत्यनुगतप्रतीतौ प्रत्यक्षमेवप्रमाणमिति चेन्न, घृतपुष्पप्रभृतिषु द्रव्यत्वाग्रहात् । अतश्च किमप्यसाधारणलक्षणमवश्यं पृथिव्या अभ्युपगन्तव्यमित्यत आह—**पृथिवीत्वं हीति** । अयं भावः—समवायसंबन्धेन गन्धत्वावच्छिन्नं प्रति तादात्म्येन पृथिवी कारणम्, सा च कारणता किञ्चिद्धर्मावच्छिन्नैवेति, स धर्म एव पृथिवीत्वरूपा जातिः । अनुमानप्रयोगश्चेत्थम्—समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नगन्धनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्ना या कारणता, अवश्यमेव किञ्चिद्धर्मावच्छिन्ना, कारणतात्वात् इत्यादि पूर्ववत् ।

ननु किमर्थमयं कार्यकारणभावोऽभ्युपगम्यते इति चेन्न, गन्धं प्रति पृथिव्याः कारणतास्वीकारे कारणं विनैव गन्धरूपकार्योत्पत्तिप्रसंगः स्यात् ।

न च पाषाणादौ गन्धाभावाद् गन्धवत्त्वमव्याप्तमिति वाच्यम्, तत्रापि गन्धसत्त्वात् । अनुपलब्धिस्त्वनुत्कटत्वेनाप्युपपद्यते । कथमन्यथा तद्भस्मनि गन्ध उपलभ्यते । भस्मनो हि पाषाणध्वंसजन्यत्वात्पाषाणोपादानोपादेयत्वं सिद्धयति । यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत् तदुपदानोपादेयमिति व्याप्तेः । दृष्टं चैतत् खण्डपटे महापटध्वंसजन्ये । इत्थं च पाषाणपरमाणोः पृथिवीत्वात्तज्जन्यस्य पाषाणस्यापि पृथिवीत्वं, तथा च तस्यापि गन्धवत्त्वे बाधकाभावः ।

ननु गन्धवत्त्वं पृथिव्या लक्षणमिति स्वीकारे पाषाणे गन्धाभावात्तत्र पृथिवीत्वं न स्यादिति चेन्न, तत्रापि गन्धस्य वर्तमानत्वात् । तत्र गन्धसत्त्वे कथं न तदुपलब्धिरिति चेत्, अनुत्कटत्वेनेति गृहाण, प्रत्यक्षं प्रति उद्भूतवत्त्वस्य कारणतया पाषाणे उद्भूतगन्धवत्त्वाभावान्नोपलब्धिरिति भावः ।

ननु पाषाणस्य गन्धवत्त्वे किं प्रमाणमिति चेत्, अनुमानमेवेति जानीहि । तच्चेत्थम् —'पाषाणो गन्धवान्, पृथिवीत्वात् पुष्पवत् । पाषाणस्य पार्थिवत्वे किं प्रमाणमित्याशङ्क्यते चेत्, 'पाषाणं पार्थिवम्, पृथिवीजन्यत्वे सति, द्रव्यत्वात्, घटवत् । एवं पाषाणपरमाणूनां पार्थिवत्वे—'पाषाणपरमाणुः पार्थिवः, पृथिवीसमवेतत्वात्, कपालवत्' इत्यनुमानम् । भस्मनः पाषाणावयवारब्धत्वे च 'पाषाणभस्म पाषाणसमवायिकारणसमवायिकारणकम्, पाषाणध्वंसजन्यत्वात्, यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत् तदुपादानोपादानोपादेयमिति व्याप्त्या महापटध्वंसजन्यखण्डपटवत्', इत्याद्यनुमानेन पाषाणपरमाणौ, पाषाणे च पृथिवीत्वे सिद्धे पूर्वोक्तानुमानेन गन्धवत्त्वेऽपि न किमपि बाधकम् । एतदेवोक्तं—**भस्मनो हीत्यादिना** ।

नानारूपेति । शुक्लनीलादिभेदेन नानाजातीयं रूपं पृथिव्यामेव वर्तते न तु जलादौ, तत्र शुक्लस्यैव सत्त्वात् । पृथिव्यां तु एकस्मिन्नपि धर्मिणि पाकवशेन नानारूपसंभवात् । न च यत्र नानारूपं नोत्पन्नं तत्राव्याप्तिरिति वाच्यम्, रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्, रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य वा वाच्यत्वात् । वैशेषिकनये पृथिवीपरमाणौ रूपनाशस्य रूपान्तरस्य च सत्त्वान्न्यायनये घटादावपि तत्सत्त्वाल्लक्षणसमन्वयः ।

रूपद्वयेति—रूपद्वयवान् पुष्पादिः, तद्वृत्तिः पृथिवीत्वव्याप्या जातिः पृथिवीत्वम्, तद्वत्त्वं घटपटाविति लक्षणसमन्वयः । द्वित्वस्यापेक्षाबुद्धिविशेषविषयत्वेन, अपेक्षाबुद्धीनाञ्च नानात्वेन तद्घटितलक्षणे गौरवमिति लाघवायाह—**रूपनाशेति** । यतो हि वैशेषिकाः पृथिवीपरमाणौ रूपनाशम्,

रूपान्तरोत्पत्तिञ्च स्वीकुर्वन्ति, अपरञ्च नैयायिकानाम् मतेऽग्निप्रक्षिप्त-घटस्य परमाणवः पृथग्भवन्ति, पुनरपि च परिपक्वतामेत्य तेजः-संयोगेन संयुक्ताः परमाणवो घटरूपतामापद्यन्ते, एवं च वैशेषिकनये पृथिवीपरमाणौ रूपनाशस्य, रूपान्तरस्य च सत्त्वात्, न्यायनये घटादावपि च तयोः सत्त्वेन, रूपनाशवान् पृथिवीपरमाणुः, तद्वृत्तिः द्रव्यत्वव्याप्या जातिः पृथिवीत्वम्, तद्वत्त्वस्य घटपटादावपि सत्त्वेन लक्षणसमन्वयः।

षड्विध इति। मधुरादिभेदेन यः षड्विधो रसः स पृथिव्यामेव। जले मधुर एव रसः। अत्रापि पूर्ववद् रसद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणार्थोऽवसेयः। गन्धस्त्विति। द्विविध इति वस्तुस्थितिमात्रं न तु द्विविधगन्धवत्त्वं लक्षणं, द्विविधत्वस्य व्यर्थत्वात्। द्वैविध्यं च सौरभासौरभ-भेदेन बोध्यम्।

षड्विधि इति। मधुराम्ललवणादिभेदेन यः षड्विधो रसः स पृथिव्यामेव नान्यत्रेति भावः।

नन्वाद्यक्षणोत्पन्नं द्रव्यमगुणं निष्क्रियञ्च तिष्ठति, अतो यत्र कोऽपि रसो नोत्पन्नस्तत्राव्याप्तिः स्यादित्यत आह—**रसद्वयवदिति**। रसद्वयवत् आम्रादिफलम्, तद्वृत्तिर्द्रव्यत्वव्याप्या जातिः पृथिवीत्वम् तद्वत्त्वञ्च शर्करादौ इति लक्षणसमन्वयः। यदि च पूर्ववद् द्वित्वस्यापेक्षाबुद्धिविषयत्वेन, अपेक्षा-बुद्धीनाञ्च नानात्वेन लक्षणेऽस्मिन् गौरवमुद्भाव्यते तदा रसनाशवद्वृत्तीत्यादि पूर्ववदेवावसेयम्।

गन्धस्त्विति। ननु गन्धस्य पृथिव्यामेव वर्तमानतया गन्धवत्त्वमात्रस्यैव लक्षणत्वे युक्ते द्विविधगन्धवत्त्वम् व्यर्थम् इत्यत आह—**वस्तुस्थितिमात्रमिति**। अर्थान्नहि द्विविधगन्धवत्त्वं लक्षणम्, न वा पृथिवीलक्षणे तत्सन्निवेशः, किन्तु सौरभासौरभभेदेन तत्र गन्धस्य द्वैविध्यमिति तात्पर्यम् ॥३५॥

स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः ॥

स्पर्श इति। तस्याः पृथिव्याः। अनुष्णाशीतस्पर्शवत्त्वम् वायोरपि-वर्तते इत्युक्तं पाकज इति। इत्थं च पृथिव्याः स्पर्शोऽनुष्णाशीत इति

ज्ञापनार्थं तदुक्तम्। वस्तुतस्तु पाकजस्पर्शवत्त्वमात्रं लक्षणम् अधिकस्य वैयर्थ्यात्। यद्यपि पाकजस्पर्शः पटादौ नास्ति तथापि पाकजस्पर्शवद्वृत्ति-द्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः।

स्पर्श इति। हि तस्याः पृथिव्याः स्पर्शः तु अनुष्णाशीतपाकजः विज्ञेयः।

नन्वनुष्णाशीत इत्येवोच्यताम् किं पाकज इति ग्रहणेनेति चेन्न, अनुष्णा-शीतस्पर्शस्य वायोरपि सत्त्वेन तत्रातिव्याप्तेः। वस्तुस्तु पाकजस्पर्शवत्त्वमात्रं लक्षणमुचितम् अनुष्णाशीतपदोपादानम् व्यर्थम्। न च तन्मात्रेऽनुष्णाशीत-स्पर्शस्य पटादावभावादव्याप्तिः स्यादिति वाच्यम्, पाकजस्पर्शवद्वृत्तिद्रव्यत्व-व्याप्यजातिमत्त्वस्य विवक्षितत्त्वात्। पाकजस्पर्शः घटादौ, तद्वृत्तिः द्रव्यत्व-व्याप्यजातिः पृथिवीत्वम्, तद्वत्त्वस्य पटादावपि सत्त्वेन लक्षणसमन्वयो बोध्यः।

नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा ।।३६।।
अनित्या तु तदन्यास्यात्सैवावयवयोगिनी ।।
सा च त्रिधा भवेद्देहमिन्द्रियं विषयस्तथा ।।३७।।

नित्यानित्येति। सा (पृथिवी) द्वेधा; नित्या, अनित्या च। नित्या अणुलक्षणा, तदन्या तु अनित्या। सा एव (अनित्या) अवयवयोगिनी अवयव-वती। सा (अनित्या पृथिवी) देहम्, इन्द्रियम् तथा विषयः, (इत्थम्) त्रिधा भवेत्। इति कारिकार्थः।

नित्येति। सा पृथिवी द्विविधा नित्या अनित्या चेत्यर्थः। अणु-लक्षणा परमाणुरूपा पृथिवी नित्या। तदन्या परमाणुभिन्ना पृथिवी द्व्यणुकादिरूपा सर्वाप्यनित्येत्यर्थः। सैवानित्या पृथिव्येवावयवतीत्यर्थः। ननु अवयविनि किं मानं परमाणु पुञ्जैरेवोपपत्तेः।

ननु अवयवास्तत्रावयविनोऽवश्यंभावनियमादवयवैरेवावयवि सम्भवे तद्भिन्नोऽवयवी घटादिः किमर्थं स्वीक्रियते इति बौद्ध आशङ्कते—

नन्विति । 'अयं घटः' 'अयं पटः' इति प्रतीतिस्तु परमाणुसमूहैरेव भविष्यतीति तदतिरिक्तः पृथगवयवी नाभ्युपगन्तव्य इति भावः ।

न च परमाणूनामतीन्द्रियत्वाद् घटादेः प्रत्यक्षं न स्यादिति वाच्यम्, एकस्य परमाणोरप्रयक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वात् । यथैकस्य केशस्य दूरेऽप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वम् । न चैको घटः स्थूल इति बुद्धेरनुपपत्तिरितिवाच्यम्, एको महान् धान्यराशिरितिवदुपपत्तेः ।

न च प्रत्यक्षं प्रति महत्त्वस्य कारणत्वात्, परमाणूनाञ्चातीन्द्रियत्वाद् घटादीनामपि प्रत्यक्षं न स्यादिति वाच्यम्, दूरस्थैककेशस्याप्रत्यक्षत्वेऽपि तत्समूहप्रत्यक्षवत्परमाणुसमूहस्यापि प्रत्यक्षे बाधकाभावात् ।

ननु परमाणुपुञ्जैरुपपत्तिस्वीकारे परमाणूनामतिसूक्ष्मत्वात् सूक्ष्मास्थूलोत्पत्त्यसम्भवात् तत्र परमाणुबहुत्वाच्च, 'एकः स्थूलो घटः' इति बुद्धेरनुपपत्तिरिति चेन्न (यत्र बहुत्वं तत्रैकत्वस्य यत्र सूक्ष्मत्वम् तत्र स्थूलस्य वक्तुमशक्यत्वादिति भावः), "एको महान् धान्यराशिः" इत्यादौ समूहगतैकत्वमहत्त्वे समादाय तथा प्रतीतिवदिहापि समूहगतैकत्वमहत्त्वाभ्यां तथा प्रतीतौ बाधकाभावात् ।

मैवम् । परमाणोरतीन्द्रियत्वेन तत्समूहस्यापि प्रत्यक्षायोग्यत्वात् । दूरस्थकेशस्तु नातीन्द्रियः, सन्निधाने तस्यैव प्रत्यक्षत्वात् । न च तदानीं दृश्यपरमाणुपुञ्जस्योत्पन्नत्वान्न प्रत्यक्षत्वेऽपि विरोध इति वाच्यम्, अदृश्यस्य दृश्यत्वानुपादानत्वात् । अन्यथा चक्षुरुष्मादिसंततेः कदाचिद्दृश्यत्वप्रसङ्गात् । न चातितप्ततैलादौ कथमदृश्यदहनसंततेर्दृश्यदहनोत्पत्तिरिति वाच्यम्, तत्र तदन्तःपातिभिर्दृश्यदहनावयवैः स्थूलदहनोत्पत्तेरुपगमात् ।

तन्न । परमाणुरतीन्द्रियः अतस्तत्समूहस्यापि प्रत्यक्षायोग्यत्वम् । दूरस्थकेशस्त्वतीन्द्रियो न, यतो हि समीपवर्तिनस्तस्य सुतरां भवति प्रत्यक्षम्,

परमाणोस्तु समीपवर्तिनोऽपि नतरां प्रत्यक्षत्वम्, नतमां दूरस्थस्येति सोऽतीन्द्रियः।

नन्वदृश्यपरमाणुपुञ्जाद् घटोत्पत्तिकाले दृश्यपरमाणुपुञ्जः समुत्पद्यते इति तत्प्रत्यक्षे न किमपि बाधकमिति चेन्न, यद्धि अदृश्यं वस्तु तादृशस्योपादानकारणं कदापि न भवितुमर्हतीति तथा वक्तुमशक्यत्वात्। तदेव प्रमाणेन द्रढिमयति—**अन्यथेति।**

न चादृश्येन द्व्यणुकेन कथं दृश्यत्रसरेणोरुत्पत्तिरिति वाच्यम्। यतो न दृश्यत्वमदृश्यत्वं वा कस्यचित्स्वभावादाचक्ष्महे। किन्तु महत्त्वोद्भूतरूपादिकारणसमुदायवतो दृश्यत्वं तदभावे चादृश्यत्वम्। तथा च त्रसरेणोर्महत्त्वात् प्रत्यक्षत्वं, न तु द्व्यणुकादेस्तदभावात्। न हि त्वन्मतेऽपि संभवतीदं परमाणौ महत्त्वाभावात्। इत्थं चावयविसिद्धौ, तेषामुत्पादविनाशयोः प्रत्यक्षसिद्धत्वादनित्यत्वम्। तेषां चावयवावयवधाराया अनन्तत्वे मेरुसर्षपयोरिव साम्यप्रसङ्गः। अतः क्वचिद्विश्रामो वाच्यः। यत्र तु विश्रामस्तस्यानित्यत्वेऽसमवेतकार्योत्पत्तिप्रसङ्गात्तस्य नित्यत्वम्।

ननु यदि अदृश्यं दृश्यस्योपादानकारणं न भवति तदा अदृश्यद्व्यणुकेन कथं दृश्यत्रसरेणोत्पत्तिरित्यत आह—**यतो नेति।** यत्र महत्त्वम्, उद्भूतरूपवत्त्वञ्चास्ति तत्र दृश्यत्वम् निर्बाधमेव, अतस्त्रसरेणौ तदारब्धघटादौ च महत्त्वस्योद्भूतरूपवत्त्वस्य च सत्त्वेन प्रत्यक्षत्वम्। द्व्यणुकादौ तु तदभाव इति न प्रत्यक्षत्वमिति भावः। यदि च त्वन्मते परमाणुपुञ्जैरेव घटाद्युत्पत्तिः स्वीक्रियेत तदा परमाणौ महत्त्वाभावात् स्पष्टमेव तदप्रत्यक्षत्वम्। इत्थञ्चावयविसिद्धिर्जाता, किन्तु अवयविनः उत्पादविनाशशालिनो भवन्ति, अतः प्रत्यक्षतो दर्शननेन अवयविनामनित्यत्वम्। किन्तु यदि अवयविनाम् (त्रसरेण्वादीनाम्) अवयवधारायाः अनित्यत्वं स्वीकृतं स्यात्तदा अवयवानन्त्यस्य सर्वावयविषु तुल्यतया मेरुसर्षपयोरपि साम्यं प्रसज्येत, अतः क्वचिद्विश्रान्तिर्योग्या। यत्र तु विश्रान्तिः यदि तस्याप्यनित्वं कल्प्येत तदा ततोऽग्रेऽवयवान्तरास्वीकारात्तस्य स्वस्मिन्नेवोत्पत्तौ समवायिकारणं विनैव भावकार्यमुत्पन्नं स्यादिति भावकार्यमात्रं प्रति अवश्यमेव कस्यचित्

समवायिकारणत्वमिति नियमो व्याहन्येत। अतःकारणाद् यत्र विश्रान्तिः तस्य नित्यत्वमभ्युपगभ्यते।

महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिवाणुपरिमाणतारतम्यस्यापि क्वचिदविश्रान्तत्वमस्तीति तस्य परमाणुत्वसिद्धिः। न च त्रसरेणावेव विश्रामोऽस्त्विति वाच्यम्, त्रसरेणुः सावयवः, चाक्षुषद्रव्यत्वात्, घटवदित्यनुमानेन तदवयवसिद्धौ, त्रसरेणोरवयवाः सावयवाः महदारम्भकत्वात्, कपालवदित्यनुमानेन तदवयवसिद्धेः। न चेदमप्रयोजकम्, अपकृष्टमहत्त्वं प्रत्यनेकद्रव्यत्वस्य प्रयोजकत्वात्। न चैवं क्रमेण तदवयवधारापि सिद्धयेदिति वाच्यम्, अनवस्थाभयेन तदसिद्धेरिति सा चेति। सा कार्यरूपा पृथिवी त्रिधेत्यर्थः। शरीरेन्द्रियविषयभेदादित्यर्थः ।।३६।।३७।।

ननु तर्हि क्व विश्रान्तिरित्यत आह—**महत्परिमाणेति**। अयं भावः—परमाणूनां नित्यत्वान्नैयायिकानां मते प्रलयेऽपि परमाणवस्तिष्ठन्ति, पुनरपि तेभ्यश्च सृष्टिर्जायते, यदि च त्रसरेणावेव विश्रान्तिस्स्यात्तदा तस्य मूलोक्तानुमानेनानित्यत्वात्प्रलये नाशापत्तौ बीजप्रयोजनाभावात् कस्यचित्कार्यस्यानुत्पत्तौ सृष्टिर्न जायेत। अतः परमाणावेव विश्रान्तिमभ्युपगत्य तस्य नित्यत्वमभ्युपेयते। **न चेदमिति**। अर्थात् महदारम्भकत्वमस्तु सावयवत्वं मास्तु इत्याकारिका यदि व्यभिचारशंका जायेत तदा कोऽप्यनुकूलस्तर्कोनास्तीति चेन्न, अपकृष्टमहत्त्वं प्रति (पृथिव्यादिचतुष्टयमहत्त्वं प्रति) अनेकद्रव्यत्वस्य कारणत्वम्, त्रिभिस्सक्रियैरणुभिस्त्रसरेणोरुत्पत्तिरिति स्वीकारात्। अतो यावत् त्रसरेणौ अनेकद्रव्यत्वं न स्यात् तावत्कारणं बिना कार्योत्पत्तेरसम्भवान्महदारम्भकत्वमपि न स्यात् ।।३६।।३७।।

तत्र देहमुदाहरति

योनिजादि भवेद्देहमिन्द्रियं घ्राणलक्षणम्।
विषयो द्व्यणुकादिश्च ब्रह्माण्डान्त उदाहृतः ।।३८।।

योनिजादीति—योनिजादिर्देहं भवेत्, घ्राणलक्षणमिन्द्रियम् (भवेत्), च=तथा द्व्यणुकादिः ब्रह्मांण्डान्तः विषयः मतः। इति कारिकार्थः।

योनिजादीति । योनिजमयोनिजं चेत्यर्थः । योनिजमपि द्विविधं, जरायुजमण्डजं च । जरायुजं मानुषादीनाम् । अण्डजं सर्पादीनाम् । अयोनिजं स्वेदजं द्भिज्जादीनाम् । स्वेदजाः कृमिदंशाद्याः । उद्भिज्जास्तरुगुल्माद्याः । नारकिणां शरीरमप्ययोनिजम् ।

योनिजादीति । योनिजादीत्यत्र आदिशब्देन अयोनिजादीनां ग्रहणम् । योनिजम् द्विविधम् जरायुजमण्डजञ्चेति, तत्र 'गर्भाशयो जरायुः स्यादिति'कोशाज्जरायुशब्देन गर्भाशयस्य बोधात्, तस्माज्जातमिति विग्रहे जरायुजेन मानुषादिशरीराणां ग्रहणम् । अण्डाज्जातमिति विग्रहेऽण्डजेन सर्पादीनां ग्रहणमिति विवेकः । एवमेव अयोनिजशरीरस्यापि स्वेदजोद्भिज्जादित्वेनानेकविधत्वे, स्वेदाज्जाता इति विग्रहे स्वेदजाः कृमिदंशयूकालिक्षाद्याः, उद्भिद्य जाता उद्भिज्जास्तरुगुल्माद्याः बोध्याः । नारकिणाम् प्रेतपिशाचादीनामपि शरीरम् अयोनिजमेव ।

न च मानुषादिशरीराणां पार्थिवत्वे किं मानमिति वाच्यम्, गन्धादिमत्त्वस्यैव प्रमाणत्वात् ।

न च क्लेदोष्मादेरुपलम्भादाप्यत्वादिकमपि स्यादिति वाच्यम्, तथा सति जलत्वपृथिवीत्वादिना संकरप्रसङ्गात् । न च तर्हि जलीयत्वादिकमेवास्तु न तु पार्थिवत्वमिति वाच्यम्, क्लेदादीनां विनाशेऽपि शरीरत्वेन प्रत्यभिज्ञानाद् गन्धाद्युपलब्धेश्च पृथिवीत्वसिद्धेः । तेन पार्थिवादिशरीरे जलादीनां निमित्तत्वमात्रं बोध्यम् ।

ननु जरायुजं मानुषादीनामित्यनेन मानुषादिशरीराणां पार्थिवत्वमुक्तम्, तत्र किं प्रमाणमिति चेदाह—**गन्धादीति** । 'मानुषादिशरीरम् पार्थिवम्, गन्धादिमत्त्वात् पुष्पादिवत्' इत्यनुमानेन तत्र पार्थिवत्वं साधनीयमिति भावः ।

ननु क्लेदादीनामपि तत्र वर्तमानतया जलीयत्वादिकमपि कथं नेति चेन्न, तथा सति जलत्वपृथिवीत्वादिना सङ्करप्रङ्गात् । तथाहि—जलीयत्वात्यन्ताभावसमानाधिकरणपृथिवीत्वं घटादौ, पृथिवीत्वात्यन्ताभावसमानाधि-

करणजलत्वञ्च शुद्धजले, अस्मदादि शरीरे चोभयोः सत्त्वेन सङ्करत्वमिति तथा स्वीकारे जलत्वादिजातिसिद्धावपि प्रलयापत्तिरेव स्यादतो न जलत्वादिकमपि, किन्तु पार्थिवत्वमेव ।

ननु यदि शरीरे पार्थिवजलीयत्वादीनां प्रत्यभिज्ञानं भवति, किन्तु सङ्करदोषभिया पार्थिवत्वमेव स्वक्रियते न जलीयत्वादिकम्, तदा विनिगमनाविरहेण जलीयत्वादिकमेवास्तु न पार्थिवत्वमिति चेन्न, मृतशरीरादौ क्लेदादीनां विनाशेऽपि गन्धाद्युपलब्धेः, शरीरत्वेन प्रत्यभिज्ञानाच्च पृथिवीत्वसिद्धेः । अतः पार्थिवादिशरीरे जलादीनां निमित्तत्वमात्रमिति सिद्धम् ।

शरीरत्वं तु न जाति । पृथिवीत्वादिना साङ्कर्यात् । किन्तु चेष्टाश्रयत्वम् । वृक्षादीनां चेष्टासत्त्वान्नाव्याप्तिः ।

न च वृक्षादेः शरीरत्वे किं मानमिति वाच्यम्, आध्यात्मिकवायुसम्बन्धस्य प्रमाणत्वात् । तत्रैव किं मानमिति चेद्, भग्नक्षतसंरोहणादिना तदनुमानात् ।

ननु शरीरत्वं किं नामेत्यत आह—**शरीत्वमिति** । पृथिवीत्वाभाववति जलीयवायवीयादिशरीरे शरीरत्वम् । शरीरत्वाभाववति पटादौ च पृथिवीत्वम्, अस्मदादिशरीरे चोभयोः सत्त्वेन साङ्कर्याच्छरीरत्वं न जातिरिति भावः । किं तर्हि शरीरत्वमिति चेत्—'चेष्टाश्रयत्वम्' ।

नन्वेतल्लक्षणे वृक्षादिषु चेष्टाभावाच्छरीरत्वं न स्यादिति चेन्न, तत्र चेष्टायाः करचरणाद्यनुकूलव्यापाररूपायाः प्रत्यक्षतोऽदर्शनेऽपि आध्यात्मिकवायुसम्बन्धेनानुमानप्रमाणात् सिद्धेः । अनुमानस्वरूपं तु—वृक्षादिः आध्यात्मिकवायुसम्बन्धवान्, भग्नक्षतसंरोहणवत्त्वात्, अस्मदादिशरीरवत्, इत्थं बोध्यम् । वृक्षादीनां शरीरत्वे आगमोऽपि प्रमाणम् ।

स च— 'शरीरजैः कर्मदोषैर्याति स्थावरतां नरः ।'

तथा— 'गुरुं त्वं-कृत्य हुंकृत्य, विप्रं निर्जित्य वादतः ।
श्मशाने जायते वृक्षः, काकगृद्धनिषेवितः ।'।१।।

नर्मदातीरसम्भूताः, सरलार्जुनपादपाः ।
नर्मदातोयसंस्पर्शात्ते यान्ति परमां गतिम् ।।२।।

इत्थं बोध्यः ।

यदि हस्तादौ शरीरव्यवहारो न भवति तदान्त्यावयवित्वेन विशेषणीयम् । न च यत्र शरीरे चेष्टा न जाता तत्राव्याप्तिरिति वाच्यम्, तादृशे प्रमाणाभावात् ।

ननु चेष्टाश्रयत्वं शरीरत्वमिति शरीरत्वलक्षणे हस्तादावपि चेष्टासत्त्वेन शरीरत्वं स्यात्, केवलहस्तादौ च न केनापि शरीरत्वव्यवहृतिः क्रियते इत्यत आह—**अन्त्येति** । अन्त्यावयविसत्त्वे सति चेष्टाश्रयत्वं शरीरत्वमिति लक्षणस्वरूपमभ्युपगन्तव्यमिति भावः । अन्त्यावयवित्वञ्च, द्रव्यसमवायित्वे सति द्रव्यसमवेतत्वम्, यथा—शरीरम्, घट इत्यादि ।

ननु पूर्वोक्तलक्षणे चेष्टाभाववति शरीरत्वाव्याप्तिरिति चेत्, न । तथाभूतस्य शरीरस्यैवाभावात् ।

अथवा चेष्टावदन्त्यावयवित्तिद्रव्यत्वव्याप्यजातिमत्त्वम्, अन्त्यावयविमात्रवृत्तिचेष्टावद्वृत्तिजातिमत्त्वम् वा तत् । मानुषत्व-चैत्रत्वादि जातिमादाय लक्षणसमन्वयः ।

यदि च मृतशरीरे तत्सम्भव उच्यते तदा, 'चेष्टावदन्त्यावयवित्तिद्रव्यत्वजातिमत्त्वमिति' लक्षणं स्वीकर्तव्यम् । तथा च चेष्टावदन्त्यावयवित्वम् जीवितशरीरे, तद्वृत्तिः द्रव्यत्वव्याप्यजातिः पृथिवीत्वम्, तद्वत्त्वस्य मृतशरीरेऽपि सत्त्वेनादोषः ।

नन्वेवञ्चेष्टावदन्त्यावयवित्ति-द्रव्यत्वव्याप्यजातिमत्त्वस्य घटादावपि सत्त्वेन तत्रापि शरीरत्वं स्यादिति लक्षणान्तरमाह—**अन्त्येति** । इत्थञ्च अन्त्यावयविमात्रवृत्तिचेष्टावद्वृत्तिजातिः मनुष्यत्वचैत्रत्वादिजातिः, तामादाय सर्वत्र लक्षणसमन्वयः । पृथिवीत्वजातेरन्त्यावयविमात्रवृत्तित्वाभावाद् घटादौ चादोषः ।

ननु चैत्रत्वस्यैकव्यक्तिवृत्तितया तत्र जातित्वाभावात्, कथं तदादाय लक्षणसमन्वयः क्रियते इति चेन्न, बालवृद्धाद्युपचयापचयभेदेनैकस्यापि शरीरस्य नानात्वात् ।

न च नृसिंहशरीरे कथं लक्षणसमन्वयः, तत्र नृसिंहत्वस्यैकव्यक्तिवृत्तितया जातित्वाभावाज्जलीयतैजसशरीरवृत्तितया देवत्वस्यापि जातित्वाभावादिति वाच्यम्, कल्पभेदेन नृसिंहशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयः ।

नन्वेवमपि नृसिंहशरीरे उपचयापचयाभावान्नानात्वासम्भवेन, नृसिंहत्वस्यैकव्यक्तिवृत्तितया जातित्वासम्भवेनोक्तलक्षणप्रवृत्तौ शरीत्वं न स्यात्, यदि च मानुषादिवत् देवत्वजातिमादाय लक्षणसमन्वयः क्रियते तदा तस्याप्यसम्भव एव, देवत्वस्य सङ्करत्वेन जातित्वासम्भवात् । साङ्कर्यञ्च तत्रेत्थम्, देवत्वात्यन्ताभावः स्वर्णे, तत्र तेजस्त्वम्; तेजस्त्वात्यन्ताभावो वरुणशरीरे, तत्र देवत्वम्; उभयोः समावेशः सूर्ये, अतो देवत्वस्य जातित्वाभावः स्पष्ट एवेति तस्योपाधित्वमेव । अतः कथं नृसिंहशरीरे लक्षणसमन्वयः इति चेत्, न । कल्पभेदेन नृसिंहशरीरस्यापि नानात्वेनोपचयापचयि-चैत्रादिशरीरवत्तत्रापि नृसिंहत्वजात्या लक्षणसमन्वये दोषाभावात् ।

इन्द्रियमिति । घ्राणेन्द्रियं पार्थिवमित्यर्थः । पार्थिवत्वं कथमितिचेदित्थम् । घ्राणेन्द्रियं पार्थिवं, रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात्, कुङ्कुमगन्धाभिव्यञ्जकगोघृतवत् । न च दृष्टान्ते स्वकीयरूपादिव्यञ्जकत्वादसिद्धिरिति वाच्यम्, परकीयरूपाद्यव्यञ्जकत्वस्य तदर्थत्वात् । न च नवशरावगन्धव्यञ्जकजलेऽनैकान्तिकत्वमिति वाच्यम्, तस्य सवतुरसाभिव्यञ्जकत्वात् ।

इन्द्रियमिति—घ्राणेन्द्रियं पार्थिवम्, रूपाद्यव्यञ्जकत्वे सति गन्धस्यैव व्यञ्जकत्वात् । कुंकुमगन्धाभिव्यञ्जकगोघृतवत् । न च गोघृतरूपदृष्टान्तस्य स्वीयरूपव्यञ्जकत्वात् असिद्धिः स्यादिति वाच्यम्, रूपाद्यव्यञ्जकत्वे सतीत्यस्य

परकीयरूपाद्यव्यञ्जकत्वार्थवत्त्वात्। तेन 'घ्राणेन्द्रियम् पार्थिवम्, परकीयरूपाद्यव्यञ्जकत्वे सति गन्धस्यैव व्यञ्जकत्वात्' इत्थम् अनुमानप्रयोगो ज्ञेयः।

न च नवशरावगन्धव्यञ्जकजलेऽनैकान्तिक-हेत्वाभासः स्यात्, स चेत्थम् साध्यम् पार्थिवत्वम् तदभावः पार्थिवत्वाभावः तद्वत् जलम् तद्वृत्तित्वमेव गन्धव्यञ्जकत्वरूपहेतोरिति वाच्यम्, तस्य सक्तुरसव्यञ्जकत्वात्।

यद्वा परकीयेति न देयं, वायूपनीतसुरभिभागस्य दृष्टान्तत्वसंभवात्। न च घ्राणेन्द्रियसन्निकर्षस्य गन्धमात्रव्यञ्जकत्वात् व्यभिचार इति वाच्यम्, द्रव्यत्वे सतीति विशेषणात्।

विषय इति। उपभोगसाधनं विषयः। सर्वमेव हि कार्यजातमदृष्टाधीनम्। यत्कार्यं यददृष्टाधीनं तत्तदुपभोगं साक्षात् परम्परया वा जनयत्येव। न हि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति। तेन द्व्यणुकादिब्रह्माण्डान्तं सर्वमेव विषयो भवति। शरीरेन्द्रिययोर्विषयत्वेऽपि प्रकारान्तरोपन्यासः शिष्यबुद्धिवैशद्यार्थः ॥३८॥

लाघवातिशयेनाह—यद्वेति। पूर्वोक्तानुमाने परकीयघटित-सत्यन्तमपहाय 'घ्राणेन्द्रियं पार्थिवम्, रूपाद्यव्यञ्जकत्वे सति गन्धस्यैव व्यञ्जकत्वात्, वायूपनीत-सुरभिभागवत्' इत्थमनुमानप्रयोगो विधेय इति भावः।

न च घ्राणेन्द्रियसन्निकर्षस्य गन्धमात्रव्यञ्जकत्वात् तत्रापि लक्षणमतिव्याप्नुयादिति वाच्यम्। 'घ्राणेन्द्रियं पार्थिवम् द्रव्यत्वे सति रूपाद्यव्यञ्जकत्वे सति गन्धस्यैव व्यञ्जकत्वात्' इत्थमनुमानस्वरूपे सन्निकर्षस्य द्रव्यत्वाभावेन दोषाभावात्।

॥ इति पृथिवी-निरूपणम् ॥

जलं निरूपयति—

वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ।
स्नेहस्तत्र, द्रवत्वं तु सांसिद्धिकमुदाहृतम् ॥३९॥

वर्णः शुक्ल इति । स्नेहसमवायिकारणतावच्छेदकतया जलत्वजातिः सिद्ध्यति । यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया न कार्यतावच्छेदकं तथापि जन्य-स्नेहत्वं तथा बोध्यम् ।

वर्ण इति । जले शुक्लः वर्णः, रसस्पर्शौ च मधुरशीतलौ स्तः । तत्र जले द्रवत्वं तु स्नेहः (तच्च) सांसिद्धिकम् उदाहृतम्, इति कारिकार्थः ।

ननु जलत्वजातौ किं प्रमाणमित्यत आह- **स्नेहेति** । अनुमानस्वरूपञ्चे-त्थम्-- 'समवायसम्बन्धावच्छिन्न-स्नेहत्वावच्छिन्न-स्नेहनिष्ठ-कार्यता-निरूपिताभेद-सम्बन्धावच्छिन्ना कारणता किञ्चिद्धर्मावच्छिन्ना, कारणत्वात्, या या कारणता सा सा किञ्चिद्धर्मावच्छिन्ना घटगत-कार्यतानिरूपित-कपालगतकारणतावत् ।'

ननु स्नेहस्यानित्यानित्यवृत्तितया कार्यतावच्छेदकत्वं न स्यात्, यतो हि— अन्यूनानतिरिक्तप्रसक्त एव धर्मोऽवच्छेदको भवतीति स्नेहत्वस्य नित्यस्नेहेऽपि सत्त्वेनातिप्रसक्तत्वात् कथमवच्छेदकत्वमत आह- **जन्येति** । जन्यस्नेहत्वस्य जन्यजले एव वर्तमानतया नावच्छेदकत्वे किमपि बाधकमिति तत्त्वम् ।

अथ परमाणौ जलत्वं न स्यात् तत्र जन्यस्नेहाभावात् तस्य च नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भाविनियमादिति चेत्, न । जन्यस्नेहजनकतावच्छेदि-काया जन्यजलत्वजातेः सिद्धौ तदवच्छिन्नजनकतावच्छेदकतया जलत्वजाति-सिद्धेः ।

नन्वेवमपि परमाणौ जन्यस्नेहत्वावच्छिन्नकार्यतानिरूपितकारणतायाः अभावेन जलीयपरमाणौ कथं जलत्वं स्यादित्यत आशङ्क्ते **अथेति** । न चारण्य-स्थदण्डे घटत्वावच्छिन्नकार्यतानिरूपितफलोपधायकतारूपकारणताया अभावेऽपि स्वरूपयोग्यतारूपामेव जनकतामादाय, तदवच्छेदकतया यथा दण्डत्वस्य सिद्धिः तथैव परमाणौ अपि जन्यस्नेहत्वावच्छिन्नकार्यतानिरूपितकारणताया अभावेऽपि स्वरूपयोग्यतारूपामेव कारणतामादाय जलत्वं सेत्स्यति इति वाच्यम्, नित्यस्य स्वरूपयोग्यत्वे कदाचिदपि फलस्यावश्यम्भावापत्तेः । तथा च कथं निर्वाह इति चेदत्रोच्यते- **जन्यस्नेहेति** । पूर्वं 'समवायसम्बन्धावच्छिन्न-जन्यस्नेहत्वावछिन्न-

जन्यस्नेहनिष्ठकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्ना या कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वात्'—इत्याद्यनुमानेन जन्य-जलत्वजातिं संसाध्य समवाय-सम्बन्धावच्छिन्न-जन्यजलत्वावच्छिन्न-जन्यजलनिष्ठकार्यतानिरूपिताभेदसम्बन्धावच्छिन्ना कारणतेत्याद्यनुमानेन जलत्वजातिस्साधनीया ।

शुक्लरूपमेव जलस्येति दर्शयितुमुक्तं वर्णः शुक्ल इति । न तु शुक्लरूपवत्त्वं लक्षणम् । अथवा नैमित्तिकद्रवत्ववदवृत्तिरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्, अभास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वं वा तदर्थः । तेन स्फटिकादौ नातिव्याप्तिः ।

नैमित्तिकेति—नैमित्तिकद्रवत्ववती पृथिवीतेजसी, तदवृत्ति रूपवद्वृत्ति द्रव्यत्वसाक्षाद्व्याप्यजातिः जलत्वम्, तद्वज्जलमिति लक्षणसंगतिः । अथवा **अभास्वरेति** । अभास्वरं शुक्लेतररूपम्, भास्वरं शुक्लनीलपीतादि, तदसमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिः जलत्वम्, तद्वच्च जलमेवेति लक्षणसमन्वयः ।

रसस्पर्शाविति । जलस्य मधुर एव रसः शीत एव स्पर्शः । तिक्तरसवदवृत्तिमधुरवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम् तदर्थः । तेन शर्करादौ नातिव्याप्तिः । शीतेतरस्पर्शवदवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं तदर्थः ।

जलस्य मधुर एवेति । ननु मधुररसवत्त्वस्य शर्करादिरूपपृथिव्यामपि सत्त्वेन तत्रापि जलत्वं स्यादित्यत आह—**तिक्तेति** । तिक्तरसवती पृथिवी तदवृत्तिः द्रव्यत्वसाक्षाद्व्याप्यजातिः जलत्वम्, तद्वत्त्वं जले एवेति लक्षणसमन्वयः ।

शीत एव स्पर्शः इत्युक्तम् तदेव विशिनष्टि **शीतेतरेति** । शीतेतरस्पर्शवन्ति पृथिवीवायुतेजांसि तदवृत्तिः स्पर्शवद्वृत्तिः द्रव्यत्वसाक्षाद् व्याप्यजातिः जलत्वम्, तद्वत्त्वं जले । एवं लक्षणं समन्वयनीयम् ।

ननु शुक्लरूपवत्त्वमेवेति कुतः ? कालिन्दीजलादौ नीलिमोपलब्धेरिति चेत्, न । नीलजनकतावच्छेदिकायाः पृथिवीत्वजातेरभावाज्जले नीलरूपासंभवात् । कालिन्दीजले नीलत्वप्रतीतिस्त्वौपाधिकी । अत एव वियति विक्षेपे धवलिमोपलब्धिः । अथ जले माधुर्ये किं मानम् ? नहि प्रत्यक्षेण कोऽपि रसस्तत्रानुभूयते ।

न च नारिकेलजलादौ माधुर्यमुपलभ्यत एवेति वाच्यम्, तस्याश्रयोपाधिकत्वात् । अन्यथा जम्बीररसादावम्लाद्युपलब्धेरम्लादिमत्त्वमपि स्यादिति चेत्, न । हरीतक्यादिभक्षणस्य जलरसव्यञ्जकत्वात् ।

(अत्रत्या बालबोधिनी नोपलब्धा)

न च हरीतक्यामेव जलोष्मसंयोगाद्रसान्तरोत्पत्तिरिति वाच्यम् कल्पनागौरवात् ।

जलोष्मसंयोगस्य पृथिवीरसाभिव्यञ्जकत्वस्वीकारे पात्रस्थहरीतक्यादावपि जलसंयोगेन मधुरिमोत्पत्तेः । अतिरिक्तकार्यकारणभावकल्पने गौरवाच्चेति भावः ।

पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्च जले नाम्लादिकम् । जम्बीररसादौ त्वाश्रयौपाधिकी तथा प्रतीतिः । एवं जन्यशीतस्पर्शजनकतावच्छेदकं जन्यजलत्वं तदवच्छिन्नजनकतावच्छेदकं तु जलत्वं बोध्यम् । घृष्टचन्दनादौ तु शैत्योपलब्धिश्चन्दनान्तर्वर्तिशीततरसलिलस्यैव । तेजःसंयोगाज्जले उष्णप्रतीतिरौपाधिकी स्फुटैव । तत्र पाकासंभवात् । स्नेहस्तत्रेति । घृतादावपि तदन्तर्वर्तिजलस्यैव स्नेहः, जलस्य स्नेहसमवायिकारणत्वात् । तेन जल एव स्नेह इति मन्तव्यम् । द्रवत्वमिति । सांसिद्धिकद्रवत्वत्वं जातिविशेषः प्रत्यक्षसिद्धः, तदवच्छिन्नजनकतावच्छेदकमपि तदेवेति भावः ।

(अत्रत्या बालबोधिनी विनष्टा)

तैलादावपि जलस्य द्रवत्वं, स्नेहप्रकर्षेण च दहनानुकूल्यमिति वक्ष्यति ।।

ननु यदि तैलादावपि जलस्यैव द्रवत्वं तदा तैलादिप्रक्षेपे जलवदग्निनाशापत्तिः, कथं नेत्यत आह—**स्नेहेति** । प्रकृष्टस्नेहस्य दहनानुकूल्यम्, अपकृष्टस्य च प्रतिकूल्यमिति भावः । तदेव वक्ष्यते—

"स्नेहो जले च नित्योऽणावनित्योऽवयविन्यसौ ।
तैलान्तरे तत्प्रकर्षाद् दहनस्यानुकूलता" ।।

इति ।।३६।।

नित्यतादि प्रथमवत् किन्तु देहमयोनिजम् ।
इन्द्रियं रसनं सिन्धुहिमादिर्विषयो मतः ॥४०॥

प्रथमवदिति । पृथिव्या इवेत्यर्थः । तथाहि—जलं द्विविधं नित्यमनित्यं च । परमाणुरूपं नित्यं द्व्यणुकादिकं सर्वमनित्यमवयवसमवेतं च । अनित्यमपि त्रिविधं शरीरेन्द्रियविषयभेदात् । पृथिवीतो यो विशेषस्तमाह—किन्त्विति । देहमयोनिजम् अयोनिजमेवेत्यर्थः । जलीयशरीरं वरुणलोके प्रसिद्धम् ।

इन्द्रियमिति । जलीयमित्यर्थः । तथाहि—रसनं जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात् । सक्तुरसाभिव्यञ्जकोदकवत् । रसनेन्द्रियसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं देयम् ।

इन्द्रियमिति । जलीयमिन्द्रियं रसनमित्यर्थः । तत्रैव प्रमाणं दर्शयति—**तथाहीति ।**

नन्वेवं रसनेन्द्रियसन्निकर्षस्यापि रसव्यञ्जकत्वेन तत्रानैकान्तिकत्वं स्यात् । तच्चेत्थं—'हेतोः साध्याभाववद्वृत्तित्वम्' इति दोषस्वरूपेणात्र साध्यम् जलीयत्वम्, तदभावो जलीयत्वाभावः, तद्वान् रसनेन्द्रियसन्निकर्षः, तद्वृत्तित्वञ्च रसव्यञ्जकत्वरूपे हेतोरिति तत्त्वम् आपतितम्, अतस्तद्वारणाय मूले 'द्रव्यत्वे सतीति' प्रतिपादयति—'रसनेन्द्रियम् जलीयम्, द्रव्यत्वे सति गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात्, सक्तुरसाभिव्यञ्जकोदकवत्' इत्यनुमानेन रसनेन्द्रियसन्निकर्षस्य गुणत्वाद् द्रव्यत्वाभावेन दोषो निराकार्य इति भावः ।

विषयं दर्शयति—सिन्धुहिमादिरिति । सिन्धुः समुद्रः । हिमं तुषारः । आदिपदात् कासारकरकादिः सर्वोऽपि ग्राह्यः ।

न च हिमकरकयोः कठिनत्वात् पार्थिवत्वम् इति वाच्यम्, ऊष्मणा विलीनस्य तस्य जलत्वस्य प्रत्यक्षसिद्धत्वात् । यद्द्रव्यं यद्द्रव्यध्वंसजन्यमिति व्याप्तेर्जलोपादानोपादेयत्वसिद्धेः । अदृष्टविशेषेण वा द्रवत्वप्रतिरोधात् करकादीनां काठिन्यं प्रत्ययस्य भ्रान्तित्वात् ॥४०॥

ननु करकादिषु जलीयसांसिद्धिकद्रवत्वभावादर्शनात् पार्थिवकाठिन्यस्य चोपलब्धित्वेन तेषां पार्थिवत्वं स्यादित्याह—**ऊष्मणेति**।

ननु विलीनावस्थायमस्तु जलीयत्वं किन्तु काठिन्यविशिष्टानां तेषां पार्थिवत्वे किं बाधकमित्यत आह— **यद् द्रव्यमिति**। पार्थिवभस्मनि पार्थिवत्ववदिहापि जलीयपरमाणुजन्यस्य करकादेर्जलीयत्वे बाधकाभावादिति भावः। सांसिद्धिकद्रवत्ववद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा विवक्षणीयम्। एतेनापि तत्र जलत्वं निर्बाधम्।

ननु कथं तत्र द्रवत्वप्रतिरोध इति चेद्, दिव्यतेजःसंयोगादिति गृहाण। अस्तु तर्हि द्रवत्वप्रतिरोधः किन्तु काठिन्यप्रतीतिः कथमिति चेत् तत्राह— **भ्रान्तित्वादिति**। केचित्तु दिव्यतेजःसंयोगाज्जलपरमाणुभ्यां द्व्यणुकम् तैश्च त्रसरेण्वादिकं क्रमेण हिमादौ जायते। तादृशं द्व्यणुकादिकञ्च द्रवत्वरहितं काठिन्यविशिष्टमेवेति हिमादौ काठिन्यप्रतीतिर्भ्रान्तिरित्याहुः ।।४०।।

तेजो निरूपयति— उष्णः स्पर्श इत्यादिना।

उष्णस्पर्शस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम्।
नैमित्तिकं द्रवत्वं तु नित्यतादि च पूर्ववत् ।।४१।।

उष्णत्वं स्पर्शनिष्ठो जातिविशेषः प्रत्यक्षसिद्धः। इत्थं च जन्योष्णस्पर्शसमवायिकारणतावच्छेदकं तेजस्त्वं जातिविशेषः। तस्य परमाणुवृत्तित्वं तु जलत्वस्येवानुसंधेयम्।

उष्ण इति। तेजसः स्पर्शस्तु उष्णः, रूपं शुक्लभास्वरं स्यात्, द्रवत्वं तु नैमित्तिकं, नित्यादि च पूर्ववज् ज्ञेयम् इति कारिकाशयः।

तेजस्त्वजातिं साधयति **इत्थमित्यादिना**—सम्बन्धावच्छिन्नजन्योष्णस्पर्शत्वावच्छिन्नजन्योष्णस्पर्शनिष्ठकार्यतानिरूपित-तादात्म्यसम्बन्धाच्छिन्ना (या कारणता सा किञ्चिद्धर्मावच्छिन्ना) कारणत्वात्, या या कारणता सा सा किञ्चिद्धर्मावच्छिन्ना घटगतकार्यतानिरूपितकपालगतकारणतावत्। इत्थनुमानेन पूर्वं

जन्यतेजस्त्वजातिसिद्धौ समवायसम्बन्धावच्छिन्नजन्यतेजस्त्वावच्छिन्नजन्यतेजो-निष्ठकार्यतानिरूपिताभेदसम्बन्धावच्छिन्ना कारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात्, इत्याद्यनुमानेन तेजस्त्वजातिः साध्या। अन्यथोष्णस्पर्शत्वस्य कार्याकार्यवृत्तितया कार्यतावच्छेदकत्वाभावेन तेजस्त्वं न सिद्धयेत्।

न चोष्णस्पर्शवत्त्वं चन्द्रकिरणादावव्याप्तमिति वाच्यम्, तत्राप्युष्णत्वस्य सत्त्वात्। किन्तु तदन्तःपातिजलस्पर्शेनाभिभवादग्रहः। एवं रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवाच्चक्षुरादौ चानुद्भूतत्वादग्रहः॥

न च चन्द्रकिरणेषु सुवर्णे चोष्णत्वाभावात् कथं तत्र तेजस्त्वं सेत्स्यतीति वाच्यम्, तत्रापि 'चन्द्रकिरणादयः उष्णाः तेजस्त्वात्, यत्र यत्र तेजस्त्वम् तत्र तत्रोष्णत्वम्, तरणिकिरणवत्' इत्यनुमानेनोष्णत्वसिद्धेः।

न च पक्षे हेत्वभाववत्त्वमिति लक्षणेन तत्र तेजस्त्वमेव स्वरूपासिद्धमिति वाच्यम्, चन्द्रकिरणास्तैजसाः उष्णस्पर्शवत्त्वात्, यत्र यत्रोष्णस्पर्शवत्त्वम् तत्र तत्र तेजस्त्वम् अग्निस्फुलिङ्गवदित्यनुमानेन तत्रापि तेजस्त्वसिद्धेः। स्वर्णे चानुपदमेव तेजस्त्वं साधयिष्यते।

ननु चन्द्रकिरणादौ उष्णत्वसत्त्वे कथं नोपलब्धिरित्यत आह—**किन्त्विति**। एवमेव पूर्ववदनुमानेन रत्नकिरणादावपि उष्णत्वतैजसत्वे संसाध्यरत्नकिरणादौ पार्थिवस्पर्शेनाभिवाच्चक्षुरादौ चानुद्भूतत्वादुष्णत्वग्रहो बोध्यः।

रूपमित्यादि। वैश्वानरे मरकतकिरणादौ च पार्थिवरूपेणाभिभवाच्छुक्ल-रूपाग्रहः।

रूपमिति। न च भास्वरशुक्लं तेजसो रूपमिति कारिकायामुक्तम् भास्वर-शुक्लत्वञ्च परप्रकाशकत्वयुक्तश्चैत्यप्रतीतिविषयत्वम् तादृशरूपस्याग्निस्वर्णमरकत-किरणादौ भर्जनकपालस्थे वा तेजस्यभावादव्याप्तिरिति वाच्यम्, तत्रापि तेजस्त्वेन भास्वरशुक्लरूपानुमानात्, तथाहि—अग्निस्वर्णमरकतकिरणादयो भास्वरशुक्ल-रूपवन्तः तेजस्त्वात्, यत्र यत्र तेजस्त्वम् तत्र तत्र भास्वरशुक्लरूपवत्त्वम्, सूर्य-प्रभावत्, इति।

न च पूर्वोक्तवदिहापि तेजस्त्वमेव स्वरूपासिद्धमिति वाच्यम्, पूर्ववदुष्ण-स्पर्शवत्त्वेन तदनुमानात् ।

नन्वेवमग्न्यादौ भास्वरशुक्लरूपसत्त्वे कथं नोपलब्धिरित्यत आह—**वैश्वानर इति** । काष्ठादिगतरक्तादिरूपेणाभिभवाच्छुक्लरूपानुपलब्धिरिति तात्पर्यम् ।

ननु तद्रूपाग्रहे धर्मिणोऽपि चाक्षुषत्वं न स्यादिति चेत्, न । अन्यदीय-रूपेणापि धर्मिणो ग्रहसंभवात् शंखस्येव पित्तपीतिम्ना । वह्नेस्तु शुक्लं रूपं नाभिभूतं किन्तु तदीयं शुक्लत्वमभिभूतमित्यन्ये ।

न चाग्न्यादितेजोरूपाग्रहे तेषामपि प्रत्यक्षं न स्यादिति वाच्यम्, अन्यदीय-रूपेणापि तेषां ग्रहणसम्भवात्—यथा 'पाण्डु'-रोगयुक्तो जनः शङ्खं श्वेतमदृष्ट्वा पीतं पश्यति तथेहापि शुक्लरूपेतररक्तादिरूपेणापि धर्मिणो ग्रहे न किमपि बाधक-मिति तत्त्वम् ।

नैमित्तिकमिति । सुवर्णादिरूपे तेजसि तत्सत्त्वात् । न च नैमित्तिकद्रवत्वं न लक्षणं दहनादावव्याप्तं, घृतादावतिव्याप्तम् चेति वाच्यम्, पृथिव्यवृत्तिनै-मित्तिकद्रवत्ववद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्य विवक्षितत्वात् ।

नैमित्तिकमिति । न च नैमित्तिकद्रवत्वस्याग्न्यादावसत्त्वेन घृतादिरूप-पृथिवीवृत्तित्वेन चाव्याप्त्यतिव्याप्ती स्यातामिति वाच्यम्, पृथिव्यवृत्तिनैमित्तिक-द्रवत्ववद्वृत्ति द्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्य विवक्षां कृत्वा तथाभूताया-स्तेजस्त्वजातेरग्न्यादावेव सत्त्वेनादोषात् ।।४१।।

पूर्ववदिति । जलस्येवेत्यर्थः । तथाहि—तद् द्विविधं नित्यमनित्यं च । नित्यं परमाणुरूपं तदन्यदनित्यमवयवि च । तच्च त्रिधा—शरीरेन्द्रियविषयभेदात्, शरीरमयोनिजमेव । तच्च सूर्यलोकादौ प्रसिद्धम् ।।४१।।

(अस्य बालबोधिनी नोपलब्धा)

अत्र यो विशेषस्तमाह—

इन्द्रियं नयनं बह्निस्वर्णादिर्विषयो मतः ।

इन्द्रियमिति। (तैजसम्) इन्द्रियम् नयनम्, चक्षुर्बोध्यम्; वह्निस्वर्णादिश्च विषयो मतः, इति कारिकार्थः।

इन्द्रियमिति। ननु चक्षुषस्तैजसत्वे किं मानमिति चेत्, चक्षुस्तैजसं, परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात्, प्रदीपवत्। प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वादत्र दृष्टान्तेऽव्याप्तिवारणाय प्रथमं *परकीयेति*। घटादेः स्वीयरूपव्यञ्जकत्वाद् व्यभिचारवारणाय द्वितीयं *परकीयेति*। अथवा प्रभाया दृष्टान्तत्वसंभवादाद्यं *परकीयेति* न देयम्। चक्षुःसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं देयम्।

ननु चक्षुषस्तैजसत्वे किं मानमिति चेदनुमानमेवेति गृहाण, तच्चेत्थम्—'चक्षुस्तैजसम्, द्रव्यत्वे सति स्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रभावत्'। जालान्तर्गततरणिकिरणसम्पर्कलक्ष्यमाणरेणुपटलकणिकानामपि स्पर्शाद्यव्यञ्जकत्वे सति स्वीयरूपव्यञ्जकत्वेनानैकान्तिकहेत्वाभासवारणाय **परकीयेति**।

विषयं दर्शयति—वह्निरिति। ननु सुवर्णस्य तैजस्त्वे किं मानमिति चेत्, न। सुवर्णं तैजसम्, असति प्रतिबन्धकेऽत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानद्रवत्वात्, यन्नैवं तन्नैवं, यथा पृथिवीति।

वह्निरिति। ननु स्वर्णं तावन्न पृथिवी, निर्गन्धत्वात्, स्नेहसांसिद्धिकद्रवत्वशून्यत्वाच्च न जलम्, गुरुत्ववत्त्वान्न तेजः, अत एव न वायुर्नकालादि, ततो नवभ्यो भिद्यते इति कथं तस्य तेजोविषयत्वमिति चेन्न। आद्यद्वितीययोरनाभासत्वम्, तृतीयस्य स्वरूपासिद्धत्वम्, ततः परम् सिद्धसाधनम्, हेतोः स्वरूपासिद्धिश्च। अतः कारणात्—'स्वर्णं तैजसम्, असति प्रतिबन्धकेऽत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानजन्यद्रवत्वात्, यन्नैवं तन्नैवं यथा पृथिवीति' व्यतिरेकिणा तस्य तैजसत्वसिद्धेः।

न चाप्रयोजकं पृथिवीद्रवत्वस्य जन्यजलद्रवत्वस्यात्यन्ताग्निसंयोगनाश्यत्वात्। ननु पीतिमगुरुत्वाश्रयस्य पार्थिवभागस्यापि तदानीं द्रुतत्वात्तेन व्यभिचार इति चेत्, न। जलमध्यस्थमषीक्षोदवत्तस्याद्रुतत्वात्।

न चेति । अनुकूलतर्काभावदित्यर्थः । अर्थात् 'अनुच्छिद्यमानजन्यद्रवत्वमस्तु, तैजसत्वं मास्तु' यदि इत्याकारिका व्यभिचारशङ्का जायेत तदा कोऽप्यनुकूलस्तर्को नास्तीति चेन्न, पृथिवीद्रवत्वस्य जन्यजलद्रवत्वस्य चात्यन्तानलसंयोगनाश्यत्वात् । अनुच्छिद्यमानजन्यद्रवत्वस्य तेजस्येव सत्त्वेन तथा शङ्कैवायुक्तेति तत्त्वम् । **व्यभिचार** इति । अनैकान्तिक हेत्वाभास इति भावः । सचेत्थम् —साध्यम् तैजसत्वम्, तदभावो तैजसत्वाभावः, तद्वती पृथिवी, तद्वृत्तित्वमनुच्छिद्यमान-जन्यद्रवत्वस्येति, तन्न, जलमध्यस्थमषीचूर्णवत्तस्याद्रुतत्वात् ।

अपरे तु पीतिमाश्रयस्य अत्यन्ताग्निसंयोगेऽपि पूर्वरूपापरावृत्तिदर्शनात्तत्प्रतिबन्धकं विजातीयद्रवद्रव्यं कल्प्यते । तथा हि—अत्यन्ताग्निसंयोगे पीतिमगुरुत्वाश्रयो विजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तः । अत्यन्ताग्निसंयोगे सत्यपि पूर्वरूपविजातीयरूपानधिकरणत्वात्, जलमध्यस्थपीतपटवत् । तस्य च पृथिवीजलभिन्नस्य तेजस्त्वनियमात् ।।

प्रकारान्तरेण स्वर्णस्य तैजसत्वं साध्यते—**अपरे त्विति** । ननु पूर्वोक्त युक्त्या स्वर्णस्य तैजसत्वे सिद्धेऽन्धकारे तत्संयोगेन वस्त्वन्तरचाक्षुषप्रत्यक्षापत्तिः **तद्ग्रहापत्तिश्चेति** चेन्न, उद्भूतानभिभूतरूपालोकसंयोगस्यैव द्रव्यप्रत्यक्षे हेतुत्वात् । स्वर्णरूपस्य च पार्थिवरूपेणाभिभूतत्वात्तथावक्तुमशक्यत्वात् । तदुक्तं—'भूसंसर्ग वशाच्चान्य-रूपं नैव प्रकाशते" इति ।

वायुं निरूपयति—

अपाकजोऽनुष्णाशीतस्पर्शस्तु पवनो मतः ।।४२।।

तिर्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः ।
पूर्ववन्नित्यताद्युक्तं देहव्यापि त्वगिन्द्रियम् ।।४३।।

अपाकज इति । अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वादुक्तमपाकज इति । अपाकजस्पर्शस्य जलादावपि सत्त्वादुक्तमनुष्णाशीत इति । तेन वायवीयोविजातीयः स्पर्शो दर्शितः । तज्जनकतावच्छेदकं वायुत्वमिति भावः । एष वायुः स्पर्शादिलिङ्गकः ।

अपाकज इति । पवने वायौ स्पर्शस्तु अपाकजः अनुष्णाशीतः मतः । एष-

ायुः तिर्यग्गमनवान् स्पर्शादिलिङ्गकश्च ज्ञेयः । अस्य नित्यादि पूर्ववद् जलादिवत्तम् । इन्द्रियं देहव्यापि त्वगस्तीति कारिकाभावः ।

नन्वनुष्णाशीतस्पर्शवत्त्वमित्येवोच्यताम् किमपाकज इत्यनेनेत्यत आह— **पृथिव्यामिति ।**

ननु तर्हि अपाकजस्पर्शवत्त्वमित्येवास्तु किमधिकेनेत्यत आह— **जलादविति ।**

वायौ रूपाभावाच्चाक्षुषप्रत्यक्षायोग्यत्वेन स्पर्शादिलिङ्गक इति प्रमाणमुक्त्वाऽनुमानेन वायुसत्तामुपपादयति—

वायुर्हि स्पर्शशब्दधृतिकम्पैरनुमीयते, विजातीयस्पर्शेन, विलक्षणशब्देन, तृणादीनां धृत्या, शाखादीनां कम्पेन च वायोरनुमानात् । यथा च वायोर्न प्रत्यक्षं तथाग्रे वक्ष्यते ।

वायुर्हीति—वायुत्वजातिस्तु समवायसम्बन्धावच्छिन्नविलक्षणस्पर्शत्वावच्छिन्न - विलक्षणस्पर्शनिष्ठ - कार्यतानिरूपिताभेदसम्बन्धावच्छिन्ना कारणता किञ्चिद्धर्मावच्छिन्ना इत्याद्यनुमानेन सिद्धयति ।

अनुमानादिति—ननूपलभ्यमानस्पर्शः अनुद्भूतरूपायाः पृथिव्या एवेति चेन्न, उद्भूतस्य पृथिवीस्पर्शस्योद्भूतरूपनान्तरीयकत्वात् । तथा च रूपाभावाद् वायोरेवेति अनुमीयते, तथाहि—योऽयं स्पर्शोऽनुभूयते स क्वचिदाश्रितः, स्पर्शत्वात्, पृथिव्यादिस्पर्शवदित्यनुमानेन (सामान्यतोदृष्टेन) स्पर्शाश्रयसिद्धौ स्पर्शाश्रयो न पृथिव्यादित्रयात्मकः नीरूपत्वात्, नाकाशादिपञ्चकः स्पर्शवत्त्वादितीतरबाधसहकृतेनाष्टद्रव्यातिरिक्तद्रव्यसिद्धिः । एवं शब्दविशेषोऽपि वायौ प्रमाणम्, तथा हि—असति रूपवद्द्रव्याभिधाते योऽयं पर्णादिशब्दसन्तानः स स्पर्शवद् वेगवद् द्रव्याभिघातनिमित्तकः, अविभज्यमानावयवद्रव्यसम्बन्धिशब्दसंतानत्वात्, दण्डाभिघातजभेरीशब्दसन्तानवत् । एवं धृतिविशेषोऽपि वायौ लिङ्गम्—तथाहि तृणतूलस्तनयित्नुविमानानां नभसि धृतिः स्पर्शवद्वेगवद्द्रव्यसंयोगजा, चेतनानधिष्ठितद्रव्यधृतित्वात्, प्रवाहे तृणकाष्ठनौकादिधृतिवत् । एवं कम्पोऽपि वायौ प्रमाणम्, तथाहि—इदं रूपवद्द्रव्याभिघातमन्तरेण तृणादौ कर्मस्पर्शवद् वेगवद् द्रव्या-

भिघातजम्, गुरुत्वप्रयत्नवदात्मसंयोगाजन्यकर्मत्वात्, नदीपूराहतवेतसवनकर्मवत् । इत्यादि ।

ननु प्रत्यक्ष एव वायुः किमत्र लिङ्गान्वेषणेनेति चेत्, न । वायुर्न प्रत्यक्षः, नीरूपबहिर्द्रव्यत्वात्, गगनवत्, इत्यनुमानेनातीन्द्रियत्वस्यैव सिद्धेः ।

ननु 'वायुः प्रत्यक्षः, स्पर्शाश्रयत्वात्, घटवत्' इति प्रत्यक्षानुमानमिति चेत्, न । उद्भूतरूपवत्त्वस्यात्रोपाधित्वात्, इति यत् किञ्चिदेतत् । विस्तरस्त्विह ग्रन्थगौरवभिया त्यक्तः काणादादाववगन्तव्यः ।।४२।।४३।।

पूर्ववदिति । वायुर्द्विविधो नित्योऽनित्यश्च । परमाणुरूपो नित्यस्तदन्योऽनित्योऽवयसमवेतश्च । सोऽपि त्रिविधः—शरीरेन्द्रियविषयभेदात् । तत्र शरीरमयोनिजम् पिशाचादीनाम् । परन्तु जलीयतैजसवायवीयशरीराणां पार्थिवभागोपष्टम्भादुपभोगक्षमत्वं जलादीनां प्राधान्याज्जलीयत्वादिकमिति ।

अत्र यो विशेषस्तमाह—देहव्यापीति । शरीरव्यापकं स्पर्शग्राहकमिन्द्रियं त्वक् । तच्च वायवीयं, रूपादिषु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वात्, अङ्गसङ्गसलिलशैत्याभिव्यञ्जकव्यजनपवनवत् ।।४२।।४३।।

(अस्य बालबोधिनी नोपलब्धा)

विषयं दर्शयति—

प्राणादिस्तु महावायुपर्यन्तो विषयो मतः ।

प्राणादिरिति । प्राणादिः महावायुपर्यन्तः विषयः मतः वायोरिति शेषः । आदिनाऽपानादिसंग्रहः, तदुक्तम्—

प्राणोऽपानः समानाख्यः उदानो व्यान एव च ।
नागः कूर्मश्च कृकलो देवदत्तो धनञ्जयः ।।१।।
हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ।
उदानः कण्ठदेशे स्याद् व्यानः सर्वशरीरगः ।।२।।
उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः ।
कृकलः क्षुत्करो ज्ञेयो देवदत्तो विजृम्भणे ।।३।।
न जहाति मृतं वापि सर्वव्यापी धनञ्जयः ।। इति ।

प्राणादिरिति । यद्यप्यनित्यो वायुश्चतुर्विधः, तस्य चतुर्थी विद्या प्राणादिरित्युक्तमाकरे । तथापि संक्षेपादत्र त्रैविध्यमुक्तम् । प्राणस्त्वेक एव हृदादिनानास्थानवशान्मुखनिर्गमादिनानाक्रियावशाच्च नानासंज्ञां लभते इति ।

(अस्य बालबोधिनी नोपलब्धा)

आकाशं निरूपयति—

आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ।।४४।।

आकाशस्येति—आकाशस्य वैशेषिको गुणः शब्दो ज्ञेयः ।

आकाशस्येति । आकाशकालदिशामेकैकव्यक्तित्वादाकाशत्वादिकं न जातिः । किन्तु आकाशत्वं शब्दाश्रयत्वम् । वैशेषिक इति कथनं तु विशेषगुणान्तरव्यवच्छेदाय । एतेन प्रमाणमपि दर्शितम् । तथाहि—शब्दो विशेषगुणः, चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्त्वात् स्पर्शवत् ।

(अस्य बालबोधिनी नोपलब्धा)

शब्दो द्रव्यसमवेतो, गुणत्वात्, संयोगवत् इत्यनुमानेन शब्दस्य द्रव्यसमवेतत्त्वे सिद्धे शब्दो न स्पर्शवद्विशेषगुणः, अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात्, सुखवत् ।

अकारणेति—यथा घटादिगतगुणानां प्रत्यक्षत्वं कारणगुणपूर्वकं भवति, अर्थाद् यथाभूतः कपालादिगुणः तथैव घटादावपि प्रादुर्भवति, न तथा शब्दरूपगुणस्य, निःशब्दैरेवावयवैर्वीणावेणुमृदङ्गादिरचनादर्शनादिति भावः ।

पाकजरूपादौ व्यभिचारवारणाय सत्यन्तम् । पटरूपादौ व्यभिचारवारणायाकारणगुणपूर्वकेति, जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षेति ।

(अस्य बालबोधिनी नोपलब्धा)

शब्दो न दिक्कालमनसां गुणः, विशेषगुणत्वात् । नात्मविशेषगुणो बहिरिन्द्रग्राह्यत्वात् रूपवत् । इत्थं च शब्दाधिकरणं नवमं द्रव्यं गगननामकं सिद्ध्यति ।

नात्मेति—किञ्च यदि शब्द आत्मविशेषगुणः स्यात् तदा अहं यते, अहं-जानामीतिवत् अहं पूर्ये, अहं वाद्ये, अहं शब्दवान् इत्यपि बुद्धिः स्यात्, नहि तथा प्रतीतिर्लोके भवति, किन्तु शंखः पूर्यते, वीणा वाद्यते इत्येव। शब्दस्यात्मगुणत्वे दुःखादिवद् वधिरेणापि चोपलभ्यत इति नात्मविशेषगुणः शब्दः। नापि मनसो गुणः, मनसोऽणुत्वात् तद् गुणानामपि प्रत्यक्षाभावात्। अयञ्च शब्दः प्रत्यक्ष इति तद्-गुणेभ्योऽतिरिच्यते।

न च वाय्ववयेषु सूक्ष्मशब्दक्रमेण वायौ कारणगुणपूर्वकः शब्द उत्पद्यता-मिति वाच्यम्, अयावद्द्रव्यभावित्वेन वायुविशेषगुणत्वाभावात् ।।४४।।

न चेति। ननु वायोरवयवेषु सूक्ष्मशब्दक्रमेण तार-तारतर-मन्द्र-मन्द्रतर-कारणगुणपूर्वकशब्द उत्पद्यते इति तस्य कारणगुणपूर्वकप्रत्यक्षत्वं स्यात्, स च वायोरेव स्यादित्याशङ्क्यायामाह। **अयावदिति**—शब्दो न विशेषगुणः, अयावद्-द्रव्यभावित्वात्, सुखादिवद्, इत्यनुमाने वायुविशेषगुणभिन्नत्वसिद्धेरिति भावः। अवावद्द्रव्यभावित्वञ्च—स्वाश्रयनाशजन्यनाशप्रतियोगिभिन्नत्वम्। तत्र स्व-शब्देन गुणः, तदाश्रयो घटादिः, तस्य यो नाशः, तन्नाशजन्यो यो घटादिगुणरूपादिनाशः, तन्नाशस्याप्रतियोगित्वेन शब्दो न वायुविशेषगुणः। यावद् द्रव्यं तावद् भवतीति यावद्द्रव्यभावी, तथा न भवतीति अयावद्द्रव्यभावी, तस्य भावस्तत्त्वम्। यावद् वायुरूपं तिष्ठेत् तावदेव शब्दोऽपि तिष्ठेत्, वायुनाशे च नश्येत् तदा तु तस्य यावद्द्रव्यभावित्वं प्रतिपदायितुं शक्येत, किन्तु सत्यपि वायौ क्वचिच्छब्दो न, क्वचिच्च तदभावेऽपि शब्द इति न शब्दो वायुगुणः इत्येव पर्य्यवस्यति ।।४४।।

तत्र शरीरस्य विषयस्य चाभावादिन्द्रियं दर्शयति—

इन्द्रियं तु भवेच्छ्रोत्रमेकः सन्नप्युपाधितः ।।

इन्द्रियमिति। नन्वाकाशं लाघवादेकं सिद्धं श्रोत्रं तु पुरुषभेदेन भिन्नं कथमाकाशं स्यादिति चेत्, तत्राह—एकः सन्नपीत्यादि। आकाश एक एव सन्नपि उपाधेः कर्णशष्कुल्यादेर्भेदाद् भिन्नं श्रोत्रात्मकं भवतीत्यर्थः।

(अस्य बालबोधिनी नोपलब्धा)

कालं निरूपयति—

जन्यानां जनकः कालो जगतामाश्रयो मतः ॥४५॥

जन्यानामिति । तत्र प्रमाणं दर्शयितुमाह—जगतामिति । तथाहि—'इदानीं घटः' इत्यादि प्रतीतिः । सूर्यपरिस्पन्दादिकं यदा विषयीकरोति तदा सूर्यपरिस्पन्दादिना घटादेः संबन्धो वाच्यः । स च सम्बन्धः संयोगादिर्न सम्भवतीति काल एव तत्सम्बन्धघटकः कल्प्यते । इत्थं च तस्याश्रयत्वमेव सम्यक् ॥४५॥

जन्यानामिति । जन्यानां जन्यपदार्थानाम्, जनकः उत्पादकः जगतामाश्रयश्च कालो मतः । **जनक इति**— निमित्त-कारणमिति भावः । इत्थञ्च कार्यमात्रं प्रति कालस्य निमित्तकारणत्वमिति फलितम् ।

जगतामिति । इदानीमन्धकारोऽस्ति, श्वो भास्वानुदेता, तदानीं पुष्पं स्फुटिष्यति, युगपत् पक्षिण उड्डिडिरे, चिरमहं तत्रासम्, क्षिप्रं विप्रं नमेत्यादौ इदानीं तदानीम्, युगपच्चिरं, क्षिप्रम्, इति कश्चित्पदार्थो वाच्यः स एव कालः कल्प्यते । यदि च तदानीमित्यादिना सूर्यक्रियाया एव बोधः क्रियते तदापि तया कश्चित् सम्बन्धो घटादिना वाच्य इति संयोगादिबाधात्कालिक संबन्ध एव श्रेयानुपकल्प्यते ॥४५॥

प्रमाणान्तरं दर्शयति—

परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः ॥

परापरत्वेति । परत्वापरत्वबुद्धेरसाधारणं निमित्तं काल एव । परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयो लाघवादतिरिक्तः काल एव कल्प्यते इति भावः ।

परापरत्वधीरिति । परापरत्वधी हेतुः (कालः अस्ति) क्षणादिः उपाधितः स्यात् । 'अयं ज्यायान्', 'अयं कनीयान्' इत्यादौ प्रतीयमानपरत्वापरत्वयो-

रसमवायिकारणेन केनचिदवश्यं भाव्यम्, भावकार्यमात्रं प्रति असमवायिकारण-सत्ताया नियमादित्यन्यस्यातथात्वात् काल एव तथा कल्प्यते इति भावः ।

ननु आकाशदिगादिभिर्यः पिण्डसंयोगस्तस्यैवासमवायिकारणत्वमस्तु, किं पृथग् द्रव्यकल्पनेनेत्यत आह—**लाघवादिति** । अयम्भावः, स्थविरमपेक्ष्य युवाऽपरः, युवानमपेक्ष्य स्थविरः परः, इत्यादि परत्वापरत्वकार्ये किमसमवायिकारणमिति चेत्, नतावद्रूपरसगन्धानामन्यतमम्, वायौ रूपादीनामभावात्परत्वापरत्वानुपपत्तेर्नापि स्पर्शः, पाकजस्पर्शोत्पत्तिदशायाम् अपरत्वानुपपत्तिप्रसंगात् । स्पर्शवैजात्येनापरत्वादिवैजात्यप्रसंगाच्च । नाप्यपकृष्टपरिमाणम्, परिमाणस्य विजातीय-गुणानारम्भकत्वात्, नापि नयनपरिस्पन्दो व्यधिकरणत्वात्, किन्तु पिण्डमार्तण्डो-भयसंयुक्त-किञ्चिद्विभुद्रव्यसंयोग एवापरत्वादिकार्येऽसमवायिकारणम् । तादृश-स्वभावत्वं हि नाकाशादेः, क्वचिदेकत्रभेर्यभिघातात् सर्वभेरीषु शब्दोत्पत्ति-प्रसंगात् । तथा च परत्वापरत्वयोर्यद् द्रव्यं योऽयमपरस्तेन तपनेन च संसृज्यते, अपरस्य तपनक्रियया संबन्धं करोति, तपनपरिस्पन्दाँश्च तत्रोपनयति यद् द्रव्यं कालः । आत्माऽपि न, यतो हि स चेतनः, सर्वोपाधिविनिर्मुक्तः, न खल्वप्यन्यस्य धर्ममन्यत्रोपनयति । अचेतनन्तु द्रव्यमन्यस्य धर्ममन्यत्रोपनयनद् दृष्टम्, यथा पुष्प-गन्धं वायुरिति । एवं रीत्या परापरत्वादिसाधकं कालरूपमतिरिक्तं द्रव्यमेव नान्यदिति फलितम् । वस्तुतस्तु कार्यमात्रं प्रति कालस्यैव कारणता अत एव 'कालादुत्पद्यते सर्वम्' इत्यादिरागमोऽपि सङ्गच्छते ।

नन्वेकस्य कालस्य सिद्धौ क्षणदिनमासवर्षादिसमयभेदो न स्यादत आह—क्षणादिरिति । कालस्त्वेकोऽपि उपाधिभेदात्क्षणादिव्यवहारविषयः ।

उपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म, पूर्वसंयोगावच्छिन्न-विभागो वा, पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावो वा, उत्तरसंयोगाव-च्छिन्नं कर्म वा ।

न चोत्तरसंयोगानन्तरं क्षणव्यवहारो नास्तीति वाच्यम्, कर्मान्तरस्य सत्त्वादिति ।

उपाधिरिति । तात्पर्यञ्चात्रेत्थमवगन्तव्यम्—क्रिया क्षणचतुष्टयस्थायिनी, आद्यक्षणे क्रिया, क्रियातो विभागः, विभागतः पूर्वसंयोगनाशः, तत उत्तरसंयोगः, ततः क्रियानाशः, एष नियमः । क्रियातो विभागो भवतीति क्रिया उत्पद्यैव विभागमुत्पादयिष्यति अतो विभागोत्पत्तेः प्राक् क्रिया, विभागप्रागभावश्च तिष्ठतः इति सा क्रिया विभागप्रागभावावच्छिन्नाभिधीयते । समानाधिकरणसम्बन्धेन विभागप्रागभावविशिष्टा क्रियेति भावः । एवंभूता एव क्रिया उपाधिरित्युच्यते । तदेवाह मूले —**स्वजन्येति** । तत्र स्व-शब्देन क्रिया (कर्म), तज्जन्यो यो विभागः, तस्य यः प्रागभावः, तद्विशिष्टं कर्मेति निष्कर्षः । एवंभूतोपाधिरूपक्रियाविशिष्टः कालः प्रथमक्षणात्मक उच्यते । यस्मिन् क्षणे विभागोत्पत्तिः तदा पूर्वसंयोगोऽपि वर्तत एव, उत्पद्यैव विभागः संयोगं नाशयतीति नियमात् । अतो विभागः पूर्वं संयोगावच्छिन्नो भविष्यतीत्यस्यापि उपाधित्वम् । एतादृशोपाधिविशिष्टः कालो द्वितीयक्षणात्मकः काल उच्यते । तदेवाह मूले—**पूर्वेति** ।

ननु संयोगविभागयोरेकाधिकरणवृत्तित्वाभावेन पूर्वसंयोगावाच्छिन्नविभागोवेति कथनमयोग्यमिति चेन्न, संयोगनाशरूपकार्यम्प्रति "कार्याव्यवहितप्राक्षणावच्छेदेन नियतपूर्ववृत्तित्वं कारणत्वम्" इति कारणत्वलक्षणेन संयोगनाशात् पूर्वं विभागरूपकारणस्थितेरावश्यकत्वात् । अत एव समानाधिकरण्येनापि एकत्र स्थितौ न किमपि बाधकम् । एवमग्रे तृतीयतुरीयक्षणात्मकेऽपि तथैवोहनीयम् ।

महाप्रलये क्षणव्यवहारो यद्यस्ति तदानायत्या ध्वंसेनोपपादनीय इति । दिनादिव्यवहारस्तु तत्तत्क्षणकूटैरेवेति ।।

ननु महाप्रलये विभागप्रागभावदेरभावात्तत्तद्भावविशिष्टकर्मादेरभावेन क्षणादिव्यवहारो न स्यादत आह —**यदीति** । सकलभावकार्यध्वंसविशिष्ट एव कालो महाप्रलयात्मक काल उच्यते, दिनादिव्यवहारस्तु तत्तत्क्षणसमूहैर्विभावनीय इति दिक् ।।

दिशं निरूपयति—

दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते ।।४६।।

दूरान्तिकेति । दूरत्वमन्तिकत्वं च दैशिकं परत्वमपरत्वं बोध्यम् ।

तद्बुद्धेरसाधारणं बीजं दिगेव । दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया लाघवादेका दिक् सिद्ध्यतीति भावः ।।४६।।

नन्वेकैव दिक् तदा प्राचीप्रतीच्यादि व्यवहारः कथमुपपद्यतामित्यत आह—

उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक् ।।

दूरेति । दूरान्तिकादिधीहेतुः दूरान्तिकादिबुद्धिकारणम् एका, नित्या, दिक्, दिशा उच्यते । सा एकापि उपाधिभेदात् प्राच्यादिव्यपदेशभाक्, प्राच्यादिव्यवहारवती भवति इति भावः । इदमस्माद्दूरम्, इदमस्मदन्तिकम्, इत्यादौ दूरत्वान्तिकत्वयोरसमवायिकारणं संयोगस्तदाश्रयतया एका नित्या दिक् कल्प्यते इति भावः ।

उपाधीति । यत्पुरुषस्य उदयगिरिसंनिहिता या दिक् सा तस्य प्राची । एवमुदयगिरिव्यवहिता या दिक् सा प्रतीची । एवं यत्पुरुषस्य सुमेरुसन्निहिता या दिक् सोदीची । तद्व्यवहिता त्ववाची । 'सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थितः' इति नियमात् ।।

यत् पुरुषस्येति । पुरुषपदस्य पदार्थमात्रे दिक् शब्दस्य च मूर्तमात्रे लक्षणा ।

ननूदयगिरिसन्निहितदिश्येव यदि प्राचीपदव्यवहारस्तदा ये सुमेरोरुत्तरदिशि स्थितास्तेषां प्रतीच्यां सूर्योदयादस्माकं या प्रतीची सैव तेषां प्राची स्यादिति चेत्, अस्तु—इत्यभिप्रेत्याह **सर्वेषामिति ।** मेरुः सर्वेषां वर्षाणां (देशानाम्) उत्तरतः स्थित इति तत्त्वम् । इत्थञ्चास्माकं या प्रतीची सैव मेरूत्तरस्थितानां प्राचीति न केषामप्यत्र वैमत्यमिति दिक् ।।

आत्मानं निरूपयति—

आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् ।।४७।।

आत्मेन्द्रियेति आत्मत्वजातिस्तु सुखदुःखसमवायिकारणतावच्छेदकतया सिद्ध्यति । ईश्वरेऽपि सा जातिरस्त्येव । अदृष्टादिरूपकारणाभावान्न सुखदुःखाद्युत्पत्तिः ।

इन्द्रियादीति । इन्द्रियाद्यधिष्ठाता आत्मा, हि करणं सकर्तृकं कर्त्रा सहितं भवति । आत्मत्वस्य जातित्वे प्रमाणमुपन्यस्यति - **समवायीति ।** समवायसम्बन्धावच्छिन्नसुखदुःखैतदन्यतरत्वावच्छिन्नकार्यतानिरूपितकारणता किञ्चिद्धर्मावच्छिन्ना इत्याद्यनुमानस्वरूपं पूर्वमेवाभ्युपगन्तव्यम् ।

नन्वेवं परमात्मनि सुखदुःखान्यतरत्वासत्त्वेनानुमितात्मपदेन जीवात्मन एव बोधः स्यान्न तु परमात्मन इत्यत आह—**ईश्वरेऽपीति ।** न चैवं परमात्मापि सुखी-दुःखी च स्यादिति वाच्यम्, अदृष्टादिरूपकारणाभावात् सुखदुःखाद्यनुत्पत्तेः । एतेनेश्वरे स्वरूपयोग्यतैवास्ति न तु फलोपधायकतेति निष्कर्षो जातः ।

नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भाव इति नियमस्याप्रयोजकत्वात् ।

ननु नित्यस्य स्वरूपयोग्यत्वे फलस्यावश्यम्भावनियमात्, नित्यस्य च नाशासम्भवेन परमात्मनि स्वरूपयोग्यतारूपसुखादिकारणतायाः वर्तमानत्वे कदाचित्सुखाद्युत्पत्तिः स्यादित्यत आह **नित्यस्येति ।** जलीयपरमाणौ स्नेहसमवायिकारणतावच्छेदकत्वस्य सत्त्वेऽपि कदाचिदपि स्नेहानुत्पादकत्वेन तादृशनियमस्याप्रयोजकत्वं स्वीक्रियते इति भावः ।

परे त्वीश्वरे सा जातिर्नास्त्येव प्रमाणाभावात् । न च दशमद्रव्यत्वापत्तिः, ज्ञानवत्त्वेन विभजनादित्याहुः ।

इन्द्रियादीति । इन्द्रियाणां शरीरस्य च परम्परया चैतन्यसंपादकः । यद्यप्यात्मनि 'अहं जाने अहं सुखी' इत्यादि प्रत्यक्षविषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्नस्तत्प्रतीतिगोचर इति प्रतिपादयितुं न शक्यत इत्यतः प्रमाणान्तरं दर्शयति—करणमिति । कुठारादीनां छिदाकरणानां कर्तारमन्तरेण फलानुपधानं दृष्टम् । एवं चक्षुरादीनां ज्ञानकरणानां फलोपधानमपि कर्तारमन्तरेण नोपपद्यत इत्यतिरिक्तः कर्ता कल्प्यते ।।४७।।

ज्ञानवत्त्वेति । 'कालदिग्देहिनो मनः' इत्यत्र कालदिग्ज्ञानवन्मनः' इति पठित्वा देही आत्मा, इत्यत्र देही ज्ञानवान् इति पाठेनेति तत्त्वम् ।

अतिरिक्त इति । अनुमानस्वरूपन्तु—'चक्षुरादिकं सकर्तृकम्, करणत्वात्, यद्यत्करणम् तत्तत्सर्वं सकर्तृकम्, तक्षवास्यादिवत्' इत्थं बोध्यम् । एवं प्राणाद-

योऽपि आत्मनि लिङ्गानि, तथाहि—शरीरान्तःसञ्चारिणि वायौ प्राणापानलक्षणे ऊर्ध्वाधोगती, उत्क्षेपणावक्षेपणे मुसलादाविव प्रयत्नं विनाऽनुपपद्यमाने यस्य प्रयत्नाद् भवतः स नूनमात्मा। यतो हि वायुस्तिर्यग्गमनवान् इति प्रेरकं विना तस्यैवं स्वभावविपर्ययः कदापि न सम्भवति। एवं निमेषोन्मेषावपि इन्द्रियाद्यधिष्ठातारमनुमापयतः। तथाहि—निमेषस्तावत् अक्षिपक्ष्मणोः संयोगजनकं कर्म, उन्मेषस्तावत्तयोरेव विभागजनकं कर्म, एतच्च कर्मद्वयम् नोदनाभिघातादिदृष्टकारणमन्तरेण निरन्तरमुत्पद्यमानं दारुपुत्तलिकानर्तनवत् स्वयं न सम्भवतीति दारुपुत्तलिकानर्तनमवलोक्य पुरुषादिवदस्यापि कर्तानुमीयते। एवं वृद्धिक्षतभग्नसंरोहणादि जीवनकार्यमपि आत्मनि प्रमाणम्। यथा गृहपतिर्भग्नं गृहं निर्मिमीते, लघिष्ठं द्राघिष्ठं वा विधत्ते तथैव शरीराधिष्ठाता गृहस्थानीयं देहम् प्रत्यवसानादिना वर्द्धयति, क्षतञ्च भेषजादिना प्ररोहयति, भग्नञ्च करचरणादि संरोहयति, अतो गृहपतिरिव शरीराधिष्ठातापि सिद्ध्यतीति भावः ॥४७॥

ननु शरीरस्यैव कर्तृत्वमस्त्वत आह—

शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः ।
तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः ॥४८॥

शरीरस्येति । मृतेषु मृतशरीरेषु व्यभिचारतः दोषात् शरीरस्य देहस्य चैतन्यं चेतनत्वं न। चेत् यदि इन्द्रियाणाम् चक्षुरादीनां तथात्वं चेतनत्वं स्यात् तदा उपघाते चक्षुरादिनाशे कथं स्मृतिः स्यादिति कारिकार्थः।

शरीरस्येति। ननु चैतन्यं ज्ञानादिकमेव मुक्तात्मनां त्वन्मत इव मृतशरीराणामपि तदभावे का क्षतिः, प्राणाभावेन ज्ञानाभावस्य सिद्धेरिति चेत्, न। शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थाविरे स्मरणानुपपत्तेः, शरीराणामवयवोपचयापचयरूपादविनाशशालित्वात्।

ननु चक्षुराद्यतिरिक्ते कर्तरि सिद्धेऽपि शरीरस्यैव तत्त्वमस्तु किमतिरिक्तात्मकल्पनेनेति शरीरात्मवादी चार्वाक् आरेकते—**ननु शरीरस्यैवेति** । खण्डयति नैयायिकः—शरीरे चेतनतास्वीकारे तत्त्वस्य मृतशरीरेऽपि सत्त्वेन तत्रापि चेतनतया

ननु चक्षुरादीनामेव ज्ञानादिकं प्रति करणत्वं कर्तृत्वं चास्तु, विरोधे-साधकाभावादत आह—तथात्वमिति। चैतन्यमित्यर्थः। उपघाते नाशे सति अर्थाच्चक्षुरादीनामेव। कथं स्मृतिरिति। पूर्वं चक्षुषा साक्षात्कृतानां चक्षुषोऽभावे स्मरणं न स्यात्। अनुभवितुरभावात्। अन्यदृष्टस्यान्येन स्मरणासम्भवात्। अनुभवस्मरणयोः समानाधिकरण्येन कार्यकारणभावादिति भावः ।।४८।।

ननु चक्षुरादीन्द्रियाणामेव ज्ञानादिकं प्रति करणत्वं कर्तृत्वं चास्तु विरोधे किं प्रमाणमत आह—**तथात्वमिति**। यदि चैतन्यं ज्ञानं वा चक्षुरादीन्द्रियेषु स्यात्, तदा करावच्छेदेनानुभूतस्य करच्छेदे, चक्षुषानुभूतस्य च चक्षुर्नाशेऽस्मरणप्रसङ्गः स्यात् इति भावः।

न च सोऽनुभवः इन्द्रियान्तरेण भविष्यतीति वाच्यम्, अन्यदृष्टस्यान्येन स्मरणासम्भवात्। अन्यथा देवदत्तेनावलोकितं यज्ञदत्तस्य दृष्टिपथमवतरेत्। एवं 'ज्ञानं न शरीरविशेषगुणः, अपाकजत्वे सत्यकारणगुणपूर्वकप्रत्यक्षत्वात्, शब्दवत्' इत्यनुमानेनापि ज्ञानस्य देहेन्द्रियवृत्तित्वाभावसिद्धिः इत्थञ्चानुभवस्मरणयोः समानाधिकरण्येन कार्यकारणभावाद् देहादौ चैतन्यं प्रत्युक्तमिति चार्वाक्मत-निरसनम्।

ननु चक्षुरादीनां चैतन्यं मास्तु मनसस्तु नित्यस्य चैतन्यं स्यादत आह—

मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत्।
धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः ।।४९।।

अथ विज्ञानवादिनो बौद्धस्य मतम्—**मनोऽपीति**। मनोऽपि न तथा, मनसोऽपि न चेतनत्वम्, तदा तथात्वस्वीकारे ज्ञानाद्यनध्यक्षं भवेत्। विशेषगुणयोगतः योग्यविभुविशेषगुणस्य ज्ञानसुखादेः सम्बन्धेन नायमात्मा धर्माधर्माश्रयः अध्यक्षः अस्ति, इति कारिकार्थः।

मनोऽपीति। न तथा न चेतनम्। ज्ञानादीति। मनसोऽणुत्वात्प्रत्यक्षे च महत्त्वस्य हेतुत्वान्मनसि ज्ञानसुखादिसत्त्वे तत्प्रत्यक्षानुपपत्तिरित्यर्थः। यथा मनसोऽणुत्वं तथा वक्ष्यते।

नन्वस्तु विज्ञानमेवात्मा तस्य स्वतः प्रकाशरूपत्वाच्चेतनत्वम्। ज्ञान-सुखादिकं तु तस्यैवाकारविशेषः। तस्यापि भावत्वादेव क्षणिकत्वम्, पूर्वपूर्व-विज्ञानस्योत्तरोत्तरविज्ञाने हेतुत्वात्सुषुप्तावप्यालयविज्ञानधारा निराबाधैव।

नन्वस्तु विज्ञानमेवात्मेति। अयम्भावः—आलयविज्ञान-प्रवृत्तिविज्ञानभेदेन विज्ञानं द्विविधम्, विषयासम्बद्धम्, घटविषयकज्ञानवानहमित्याकारकं ज्ञानं आलय-विज्ञानम्, घटत्वादिविशिष्टम् अयं घट इत्याकारकं ज्ञानं प्रवृत्तिविज्ञानमिति तस्यैवात्मत्वं स्यात्।

ननु विज्ञानस्य जडरूपतया प्रकाशकान्तराभावात्तस्य चैतन्यं न स्यादतश्च पृथगात्मा स्वीकर्तव्य इति चेन्न, तस्य स्वतः प्रकाशरूपत्वाच्चेतनत्वसिद्धेः। ज्ञान-सुखादिकन्तु स्वर्णस्य कटककुण्डलादिवत्तस्यैवाकारविशेषः। अपरञ्च सर्वे भावाः क्षणिका अतश्च विज्ञानस्यापि भावत्वेन तस्यापि क्षणिकत्वम्।

ननु यदि विज्ञानस्यात्मत्वं, तस्य क्षणिकत्वञ्च, तदा पूर्वानुभूतवस्तुनः उत्तर-कालेऽनुभवितुर्विज्ञानस्याभावात्स्मरणं न स्यात्, किञ्चोत्तरविज्ञानस्योत्पादका-भावात्तस्योत्पत्तावपि प्रलयापत्तिरेवेति चेत्, न। पूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञान-जनकत्वे स्वीयगुणाधायकत्वे चादोषः।

ननु विज्ञानस्यात्मत्वे सुषुप्तिकाले तस्याभावेन सुषुप्त्यनन्तरमुत्पादका-भावाद् विज्ञानं न स्यादिति चेन्न, वीचीतरङ्गन्यायेन सुषुप्तावपि विषयासम्बद्ध-विज्ञानस्य (आलयविज्ञानस्य) सत्त्वेन दोषाभावात्।

मृगमदवासनावासितवसन इव पूर्वपूर्वविज्ञानजनितसंस्काराणामुत्तरोत्त-विज्ञाने संक्रान्तत्वान्नानुपपत्तिः स्मरणदेरिति चेन्न, तस्य जगद्विषयकत्वे सर्व-ज्ञत्वापत्तिः। यत् किञ्चिद्विषयकत्वे विनिगमनाविरहः। सुषुप्तावपि विषयावभास-प्रसङ्गाच्च, ज्ञानस्य सविषयत्वात्।

नन्वेवमपि विषयसम्बद्धस्याविच्छिन्नतया सुषुप्त्यनन्तरम् कथं स्मरणं भवेदिति चेच्छृणु—मृगमदवासनावासितवसन इव पूर्वपूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तर-

विज्ञाने संक्रान्तत्वात्स्मरणादेरुपपत्तौ दोषाभावः। अन्तर्हिताया अपि कस्तूर्याः सर्वत्र घटे वासना इव व्यवहितस्यापि विज्ञानस्य सुषुप्त्यनन्तरमपि सम्बन्धे क्लेशाभावादिति तत्त्वम्। तथा च विज्ञानस्यैवात्मत्वं कथं नेति बौद्धस्य शंका, किन्तु नैतद्युक्तम्, तथाहि यदि विज्ञानस्यैवात्मत्वं स्वीक्रियेत तदा तद्विज्ञानं सर्वविषयकम्, यत्किञ्चिद्विषयकं वा ? यदि सर्वजगद्विषयकं ज्ञानमात्मा तथा सर्वोऽपि सर्वज्ञः स्यात्, यदि च यत्किञ्चिद्विषयकज्ञानस्य वात्मत्वमित्यत्र प्रमाणाभावः। किञ्च ज्ञानस्य सविषयत्वेन सुषुप्तावपि विषयावभासः स्यात्।

तदानीं निराकारा चित्सन्ततिरनुवर्तत इति चेत्, न। तस्याः स्वप्रकाशत्वे प्रमाणाभावात्। अन्यथा घटादीनामपि ज्ञानत्वापत्तिः।

ननु सुषुप्तौ विषयासम्बद्धालयविज्ञानपरम्परा भवतीति प्रागुक्तम् ततश्च सुषुप्तौ विज्ञानस्य विषयासम्बन्धत्वेन विषयावभासः (विषयज्ञानम्) कथं स्यादतो विषयासम्बद्धस्य ज्ञानत्वमेव नास्तीति प्रदर्शयति **प्रमाणाभावादित्यन्तेन**। सुषुप्तौ निराकारा (निर्विषया) चित्सन्ततिः (विज्ञानपरम्परा) वर्तते इति तु वक्तुमशक्यम्, विज्ञानपरम्परायाः स्वप्रकाशत्वे प्रमाणाभावात्। प्रमाणाभावेऽपि च तत्र ज्ञानस्वरूपता स्वीकारे घटादीनामपि ज्ञानत्वापत्तिः स्यात्।

न चेष्टापत्तिः विज्ञानव्यतिरिक्तवस्तुनोऽभावादिति वाच्यम्, घटादेरनुभूयमानस्यापलपितुमशक्यत्वात्। आकारविशेष एवायं विज्ञानस्येति चेत्, किमयमाकारोऽतिरिच्यते विज्ञानात्तर्हि समायातं विज्ञानव्यतिरिक्तेन। नातिरिच्यते चेत्तर्हि समूहालम्बने नीलाकारोऽपि पीताकारः स्यात्। स्वरूपतो विज्ञानस्याविशेषात्।

न च घटादयो यावत्पदार्थाः ज्ञानरूपा एव, मन्मते विज्ञानव्यतिरिक्तं किमपि वस्त्वेव नास्तीति वाच्यम्, बाह्याविशेषरूपेण घटत्वादिना (न तु विज्ञानत्वेन) अनुभूयमानस्य केवलं विज्ञानरूपं स्वीकृत्यापलपितुमशक्यत्वात्। न च पृथिवीभेदस्य घटादेर्घटत्वादिनाऽनुभवसत्त्वेऽपि पृथिवीव्यतिरिक्तत्वाभाववत्, स्वर्णस्य कटककुण्डलादिवदेतत्सर्वं घटपटादिवस्तुजातं विज्ञानस्यैवाकारविशेष इति

वाच्यम्, यतो हि यद्याकारविशेष एव तदा अयमाकारविशेषः विज्ञानस्वरूपादभिन्नः, विज्ञानस्वरूप एव वा ? यदि भिन्नस्तदा विज्ञानादतिरिक्ता घटादंयः सिद्धा एव। इत्थं च 'मन्मते विज्ञानातिरिक्तं किमपि वस्तु नास्ति' इति भवदीयसिद्धान्तासङ्गतिर्जाता, यदि च विज्ञानस्वरूप एव तदा विज्ञाने स्वरूपतो भेदाभावादिमे नीलपीते इति समूहालम्बने नीलाकारोऽपि पीताकारतामापद्येत।

अपोहरूपी नीलत्वादिर्विज्ञानधर्म इति चेत्, न। नीलत्वादीनां विरुद्धानामेकस्मिन्नसमावेशात्। इतरथा विरोधावधारणस्यैव दुरुपपादत्वात्। न वा वासनासंक्रमः सम्भवति, मातृपुत्रयोरपि वासनासंक्रमप्रसङ्गात्।

ननु नीलपीतयोरभेदेऽपि तद्धर्मयोनीलत्वपीतत्वयोर्भेदान्नीले पीतबुद्धिरित्यत आशङ्कते –**अपोहरूपेति**। स्वानधिकरणवृत्तित्वमेवापोहरूपत्वम् तथा चोक्तरीत्या न नीले पीतबुद्धिरिति चेत्, न, नीलत्वादीनां विरुद्धानामेकस्मिन्नसमावेशात्। विरुद्धानामपि चैकस्मिन् समावेशस्त्वीकारे विरोधावधारणमेव दुरुपपाद्यं स्यात्। यदपि उत्तरोत्तरस्मरणार्थं विज्ञानस्य विज्ञानान्तरे संक्रमणमुक्तम् तदप्ययुक्तमित्याशयेनाभिधत्ते – **न वेति**। पूर्वपूर्वविज्ञानस्योत्तरज्ञानजनकतया पूर्वविज्ञानविषया उत्तरविज्ञाने संक्रान्ता भवन्तीति स्वीकारे मातुरपि पुत्रजनकतया मात्राऽनुभूता विषयाः गर्भस्थपुत्रस्मृतिपथं गच्छेयुरिति भावः।

न चोपादानोपादेयभावो नियामक इति वाच्यम्, वासनायाः सङ्क्रमासम्भवात्। उत्तरस्मिन्नुत्पत्तिरेव संक्रम इति चेत्, न, तदुत्पादकाभावात्। चितामेवोत्पादकत्वे तदानन्त्यप्रसङ्गः।

उपादानेनानुभूतमुपादेयेनानुभूयते इत्युपादानोपादेयभावो नियामको भविष्यति उपादानञ्चेहासहकृतं कारणमुच्यते, विज्ञानं हि सहकारिकारणम् विनैव विज्ञानान्तरमुत्पादयति, माता तु शुक्रशोणितसहकारेणैव पुत्रमिति न तस्या उपादानकारणत्वमपि तु निमित्तकारणत्वमेवात उपादानकारणाभावाद् विज्ञाने एव संक्रमणं भविष्यति न तु मातृपुत्रयोरपीति चेत्तदपि न, वासनायाः सङ्क्रमासम्भवात्। क्रमधातोः पादविक्षेपरूपोऽर्थोऽस्ति, ज्ञाने पादाद्यभावेन सर्वथा तदसम्भव एवेति तत्त्वम्। न च 'क्रियावाचित्वमाख्यातुमेकोऽत्रार्थः प्रदर्शितः' इति

बलेन धातूनामनेकार्थत्वात्तदर्थस्याविवक्षयोत्पत्तिरूपार्थकल्पनेन दोष इति वाच्यम्, तदुत्पादकाभावात्तदर्थस्यासम्भवात् । यदि तु विज्ञानानामेवोत्पादकत्वं कल्प्यते तदा संस्कारानन्त्यप्रसङ्गः स्यात् ।

क्षणिकविज्ञानेऽतिशयविशेषः कल्प्यत इति चेत्, न, मानाभावात् कल्पना गौरवाच्च । एतेन क्षणिकशरीरेष्वेव चैतन्यं प्रत्युक्तं गौरवातिशये मानाभावाच्च । बीजादावपि सहकारिसमवधानासमवधानाभ्यामेवोपपत्तेः कुर्वद्रूपत्वाकल्पनाच्च ।

यतो हि विज्ञानसन्ततिः क्षणिका, प्रतिक्षणञ्चोत्पद्यते इत्यनन्ता, अतः स्पष्टमेव संस्कारानन्त्यम् । यदि च 'यद्यपि विज्ञानसन्ततिरनन्ता तथापि न सर्वासु संस्कारोत्पादकत्वं कल्प्यते किन्तु तस्याः पश्चात् संस्कार उत्पद्यते पुनस्तस्याः पश्चात् स्मरणं जायते, तस्यामेव संस्कारोत्पादिका शक्तिः कल्प्यते, यथा क्षेत्रस्थ-बीजेष्वङ्कुरजनकतावच्छेदकत्वं न तु कुशूलस्थेष्वपि, यथा वा एकस्थले पार्थक्येन वह्निसत्त्वेऽपि येनाग्निना चन्द्रकान्तमणिसंयोगः तत्रैव दाहाभावः न सर्वत्र, एवमेव चित्संततेरानन्त्येऽपि एकत्रैव संस्कारोत्पादिका शक्तिः कल्प्यते' इति प्रतिपाद्यते तदपि न योग्यम्, प्रमाणाभावात् । न चोत्तरकाले स्मरणमेव प्रमाणम्, कल्पनागौरवात् । अनेककार्यकारणभावकल्पने गौरवादितिभावः । एतेन क्षणिक-शरीरेष्वेव चैतन्यमपि प्रत्युक्तम् गौरवात् अतिशये प्रमाणाभावात् । बीजादावपि सहकारिसमवधानासमवधानाभ्यामेवोत्पत्तौ अङ्कुरजनकतावच्छेदकत्वरूपवैलक्ष-ण्याकल्पनाच्चेति **बौद्धमतनिरसनम् ।।**

अथ नित्यविज्ञानवादिवेदान्तिमतम्—

अस्तु तर्हि क्षणिकविज्ञाने गौरवान्नित्यविज्ञानमेवात्मा 'अविनाशी वाऽरेऽयमात्मा सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिश्रुतेरिति चेत्, न । तस्य सविष-यत्वासम्भवस्य दर्शितत्त्वान् निर्विषयस्य ज्ञानत्वे मानाभावात् सविषयत्वस्या-प्यननुभवात् । अतो विज्ञानादिभिन्नो नित्य आत्मेति सिद्धम् ।

अस्त्विति—ननु क्षणिकविज्ञाने गौरवान्नित्यविज्ञामेवात्मास्तु एवञ्च तस्य नाशासम्भवेन न स्मरणादेरनुपपत्तिरपीति ।

ननु ज्ञानस्य नित्यत्वे आत्मरूपत्वे च किं प्रमाणमिति चेत्, 'अविनाशी-वाऽरेऽयमात्मा सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेरेव प्रमाणत्वात्। तन्न, विज्ञानस्य सविषयकत्वासम्भवस्य 'जगद्विषयकत्वे सर्वज्ञत्वापत्तिः, यत्किञ्चिद्विषयकत्वे विनिगमनाविरहः' इत्यादिना प्रदर्शितत्वात् निर्विषयस्य ज्ञानत्वे मानाभावात्। सविषयत्वस्यापि दर्शितत्वात्। अर्थात् घटविषयकज्ञानवानहमित्याकारकमेव ज्ञानं जायते, न तु घटविषयकं ज्ञानमहमित्याकारकम् इति ज्ञानातिरिक्त एवात्मेति भावः।

सत्यं ज्ञानमिति ब्रह्मपरं जीवे तु नोपयुज्यते। ज्ञानाज्ञानसुखित्वदुःखित्वादिभिर्जीवानां भेदसिद्धौ सुतरामीश्वरभेदः, अन्यथा बन्धमोक्षव्यवस्थानुपपत्तिः।

नन्वात्मनो विज्ञानभिन्नत्वे 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादि श्रुतीनां विरोधः स्यादिति चेन्न, सत्यं ज्ञानमिति तु ब्रह्मपरा श्रुतिरस्ति इति न सा जीवे समुपयुज्यते, ब्रह्मैव ज्ञानस्वरूपमस्ति न तु जीवात्मेति भावः।

ननु ब्रह्मणो ज्ञानस्वरूपत्वे जीवब्रह्मणोरभेदाज्जीवस्यापि ज्ञानस्वरूपत्वं सिद्धमेवेति चेन्न, ज्ञानाज्ञानासुखित्वादिभिर्जीवानां भेदस्य स्पष्टत्वात्। कश्चिज्ज्ञानी, कश्चिदज्ञानी, कश्चिद्दुःखी, इतरः सुखीति दर्शनेन जीवात्मनामेव परस्परं भेदोऽवलोक्यते, ब्रह्मजीवयोर्भेदे तु क्वापि शङ्कैव नास्ति इति भावः।

ननु जीवानामभेद एवास्तु किं भेदेनेति चेत्, न, तथात्वे मोक्षबन्धनव्यवस्थाऽनुपपत्तेः। एकस्मिन् बद्धे सर्वेषां बन्धप्रसङ्गः, एकस्मिन् मुक्ते च सर्वेषां मोक्षप्रसङ्गः इति कश्चिद्बद्धः कश्चिन्मुक्तः इति व्यवस्था व्याहता भवेदिति तत्त्वम्।

योऽपीश्वराभेदबोधको वेदः सोऽपि तदभेदेन तदीयत्वं प्रतिपादयन् स्तौति। अभेदभावनयैव च यतितव्यमिति वदति। अत एव 'सर्व एव आत्मानि समर्पिताः' इति श्रूयते। मोक्षदशायामज्ञाननिवृत्तावभेदो जायत इत्यपि न, भेदस्य नित्यत्वे नाशायोगात्। भेदनाशेऽपि व्यक्तिद्वयं स्थास्यत्येव।

ननु ब्रह्मजीवयोर्भेदस्वीकारे ऐक्यप्रतिपादकानाम् 'तत्त्वमसि' 'एकमेवाद्वितीयं ब्रह्म' 'ब्रह्मविद् ब्रह्मैव भवति' इत्यादिश्रुतीनां का गतिरिति चेच्छृणु—

योऽपीश्वराभेदबोधको वेदः 'तत्त्वमसि' इत्यादिः सोऽपि तदभेदेन (ईश्वराभेदेन) तदीयत्वम् (ईश्वरीयत्वम्) प्रतिपादयन् स्तौति, उभयोरभेदभावनयैव यत्नो विधेय इति सारः। अतएव (ब्रह्मजीवयोर्भेदादेव) सर्व एवात्मनि समर्पिताः अर्थात् सर्व एव जीवात्मानः ब्रह्मणि समर्पिता इति श्रूयते। द्वयोरैक्ये तु स्वस्य स्वस्मिन् समर्पणाभावादाधाराधेयभावोऽनुपपन्न एव स्यात्।

ननु पूर्वं तु ब्रह्मजीवयोर्भेद एवास्ति किन्तु मोक्षदशायामज्ञाननिवृत्तावभेदो जायत एवेति चेत्, न, भेदस्य नित्यत्वेन नाशायोगात्। ययोः पदार्थयोर्भेदोऽस्ति तयोरभेदप्रतीतिर्न कदापि सम्भवतीति ब्रह्मजीवयोरभेदप्रतीतिस्सर्वदा दुर्लभैवेति भावः। अतो भेदनाशेऽपि व्यक्तिद्वयं स्थास्यत्येव।

न च द्वित्वमपि नश्यतीति वाच्यम्। तव निर्धर्मके ब्रह्मणि सत्यत्वाभावेऽपि सत्यस्वरूपं, तदितिवद् द्वित्वाभावेऽपि व्यक्तिद्वयात्मकौ ताविति सुवचत्वात्। मिथ्यात्वाभावोऽधिकरणात्मकस्तत्र सत्यत्वमिति चेदेकत्वाभावो व्यक्तिद्वयात्मको द्वित्वमप्युच्यताम्। प्रत्येकमेकत्वेऽपि पृथिवीजलयोर्न गन्ध इतिवदुभयं नैकमित्यस्य सर्वजनसिद्धत्वात्। योऽपि तदानीमभेदप्रतिपादको वेदः सोऽपि निर्दुःखत्वादिना साम्यं प्रतिपादयति। सम्पदाधिक्ये 'पुरोहितोऽयं राजा संवृत्त' इतिवत्। अत एव 'निरञ्जनः परमं साम्यमुपैति' इति श्रूयते।

ननु ब्रह्मणो निर्धर्मकतया तत्र द्वित्वं कथं स्यादिति चेत्, तव मते निर्धर्मके ब्रह्मणि सत्यत्वाभावेऽपि सत्यस्वरूपं तदितिवद् द्वित्वाभावेऽपि व्यक्तिद्वयात्मकौ ताविति सुवचत्वात्। सत्यत्वाभावेऽपि सत्यस्वरूपं ब्रह्मेति प्रतीतिवद् द्वित्वाभावेऽपि 'द्वाविति' प्रतीतेर्निर्बाधकत्वात् इति तत्त्वम्।

नन्वत्र निर्धर्मकत्वम् ब्रह्मण्यनया रीत्या अस्ति यत् 'स्वभिन्नधर्मशून्यत्वम्' नाम तत्, तथा च सत्यत्वमत्र मिथ्यात्वाभावरूपम्, अपरम् अभावोऽधिकरणरूप इति सत्यत्वम् ब्रह्मरूपमेवातः स्वभिन्नधर्मशून्यत्वेन निर्धर्मकत्वं नानुपपन्नमिति चेत्, एकत्वाभावाधिकरणस्वरूप-व्यक्तिद्वयात्मकद्वित्वमस्तीत्यप्युच्यताम्। मम (नैयायिकस्य) मते त्वभावस्याधिकारणत्वमेव नास्ति अतः शङ्कैव दूरेऽपास्ता वर्तते।

ननु ब्रह्मणि एकत्वस्य सत्त्वात् कथमेकत्वाभावरूपद्वित्वसत्तेति चेत्, पृथिव्यां गन्धसत्त्वेऽपि पृथिवीजलयोर्न गन्धः इति बोधवद् ब्रह्मण्येकत्वसत्त्वेऽपि उभयत्रैकत्वाभावेन द्वित्वप्रतीतेः सुलभत्वमाकलनीयम् ।

न च मोक्षदशायामपि भेदस्वीकारे 'ब्रह्मविद् ब्रह्मैव भवति' इत्याद्यभेदकत्व-प्रतिपादकश्रुतीनाम् विरोधः स्यादिति वाच्यम्' सम्पदाधिक्ये पुरोहितोऽयं राजा संवृत्त इति साम्यबोधवन्मोक्षदशायाम् अभेदप्रतिपादिकायाः श्रुतेर्निर्दुःखत्वादिना साम्यप्रतिपादनरूपार्थकल्पनेनादोषात् । अतएव 'निरञ्जनः परमं साम्यमुपैति' अर्थात् निर्दुःखः परमं साम्यम् ब्रह्मरूपतामुपैति प्राप्नोति, 'द्वे ब्रह्मणी वेदितव्ये', 'द्वौ सुपर्णौ सयुजौ सहायौ समानं वृक्षं परिषस्वजाते' इत्यादि श्रूयते ।

ईश्वरोऽपि न ज्ञानसुखात्मा किन्तु ज्ञानाद्याश्रयः 'नित्यं विज्ञानमानन्दं ब्रह्म' इत्यादौ विज्ञानपदेन ज्ञानाश्रय एवोक्तः 'यः सर्वज्ञः सर्ववित्' इत्याद्यनुरोधात् । आनन्दमित्यस्याप्यानन्दवदित्यर्थः । अर्श आदित्वान्मत्वर्थीयाच्-प्रत्ययात् । अन्यथा पुंल्लिङ्गत्वापत्तिः । आनन्दोऽपि दुःखाभावे उपचर्यते, भाराद्यपगमे सुखी संवृत्तोहमितिवत् दुःखाभावेन सुखित्वप्रत्ययात् ।

ईश्वरोऽपि च न ज्ञानसुखरूपः (ज्ञानं सुखं वेश्वरो न) अपितु ज्ञानाद्याश्रयः । ननु ईश्वरस्य ज्ञानरूपत्वाभावे 'नित्यं विज्ञानमानन्दं ब्रह्म' इत्यादिश्रुतीनां विरोधः स्यादिति चेत्, न । 'यः सर्वज्ञः स सर्वविदि'त्याद्यनुरोधेन विज्ञानानन्दपदाभ्यामपि स ईश्वरो विज्ञानाश्रयः आनन्दाश्रय इति कल्पनेनादोषात् ।

ननु विज्ञानपदस्य श्रुत्यन्तरानुरोधेन विज्ञानाश्रये लक्षणा स्यान्नाम, किन्तु आनन्दपदस्यानन्दवत्त्वार्थकत्वे किं प्रमाणमिति चेत्, 'आनन्दः अस्त्यस्मिन्नि'ति व्युत्पत्त्या मत्वर्थीयाच्-पदेन तत्सिद्धिर्बोध्या । अत एव आनन्दमिति नपुंसक-लिङ्गनिर्देशः, अजन्तत्वास्वीकारे आनन्दशब्दस्य पुंस्त्वेन नपुंसकत्वनिर्देशो वैयर्थ्यमापद्येत ।

नन्वानन्दस्य सुखरूपतया सुखस्य च धर्मजन्यत्वेन ईश्वरे च धर्माभावेन कथमस्यानन्दाश्रयत्वं स्यादिति चेच्छृणु—आनन्दोऽपि दुःखाभावे लाक्षणिकः

(लक्षणया बोध्यते) भाराद्यपगमे सुखी संवृत्त इतिवत्। दुःखाभावेन सुखित्व-प्रत्ययात्।

अस्तु वा तस्मिन्नानन्दो नत्वसावानन्दः 'असुखम्' इति श्रुतेः। न विद्यते सुखं यस्येति कुतो नार्थ इति चेत्, न। क्लिष्टकल्पनापत्तेः प्रकरणविरोधादानन्द-मित्यत्र मत्वर्थीयाच्-प्रत्ययविरोधात्। 'आनन्दं ब्रह्मणो विद्वान्' इत्यत्र भेदस्य स्पष्टत्वाच्चेति संक्षेपः।

अस्तु वा तस्मिन्नानन्दः, किन्त्वयमानन्दस्वरूपो न। किं प्रमाणमिति चेत्, 'असुखम्' इत्यादिश्रुतीनामेव प्रमाणत्वात्। तत्र न विद्यते सुखं यस्येति बहुव्रीहिस्तु न शङ्क्यः क्लिष्टकल्पनापत्तेः। अन्यपदार्थापेक्षबहुव्रीहिसमासापेक्षया समस्यमान-पदार्थापेक्षकर्मधारये लाघवादिति भावः। 'अनणु' 'अस्थूलम्' 'अदीर्घम्' इत्यादौ सर्वत्रैव तस्य दर्शनेनैकत्र बहुव्रीहिकल्पने प्रकरणविरोधस्य आनन्दमित्यत्राच्-प्रत्ययविरोधस्य च स्पष्टत्वादिति सङ्क्षेपः।

अथ साङ्ख्यमतनिराकरणम्—

एतेन—'प्रकृतिः कर्त्री पुरुषस्तु पुष्करपलाशवन्निर्लेपः, किन्तु चेतनः। कार्यकारणयोरभेदात् कार्यनाशे सति कार्यरूपतया तन्नाशो न स्यादित्यकारणत्वं तस्य। बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्या तत्कल्पनम्।

एतेनेति—वक्ष्यमाणप्रकारेणेति भावः। एतेनेत्यस्यापास्तमित्यत्रान्वयः। सांख्यमते संसारस्य प्रकृतिः कर्त्री, पुरुषस्तु प्रकृत्या सहाभेदभावमाश्रित्य कर्तृत्व-मापन्नोऽपि कमलपत्रवन्निर्लेप एव। प्रकृतिपुरुषयोश्च पुरुष एव चेतनो न तु प्रकृतिरियान् भेदः।

ननु यदि पुरुषस्य प्रकृत्या सहाभेदस्तर्हि तस्यापि कारणत्वं कथं नेति चेच्छृणु—कार्यकारणयोरभेदात्कारणस्यापि कार्यरूपत्वेन कार्यनाशे कारणरूपपुरुषस्यापि नाशो यथा न भवेदतस्तस्याकारणत्वम्।

ननु प्रकृत्याः कर्त्रीत्वे पुरुषोऽप्रयोजनक इति चेन्न, बुद्धिगतचैतन्यस्यान्यथानु-पपत्त्या तत्कल्पनस्यावश्यकत्वात्।

ननु प्रकृतिरेव चेतना कथं नेति चेन्न, कार्यकारणयोरभेदेन प्रकृतिकार्याणां घटपटादीनामपि चेतनत्वापत्तेः ।

बुद्धिश्च प्रकृतेः परिणामः । सैव महत्तत्त्वमन्तःकरणमित्युच्यते । तत्सत्त्वासत्त्वाभ्यां पुरुषस्य संसारापवर्गौ । तस्या एवेन्द्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिना संबन्धः । पुरुषेकर्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्च भेदाग्रहात् ।

ननु यदि प्रकृतिरेव कार्यं करोति तदा बुद्धौ चैतन्यं भवतु मा वा इत्यत आह— **बुद्धिश्चेति ।** ननु बुद्धिस्तु नित्या तस्याः कथं भविष्यति परिणाम इति चेन्न, प्रकृतिशब्देन तत्समीपवर्त्यन्तःकरणस्य ग्रहणात् । परिणतमन्तःकरणमेव बुद्धिस्तदाह— **सैवेति ।**

ननु प्रकृतेः कर्तृत्वे पुरुषस्य कर्तृत्वाभावेन धर्माधर्मयोरभावेन सुखदुःखाद्युत्पत्तिर्न स्यादित्यत आह—**तदिति ।** बुद्धिसत्त्वे एव ज्ञानाद्युत्पत्तिस्तथा च तदेव ज्ञानमीश्वरस्य संसारापादकमिति भावः । बुद्धेरभावे तु ज्ञानस्य परिणामरूपत्वेनानुत्पत्तौ पुरुषस्य मोक्षो जायते ।

ननु बुद्धिज्ञानयोरेकतया ज्ञानस्य बुद्धिपरिणामिता कथं भवेदित्याह— **तस्या इति ।** यथा कौपं जलं प्रणालिकया केदारमासाद्य तद्रूपतामासादयति, तथैव बुद्धिरपि इन्द्रियद्वारा विषयदेशं गत्वा तदाकारतामापद्यते, इति तदाकारताभजनमेव ज्ञानम् ।

ननु कर्त्र्याश्चेतनभिन्नत्वे 'चेतनोऽहं करोमि' इत्यादौ चेतनकर्तृत्वयोरेकाधिकरणतया कथं स्यादिति चेच्छृणु—पुरुषे कर्तृत्वाभिमानः, बुद्धौ चैतन्याभिमानश्च मृत्तिकायुक्ते वर्षाकालिकजले जलमृत्तिकयोर्भेदाभाव इव भेदाग्रहाद् भवति । बुद्धौ चैतन्यम्, पुरुषे कर्तृत्वञ्च भ्रमात्मकमिति तत्त्वम् ।

ममेदं कर्तव्यमिति मदंशः पुरुषोपरागः, बुद्धेः स्वच्छतया चेतनप्रतिबिम्बादतात्त्विकः, दर्पणस्येव मुखोपरागः । इदमिति विषयोपरागः इन्द्रियप्रणालिकया परिणतिभेदस्तात्त्विकः, निःश्वासाभिहतदर्पणस्येव मलिनिमा । कर्तव्यमिति

व्यापारांशः । तेनांशत्रयवती बुद्धिः । तत्परिणामेन ज्ञानेन पुरुषस्यातत्त्विकः सम्बन्धो दर्पणमलिनिम्नेव मुखस्य उपलब्धिरुच्यते । ज्ञानादिवत् सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि बुद्धेरेव, कृतिसामानाधिकरण्येन प्रतीतेः ।

तत्र बुद्धावंशत्रयं वर्तते इति तदेव प्रतिपादयति—**ममेदमित्यादिना ।** ममेदं कर्तव्यमित्यादौ मदंशः पुरुषस्य संबन्धः, किन्तु सोऽतात्त्विकः बुद्धेः स्वच्छतया तस्यां पुरुषस्य प्रतिबिम्बात्, दर्पणे मुखस्योपरागो यथेति । कश्चिदपि स्वच्छदर्पणे स्वीयप्रतिबिम्बमालोक्यायमहमित्याकलयति, किन्तु वस्तुगत्या स न, अपितु तत्प्रतिबिम्ब एव यथातथेति तत्त्वम् । इदमिति विषयस्य सम्बन्धः इन्द्रियप्रणालिकया परिणतिभेदस्तात्त्विकः, निःश्वासाभिहतस्य दर्पणस्येव मलिनिमा । कर्तव्यमिति व्यापारांशः । एवमंशत्रयेण बुद्धौ पुरुषस्य, विषयस्य, व्यापारस्य च सम्बन्धो वर्तते । तत्परिणामेन ज्ञानेन पुरुषस्य सम्बन्धो दर्पणमलिनिम्ना मालिन्यविशिष्टमुखस्योपलब्धिरेवोच्यते । एतेन ज्ञानचैतन्ययोर्भेदः प्रतीयते एवञ्च पुरुषे चैतन्यसत्त्वेऽपि बुद्धिपरिणामरूपज्ञानवत्त्वं बुद्धावेव । ज्ञानन्तु प्रकाशरूपं नास्ति, अतएव तत्प्रकाशनार्थं पृथक्पुरुषः कल्प्यते, अपरञ्च सुखदुःखे अदृष्टवशादुत्पद्येते, अदृष्टञ्च विहितनिषिद्धकर्मभ्यः समुत्पद्यते, एवञ्च कृत्याश्रयत्वं तत्रैव सुखाद्युत्पत्तेरौचित्येन ज्ञानादिवत् सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि बुद्धेरेव ।

'न च बुद्धिश्चेतना, परिणामित्वात्' इति मतमपास्तम् । कृत्यदृष्टभोगानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेस्तद्भिन्ने मानाभावाच्च ।

ननु बुद्धिरेव चेतनास्तु किं पृथक् पुरुषस्वीकारेणेति चेन्न, बुद्धिः परिणामिनी (कार्यरूपा) अस्तीति तत्र चैतन्यासम्भवात् । यदि तस्याः परिणामो भवति तदा सा कार्यरूपा जातेति तत्र चैतन्यस्य सर्वथाऽसम्भव एवेति भावः, इति वदन्तः साङ्ख्यमतानुयायिनो वक्ष्यमाणहेतुना परास्ताः । यतो हि कृत्य-दृष्ट-भोगानामिव चैतन्यस्यापि प्रतीतिस्तत्रैव युक्ता, तद्भिन्ने प्रमाणाभावात् ।

चेतनोऽहं करोमीति प्रतीतिश्चैतन्यांशे भ्रम इति चेत् कृत्यंशेऽपि किं नेष्यते । अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावोऽनित्यत्वे तत्पूर्वमसंसारापत्तिः ।

यदि च चेतनोऽहं करोमीत्यादौ चेतनरूपा प्रतीतिश्चैतन्यांशे भ्रमस्तदा कृत्यंशे एव कथं न भ्रमः स्वीक्रियते। अन्यथा यदि चेतनकर्त्र्योर्भेदः, प्रकृतेश्च कर्तृत्वम् (बुद्धेर्नित्यत्वम्) तदा यदि तु बुद्धेर्नित्यत्वम् तदा नित्यस्य नाशासम्भवेन पुरुषस्य मोक्षाभावो भवेत्, यदि चानित्यत्वं तदा तत्पूर्वमसंसारापत्तिः स्यात्।

नन्वचेतनायाः प्रकृतेः कार्यत्वाद् बुद्धेरचैतन्यं कार्यकारणयोस्तादात्म्यादिति चेत्, न। असिद्धेः। कर्तुर्जन्यत्वे मानाभावात्। वीतरागजन्मादर्शनादनादित्वम्। अनादिभावस्य नाशासंभवान्नित्यत्वम्। तत् किं प्रकृत्यादिकल्पनेन।

नन्वचेतनायाः प्रकृतेः कार्यत्वादबुद्धेरचैतन्यमस्ति, कार्यकारणयोरभेदादिति चेन्न, असिद्धेः। कर्ताजन्य एव भवतीत्यत्र प्रमाणाभावादिति निष्कर्षः। रागरहितस्य जन्म न भवति किन्तु सरागस्यैवेति वीतरागजन्मादर्शनात् कर्तुरनादित्वम्, अनादेर्नाशासम्भवान्नित्यत्वम्। अयं भावः—उत्पत्त्यन्तरं बालकस्य स्तन्यपानप्रवृत्तिरिष्टसाधनताज्ञानं विना न सम्भवति इष्टसाधनताज्ञानञ्चानुभवं विना न संभवति, अतस्तदनुभवस्येदानीन्तनत्वासम्भवेन जन्मान्तरीयत्वं कल्प्यते इति कर्तुरनादित्वं स्पष्टमेव, इत्थञ्च प्रकृत्यादि-पृथक्कल्पना व्यर्थैवास्ति।

न च—

'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहङ्कारविमूढात्मा कर्ताहमिति मन्यते ॥"

इत्यनेन विरोध इति वाच्यम्, प्रकृतेरदृष्टस्य गुणैरदृष्टजन्यैरिच्छादिभिः कर्ता अहमेवेत्यस्य तदर्थत्वात्। 'तत्रैवं सति कर्तारमात्मानं केवलं तु यः' इत्यादि वदता भगवता प्रकटीकृतोऽयमुपरिष्टादाशय इति संक्षेपः।

ननु प्रकृतेरकर्तृत्वे —'प्रकृतेः क्रियमाणनि' (भगवद्गीता ३।२७) इत्यादि गीतावचनविरोधः स्यादिति चेन्न, प्रकृतेः अदृष्टस्य गुणैरदृष्टजन्यैरिच्छादिभिः कर्ताऽहमेवेत्यस्य तदर्थत्वात्। 'तत्रैवं सति कर्तारमात्मानं केवलं तु यः' इत्यादि वदता भगवता तदर्थस्य अग्रे स्पष्टीकृतत्वात् इति कृतं भूम्ना ॥४६॥

धर्माधर्माश्रय इति। आत्मेत्यनुषज्यते। शरीरस्य तदाश्रयत्वे देहान्तरकृतकर्मणां देहान्तरेण भोगानुपपत्तेः। विशेषगुणयोगत इति। योग्यविशेषगुणस्य

ज्ञानसुखादेः संबन्धेनात्मनः प्रत्यक्षत्वं संभवति न त्वन्यथा अहं जाने अहं करोमीत्यादि प्रतीतेः ।।४६।।

(अस्यांशस्य बालबोधिनी नोपलब्धा ।)

प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः ।
अहङ्कारस्याश्रयोऽयं मनोमात्रस्य गोचरः ।।५०।।

प्रवृत्त्येति । अयमात्मा परदेहादौ प्रवृत्त्यादिनाऽनुमीयते । प्रवृत्तिरत्र चेष्टा । ज्ञानेच्छाप्रयत्नादीनां देहेऽभावस्योक्तप्रायत्वाच्चेष्टायाश्च प्रयत्नसाध्यत्वाच्चेष्टाया प्रयत्नवानात्माप्यनुमीयत इति भावः ।

प्रवृत्त्येति—अयमात्मा रथगत्या सारथिरिव प्रवृत्याद्यनुमेयः, अयमहङ्काराश्रयः, मनोमात्रस्य गोचरः इति कारिकार्थः स्पष्ट एव ।

ननु पुर्वोक्तप्रकारेण स्वात्मसिद्धावपि परात्मसिद्धौ किं प्रमाणमित्यत आह—**अयमिति** । आदिना निवृत्तियत्नादिपरिग्रहः । इह प्रवृत्तिशब्देन चेष्टा, उत्कटरागजन्यः प्रयत्नविशेष इति यावत्, निवृत्तिशब्देन चोत्कटद्वेषजन्यो यत्नविशेषो गृह्यते । **अनुमीयत इति**—अनुमानप्रकारस्त्वित्थम्—'देवदत्तादिशरीरगता चेष्टा चेतनप्रयत्नसाध्या, चेष्टात्वात्, अस्मदादिशरीरचेष्टावत् । चैत्रादिशरीरञ्चैतन्यवत्, प्रवृत्याद्याश्रयत्वात्, यन्नैवं तन्नैवं, यथा घट इत्यादि ।

अत्र दृष्टान्तमाह—रथेति । यद्यपि रथकर्म चेष्टा न भवति । तथापि तेन कर्मणा सारथिर्यथाऽनुमीयते तथा चेष्टात्मकेन कर्मणा परात्मापीति भावः । अहङ्कारस्येति । अहङ्करोऽहमिति प्रत्ययस्तस्याश्रयो विषयः आत्मा न शरीरादिरिति । मन इति । मनोभिन्नेन्द्रियजन्यप्रत्यक्षाविषयो मानसप्रत्यक्षविषयश्चेत्यर्थः । रूपाद्यभावेनेन्द्रियान्तरायोग्यत्वात् ।।५४।।

(अस्यांशस्य बालबोधिनी नोपलब्धा)

।। इत्यात्मनिरूपणम् ।।

विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता ।
अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा ।।५१।।

विभुरिति । विभुत्वं परममहत्त्ववत्त्वम् । तच्च पूर्वोक्तमपि स्पष्टार्थमुक्तम् । बुद्ध्यादीति । बुद्धिसुखदुःखेच्छादयश्चतुर्दशगुणाः पूर्वोक्ता वेदितव्याः । अत्रैव प्रसङ्गाद् बुद्धेः कतिपयं प्रपञ्चं दर्शयति बुद्धिस्त्विति । द्वैविध्यं व्युत्पादयति—अनुभूतिरिति । अनुभूतिश्चतुर्विधेति । एतासां चतसृणां करणानि चत्वारि 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि' इति सूत्रोक्तानि वेदितव्यानि ।।५१।।

विभुरिति—अयमात्मा विभुः व्यापकः, बुद्ध्यादिगुणवान्, बुद्ध्यादिगुणयुक्तः। बुद्धिस्तु द्विविधा, तदुक्तं—'सर्वव्यवहारहेतुर्गुणो बुद्धिः, सा द्विविधा, स्मृतिरनुभवश्च'। तत्रानुभवो द्विविधः, यथार्थोऽयथार्थश्चेति। तद्वति तत्प्रकारकोऽनुभवो यथार्थः, तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः यथा शुक्तौ रजतम्। यथार्थानुभवश्चतुर्विधः, प्रत्यक्षानुमित्युपमितिशाब्दभेदादिति। शेषः स्पष्टोऽर्थः ।।५१।।

प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे ।
घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम् ।।५२।।

प्रत्यक्षमिति—प्रत्यक्षानुमानोपमानशब्दाः चत्वारि प्रमाणानि इति भावः। यद्यपि प्राभाकरमतेऽर्थापत्तेर्भाट्टवेदान्तिमतेऽनुपलब्धेः, पौराणिकमते सम्भवैतिह्ययोरपि प्रमाणत्वम्, तथापि तेषामप्यत्रैव चतुर्ष्वन्तर्भावात् पृथङ्नोपपादनम्। अन्तर्भावप्रकारश्चाग्रे स्फुटीभविष्यति। **घ्राणजादीति**—घ्राणजरासनचाक्षुषस्पार्शनश्रौत्रमानसप्रभेदेन प्रत्यक्षं षड्विधं मतमिति भावः।

प्रत्यक्षमिति—इन्द्रियजन्यं ज्ञानं प्रत्यक्षम्। यद्यपि मनोरूपेन्द्रियजन्यं सर्वमेव ज्ञानं तथापीन्द्रियत्वेन रूपेणेन्द्रियाणां यत्र ज्ञाने कारणत्वं तत् प्रत्यक्षमिति विवक्षितम्।

प्रत्यक्षं षड्विधमिति कथितम्, तत्र प्रत्यक्षमेव किमित्याशङ्कायामाह—**इन्द्रियजन्यमिति।**

न च सर्वस्यापि ज्ञानस्य मनोरूपेन्द्रियजन्यत्वेन 'पर्वतो वह्निमान्, धूमात्' इत्यादावपि प्रत्यक्षलक्षणमतिव्याप्नुयादिति वाच्यम्, इन्द्रियत्वेनरूपेण यत्र ज्ञाने

इन्द्रियाणां कारणत्वं तदेवेन्द्रियजन्यं ज्ञानम् प्रत्यक्षमित्यनेन गृह्यते इतिकल्पनेनादोषात्, एवञ्च ज्ञानमात्रं प्रति मनसो नेन्द्रियत्वेन रूपेण कारणत्वमपि तु मनस्त्वेनेति अनुमानोपमानादौ मनःसहकृततत्तज्ज्ञाने जातेऽपि न प्रत्यक्षत्वमिति बोध्यम् ।

ईश्वरप्रत्यक्षं तु न लक्ष्यम् । 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्' इति सूत्रे तथैवोक्तत्वात् ।

नन्वेवमपीश्वरप्रत्यक्षस्येन्द्रियजन्यत्वाभावेन तत्राव्याप्तिरित्यत आह—**ईश्वरेति** । जन्यप्रत्यक्षमेवानेन लक्षणेन लक्ष्यते नेश्वरप्रत्यक्षमिति भावः । तत्रैव प्रमाणमाह—**इन्द्रियार्थेति** । इन्द्रियाणां चक्षुरादीनां अर्थस्य विषयस्य च सन्निकर्षेण सम्बन्धेन उत्पन्नम्, अव्यपदेश्यम् (व्यपदेष्टुं शब्देन प्रयोक्तुमयोग्यम्) शब्दप्रयोगायोग्यम् निर्विकल्पकमिति यावत्, अव्यभिचारि न व्यभिचरितं शीलम्, भ्रमभिन्नम्, विशिष्टवैशिष्ट्यावगाहि .सविकल्पकमिति यावत्; एवंभूतं ज्ञानं प्रत्यक्षमिति सूत्रार्थः ।

अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षम् । अनुमितौ व्याप्तिज्ञानस्य, उपमितौ सादृश्यज्ञानस्य, शाब्दबोधे पदज्ञानस्य, स्मृतावनुभवस्य कारणत्वात्तत्र तत्र नातिव्याप्तिः । इदं लक्षणमीश्वरप्रत्यक्षसाधारणम् ।

एवं जन्यप्रत्यक्षमुक्त्वा इदानीं ईश्वरप्रत्यक्षसाधारणलक्षणमाह—**अथवेति** ।

परामर्शजन्यं ज्ञानमनुमितिः । यद्यपि परामर्शप्रत्यक्षादिकं परामर्शजन्यं हेत्वविषयकं यज्ज्ञानं तदेवानुमितिः ।

प्रदर्शितप्रमाणचातुर्विध्ये प्रत्यक्षानन्तरमनुमितिं लिलक्षयिषुराह—**परामर्शजन्यमिति** । परामर्शलक्षणन्तु—व्याप्तिविशिष्टपक्षधर्मताज्ञानम् यथा—'वह्निव्याप्यधूमवानयं पर्वतः' इति, तज्जन्यं 'पर्वतो वह्निमा'नित्याकारकं ज्ञानमनुमितिः ।

ननु परामर्शजन्यमित्येवोच्यतां किं ज्ञानपदेनेति चेन्न, तथात्वे सति परामर्शध्वंसस्यापि परामर्शजन्यत्वेन तत्रातिव्याप्तेः । एवञ्च परामर्शजन्यत्वे सति ज्ञानत्वमनुमितित्वम् इति लक्षणस्वीकारे परामर्शध्वंसस्य परामर्शजन्यत्वेऽपि तस्य ज्ञानत्वाभावान्न दोषः ।

नन्वेवमपि पूर्वोक्तपरामर्शलक्षणेन 'वह्निव्याप्य धूमवानयं पर्वतः' इत्याकारके परामर्शे जाते 'वह्निव्याप्यधूमवानयं पर्वतः' इति परामर्शप्रत्यक्षे तथाभूतस्य परामर्शस्यापि कारणत्वेन पूर्वोक्तानुमितिलक्षणं प्रत्यक्षेऽतिव्याप्नुयादित्याशङ्क्य समाधत्ते—**हेत्वविषयकमिति**। परामर्शजन्यं यत् हेत्वविषयकम् **पर्वतो वह्निमानित्याकारकं** ज्ञानं तस्यैवानुमितित्वमिति भावः। इत्थञ्च वह्निव्याप्यधूमवानयं पर्वत इत्याकारकपरामर्शज्ञानस्य धूमरूपहेतुविषयकत्वेन न दोषः।

न च कादाचित्कहेतुविषयकानुमितावव्याप्तिरिति वाच्यम्, तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्।

ननु परामर्शजन्यं हेत्वविषयकं यज्ज्ञानं तदेवानुमितिरिति अनुमितिलक्षणस्वीकारे येषां मते 'धूमवानयं पर्वतो वह्निमान्' इत्याकारिका हेतुविषयिकैवानुमितिर्भवति तेषां मते 'धूमवान् पर्वतो वह्निमान्' इत्याकारिकायाः अनुमितेर्हेतुविषयकत्वेन तत्राव्याप्तिः स्यादत आह—**तादृशेति**। परामर्शजन्यहेत्वविषयकज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वमिति कल्पनेनेति भावः। एवञ्च परामर्शजन्यहेत्वविषयकं ज्ञानम् 'पर्वतो वह्निमान्' इत्याकारकम् तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिः अनुमितित्वजातिः, तादृशजातिमत् 'धूमवान् पर्वतो वह्निमान्' इत्याकारकं ज्ञानम्, इति लक्षणसमन्वयः।

अथवा व्याप्तिज्ञानकरणकं ज्ञानं अनुमितिः। एवं सादृश्यज्ञानकरणक ज्ञानमुपमितिः। पदज्ञानकरणकं ज्ञानं शाब्दबोधः।

अनुमित्यादेर्लक्षणान्तरमाह—**अथवेति**।

नन्वनुमित्यादिकं प्रति व्याप्तिज्ञानादेर्न व्याप्तिज्ञानत्वादिरूपेण कारणतापि तु ज्ञानत्वेनैवेत्यनुमित्यादिरूपकार्ये ज्ञानत्वरूपकारणस्यैकतया परस्परं भेदो न स्यादित्यरुचेराह—

वस्तुतो यां काञ्चिदनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्ति-प्रत्यक्षावृत्तिजातिमत्त्वमनुमितित्वम्। एवं यत् किञ्चित्प्रत्यक्षादिकमादाय तद्घटितवृत्त्यनुमित्यवृत्तिजातिमत्त्वं प्रत्यक्षत्वादिकं वाच्यमिति।

वस्तुतस्त्विति—यां काञ्चिदनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्ति-प्रत्यक्षाद्य-वृत्तिजातिमत्त्वम् अनुमितित्वम्, एवं यां काञ्चित् प्रत्यक्षव्यक्तिमादाय तद्व्यक्तिवृत्ति अनुमित्याद्यवृत्तिजातिमत्त्वम् प्रत्यक्षत्वम्, एवं यां काञ्चिदुपमितिव्यक्तिमादाय तद्व्यक्तिवृत्ति-अनुमित्याद्यवृत्तिजातिमत्त्वं उपमितित्वम्, यां काञ्चिच्छाब्दव्यक्ति-मादाय तद्व्यक्तिवृत्ति-प्रत्यक्षाद्यवृत्तिजातिमत्त्वम् शाब्दत्वमेवं सर्वं लक्षणं स्वीकार्यम् इति निष्कर्षः। इत्थञ्च 'पर्वतो वह्निमान्' इत्याद्यनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्तिः, 'पटं पश्यामि' इत्यादिप्रत्यक्षव्यक्त्यवृत्तिः 'गोसदृशो गवयः' इत्या-द्युपमितिव्यक्त्यवृत्तिश्च जातिः अनुमितित्वजातिः, तादृशजातिमत्त्वस्य 'पर्वतो वह्निमान्' इत्यादावेव सत्त्वेन न तत्र दोष इत्याकलनीयम्।

जन्यप्रत्यक्षं विभजते—घ्राणजादीति। घ्राणजं, रासनं, चाक्षुषं, स्पार्शनं, श्रौत्रं, मानसमिति षड्विधं प्रत्यक्षम्। न चेश्वरप्रत्यक्षस्याविभजनान्न्यूनत्वं जन्य-प्रत्यक्षस्यैव निरूपणीयत्वादुक्तसूत्रानुसारात् ।।५२।।

एवं प्रत्यक्षादिलक्षणमुक्त्वा इदानीं पूर्वोक्तजन्यप्रत्यक्षं विभजते—**घ्राणजादीति ।।५२।।**

घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः ।
तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुतेः ।।५३।।

घ्राणस्येति। गोचर इति ग्राह्य इत्यर्थः। गन्धत्वादिरिति। आदिपदात् सुरभित्वासुरभित्वपरिग्रहः। गन्धस्य प्रत्यक्षत्वात्तद्वृत्तिजातिरपि प्रत्यक्षा। गन्धाश्रयग्रहणे तु घ्राणस्य न सामर्थ्यमिति बोध्यम्। तथा रस इति। रसत्वादि-सहित इत्यर्थः। तथा शब्दोऽपि शब्दत्वादिसहितः। गन्धो रसश्च उद्भूतो बोध्यः ।।५३।।

उक्त षड्विधप्रत्यक्षमध्ये कस्य केनेन्द्रियेण प्रत्यक्षमित्यत आह—**घ्राणस्येति।** गन्धः घ्राणस्य गोचरः गन्धत्वादिः (आदिना सुरभित्वादिः) अपि घ्राणस्य घ्राणे-न्द्रियस्य गोचरः स्मृतः। तथा रसः रसज्ञायाः जिह्वाया गोचरः तथा शब्दश्च श्रुतेर्गोचरः, इति कारिकाशयः। गन्धाश्रयः पुष्पादिः तद्ग्रहणे तु न घ्राणस्य सामर्थ्यमपि तु चक्षुरादेरिति ध्येयम् ।।५३।।

उद्भूतरूपं नयनस्य गोचरो,
द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये ।
विभागसंयोगपरापरत्व-
स्नेहद्रवत्वं परिमाणयुक्तम् ।।५४।।

उद्भूतरूपमिति । ग्रीष्मोष्मादावनुद्भूतं रूपमिति न तत् प्रत्यक्षम् । तद्वन्ति उद्भूतरूपवन्ति ।

(स्पष्टार्थत्वादव्याख्यातम्)

क्रियाजातियोग्यवृत्तिः समवायश्च तादृशः ।
गृह्णाति चक्षुः संबन्धादालोकोद्भूतरूपयोः ।।५५।।

क्रियामिति—चक्षुर्नेत्रम्, आलोकोद्भूतरूपयोः संयोगाद् योग्यवृत्तिम्, (प्रत्यक्ष-योग्यवृत्तिम्) क्रियाम्, जातिम्, तादृशम् (प्रत्यक्षयोग्यवृत्तिम्) समवायश्च गृह्णातीति कारिकाशयः ।

योग्येति । पृथक्त्वादिकमपि योग्यव्यक्तिवृत्तितया बोध्यम् । तादृशः योग्यव्यक्तिवृत्तिरित्यर्थः ।।

चक्षुर्योग्यत्वमेव कथं तदाह—गृह्णातीति । आलोकसंयोग उद्भूतरूपं च चाक्षुषप्रत्यक्षे कारणम् । तत्र द्रव्यचाक्षुषं प्रति तयोः समवायसंबन्धेन कारणत्वम् । द्रव्यसमवेतरूपादिप्रत्यक्षे स्वाश्रयसमवायसंन्धेन द्रव्यसमवेतसमवेतस्य रूपत्वादेः प्रत्यक्षे स्वाश्रयसमवेतसमवायसंबन्धेनेति ।।५५।।

पृथक्त्वेति—अत्रापि प्रत्यक्षयोग्यवृत्तीति बोध्यम् । **स्वाश्रयेति**—स्वम् उद्भूतरूपम् आलोकसंयोगश्च, तदाश्रयं घटादिद्रव्यम् तत्र समवायसम्बन्धेन रूपादीति लक्षणसमन्वयः । **वाश्रयसमवेतेति**—स्वम् उद्भूतरूपं आलोकसंयोगश्च तदाश्रयं द्रव्यं घटादि, तत्र समवेतम् रूपादि तत्र समवायो रूपादेरित्यादि बोध्यम् ।।५५।।

उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः ।
रूपान्यच्चक्षुषो योग्यं, रूपमत्रापि कारणम् ।।५६।।
द्रव्याध्यक्षे—

उद्भूतेति—उद्भूतश्चासौ स्पर्शोऽस्ति यस्मिँस्तदुद्भूतस्पर्शवत् तत् च तद्द्रव्यम्, सोऽपि स्पर्शत्वादिसहित उद्भूतस्पर्शोऽपि त्वचस्त्वगिन्द्रियस्य गोचरः । रूपाद् अन्यत् तथोक्तम् रूपभिन्नम् रूपत्वादिभिन्नम्, यच्चक्षुषः योग्यम् चक्षुरिन्द्रिय-ग्राह्यम्, तदपि त्वचो गोचरम्। अत्रापि द्रव्यस्य अध्यक्षे, कोऽर्थः प्रत्यक्षे (त्वाचप्रत्यक्षे), रूपं कारणमिति कारिकाशयः ।

उद्भूतेति । उद्भूतस्पर्शवद्द्रव्यं त्वचो गोचरः । सोऽपि उद्भूतस्पर्शोऽपि स्पर्शत्वादिसहितः । रूपान्यदिति । रूपभिन्नं रूपत्वादिभिन्नं यच्चक्षुषो योग्यं तत् त्वगिन्द्रियस्यापि ग्राह्यम् ।

(अव्याख्यातम्)

तथा च पृथक्त्वसंख्यादयो ये चक्षुर्ग्राह्या गुणा उक्ता एवं क्रिया जातयो योग्यवृत्तयश्च ते त्वचो ग्राह्या इत्यर्थः । अत्रापि त्वगिन्द्रियजन्येऽपि रूपं द्रव्य-प्रत्यक्षे कारणम् ।

तथाचेति—चाक्षुषप्रत्यक्षे रूपस्य, स्पार्शनप्रत्यक्षे स्पर्शस्य च कारणत्वे गौरवमिति लाघवाद् बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रं प्रति रूपस्यैव कारणत्वमिति भावः ।

तथा च बहिरिन्द्रियजन्यप्रत्यक्षे रूपं कारणम् ।

न च बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रं प्रति रूपस्यैव कारणत्वे वायौ रूपाभावात् तस्य त्वाचप्रत्यक्षं न स्यादिति वाच्यम्, इष्टापत्तेः । नन्वेवं विनिगमना-विरहेण स्पर्शस्यैव कारणत्वमिति चेन्न, प्रभाशब्दयोस्तत्तदिन्द्रियाभ्यामग्रहण-प्रसंगादिति प्राञ्चः ।

नवीनास्तु बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे न रूपं कारणं प्रमाणाभावात् । किन्तु चाक्षुषप्रत्यक्षे रूपं स्पार्शनप्रत्यक्षे स्पर्शः कारणमन्वयव्यतिरेकात् ।

नवीनास्तु प्रमाणाभावाद् बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे न रूपस्य कारणत्वम्, किन्तु चाक्षुषप्रत्यक्षे रूपस्य, स्पार्शनप्रत्यक्षे स्पर्शस्यैव कारणत्वम् अङ्गीकुर्वन्ति ।

बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे किं कारणमिति चेत्, न किञ्चित् ।

ननु तर्हि बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे किं कारणमिति चेत्, किञ्चिदपि न ।

आत्मावृत्ति-शब्दभिन्न-विशेषगुणवत्त्वं वा प्रयोजकमस्तु । रूपस्य कारणत्वे लाघवमिति चेत्, न । वायोस्त्वगिन्द्रियेणाग्रहणप्रसंगात् ।

ननु सामान्यज्ञानमन्तरेण विशेषज्ञानं न भवतीति यावत् सामान्यतो बहिरिन्द्रियद्रव्यप्रत्यक्षं प्रति किमपि कारणं न स्यात् तावत् चाक्षुषप्रत्यक्षं प्रति रूपम्, स्पार्शनप्रत्यक्षं प्रति स्पर्शः कारणमिति वक्तुमशक्यम् । अतो बहिरिन्द्रियजन्यद्रव्य-प्रत्यक्षमात्रे कारणमाह—**आत्मेति** । आत्मन्यविद्यमाना वृत्तिर्यस्य एवंभूतो यः शब्दभिन्नविशेषगुणः तद्विशिष्टत्वम् इति भावः ।

नन्वेवं विशेषगुणविशिष्टस्य कारणतास्वीकारे तथाभूतविशेषगुणवत्त्वे विशेषणीभूतो गुणः यश्च कारणतावच्छेदकः । एवञ्च गुणानां बहुत्वेन कारणता-वच्छेदके गौरवमिति तदपेक्षया रूपस्यैव कारणत्वमस्तु, तथात्वे हि कारणता-वच्छेदकं रूपत्वम्, तच्च जातिरूपमिति कारणतावच्छेदके लाघवमिति चेन्न, वायोस्त्वगिद्रियेणाप्रत्यक्षत्वापत्तेः ।

इष्टापत्तिरिति चेदुद्भूतस्पर्श एव लाघवात् कारणमस्तु । प्रभाया अप्रत्यक्षत्वे त्विष्टापत्तिरेव किं नेष्यते । तस्मात् प्रभां पश्यामि इतिवत् वायुं स्पृशामीति प्रत्ययस्य संभवाद् वायोरपि प्रत्यक्षं सम्भवत्येव । बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे न रूपस्य न वा स्पर्शस्य हेतुत्वम् । वायुप्रभयोरेवत्वं गृह्यत एव । क्वचिद द्वित्वादिकमपि । क्वचित् संख्या-परिमाणाद्यग्रहो दोषादित्याहुः ।।५६।।

ननु मम (प्रत्नस्य) मते वायोर्मास्तु प्रत्यक्षत्वं इति पूर्वमेवाभिहितमिति चेत् तर्हि उद्भूतस्पर्श एव बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे कारणमस्तु यथा त्वया वायोः

प्रत्यक्षत्वमस्तु मा वा, किन्तु प्रभायाः प्रत्यक्षाय रूपस्यैव कारणत्वमभ्युपेयते तथा मया (नूत्नेन) अपि प्रभायाः प्रत्यक्षत्वमस्तु मा वा, किन्तु वायुप्रत्यक्षायोद्भूतस्पर्शस्यैव कारणत्वमङ्गीक्रियते, एकतरस्मिन् प्रमाणाभावात् । अतः प्रभां पश्यामीतिवत् वायुं स्पृशामीति प्रत्ययसम्भवात् वायोः प्रत्यक्षसम्भवेन 'मास्तु वायोः प्रत्यक्षत्वं' इति वक्तुमशक्यम् । इत्थं कारणताद्वयेऽपि दोषसद्भावान्न बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे रूपस्य, न वा स्पर्शस्य हेतुत्वम्, किन्त्वात्मावृत्तीत्यादेरेव । ननु वायुप्रभयोः प्रत्यक्षत्वस्वीकारे तद्गतसंख्यायाः अपि प्रत्यक्षत्वं स्यादिति चेत्, तदा स्यात् । यदि नाम वायुप्रभयोः प्रत्यक्षत्वं भवति, तदा तद्गतैकत्वं क्वचिद् द्वित्वादिकमपि प्रत्यक्षविषयीक्रियते एवेत्यत्र न काचिद्विचिकित्सा । क्वचिद् वायुप्रभापरमाणुषु तद्गतसंख्यापरिमाणयोः प्रत्यक्षायोग्यवृत्तित्वेन न प्रत्यक्षत्वमित्यूचुः ।।५६।।

—त्वचो योगो मनसा ज्ञानकारणम् ।

त्वचोयोग इति । त्वङ्मनःसंयोगो ज्ञानसामान्ये कारणमित्यर्थः । किं तत्र प्रमाणं, सुषुप्ति-काले त्वचं त्यक्त्वा पुरीतति वर्तमानेन मनसा ज्ञानाजननमिति ।

ननु सुषुप्तिकाले किं ज्ञानं भविष्यति अनुभवरूपं वा स्मरणरूपं वा । नाद्यः । अनुभवसामग्र्यभावात् । तथाहि-प्रत्यक्षे चक्षुरादिना मनः-संयोगस्य हेतुत्वात्तदभावादेव न चाक्षुषादिप्रत्यक्षम् । ज्ञानादेरभावादेव न मानसं प्रत्यक्षम् । ज्ञानाद्यभावे चात्मनोऽपि न प्रत्यक्षमिति । एवं व्याप्तिज्ञानाभावादेव नानुमितिः । सादृश्यज्ञानाभावान्नोपमितिः । पदज्ञानाभावान्न शाब्दबोधः । इत्यनुभवसामग्र्यभावान्नानुभवः । उद्बोधकाभावाच्च न स्मरणम् । मैवम् । सुषुप्तिप्रावकालोत्पन्नेच्छादिव्यक्तेस्तत्संबन्धेनात्मनश्च प्रत्यक्षत्वप्रसङ्गात् । तस्तीन्द्रियत्वे मानाभावात् । सुषुप्तिप्रावकाले निर्विकल्पकमेव नियमेन जायत इत्यत्रापि प्रमाणाभावात् ।

अथ ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वं तदा रासनचाक्षुषादि-

प्रत्यक्षकाले त्वाचप्रत्यक्षं स्यात् । विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च सत्त्वात् । परस्पर प्रतिबन्धादेकमपि वा न स्यादिति ।

अत्र केचित् पूर्वोक्तयुक्त्या त्वङ्मनोयोगस्य ज्ञानहेतुत्वे सिद्धे चाक्षुषादिसामग्र्याः स्पार्शनादिप्रतिबन्धकत्वमनुभवानुरोधात्कल्प्यत इति । अन्ये तु सुषुप्त्यनुरोधाच्चर्ममनः संयोगस्य ज्ञानहेतुत्वं कल्प्यते, चाक्षुषादिप्रत्यक्षकाले त्वङ्मनःसंयोगाभावान्न स्पार्शनप्रत्यक्षमिति वदन्ति ॥

मनोग्राह्यं सुखं दुःखमिच्छाद्वेषौ मतिः कृतिः ॥५७॥

मनोग्राह्यमिति । मनोजन्यप्रत्यक्षविषय इत्यर्थः । मतिर्ज्ञानम् । कृतिः प्रयत्नः । एवं सुखत्वादिकमपि मनोग्राह्यम् । एवमात्मापि मनोग्राह्यः किन्तु मनोमात्रस्य गोचर इत्यनेन पूर्वमुक्तत्वादत्र नोक्तः ॥५७॥

(अत्रत्या बालबोधिनी नोपलब्धा)

ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते ।

ज्ञानमिति । चक्षुसंयोगाद्यनन्तरं घट इत्याकारकं घटत्वादिविशिष्टं ज्ञानं न सम्भवति पूर्वं विशेषणस्य घटत्वादेर्दर्शनाभावात् । विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् ।

ज्ञानमिति—यन्निर्विकल्पाख्यं निर्विकल्पकनामकं ज्ञानम्, तद् अतीन्द्रियम् प्रत्यक्षायोग्यम् इष्यते । षड्विधे प्रत्यक्षे महत्त्वं हेतुः इन्द्रियं च करणम्, असाधारणं कारणं मतमिति कारिकाशयः ।

ज्ञानं द्विविधं सविकल्पकम् निर्विकल्पकञ्चेति, 'इन्द्रियार्थसन्निकर्षोत्पन्नम्' इति सूत्रेण पूर्वमेव निरचायि । तत्र सविकल्पकस्य तु सत्ता प्रत्यक्षैव, निर्विकल्पके च प्रमाणाभावात्तत्रैवोपन्यस्यति प्रमाणमाचार्यः—**चक्षुः संयोगादिति ।** घटादिना सह चक्षुःसंयोगानन्तरं एव घटत्वादिविशिष्टोऽयं घटादिरिति बोधो न भवति पूर्वं घटत्वादिरूपविशेषणस्य ज्ञानाभावात् ।

ननु मास्तु घटत्वादिज्ञानं तद्विनैव घटत्वादिविशिष्टो घटादिरिति बोधो भवतु इति चेन्न, विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वेन घटत्वादिज्ञानमन्तरेण तथा वक्तुमशक्यत्वात् ।

तथा च प्रथमतो घटघटत्वयोर्वैशिष्ट्यानवगाह्येव ज्ञानं जायते तदेव निर्विकल्पकम् । तच्च न प्रत्यक्षम् । तथाहि—वैशिष्ट्यानवगाहिज्ञानस्य प्रत्यक्षं न भवति घटमहं जानामीति प्रत्ययात् । तत्रात्मनि ज्ञानं प्रकारीभूय भासते । ज्ञाने घटस्तत्र घटत्वम् ।

एवञ्च पूर्वं घटघटत्वयोः सम्बन्धानवगाह्येव (इमे घट-घटत्वे इत्याकारकम्) ज्ञानञ्जायते । वैशिष्ट्यावगाहि-ज्ञाने घटत्वप्रकारकघटविशेष्यकसमवायसंसर्गक-ज्ञानं जायते, सम्बन्धावगाहि-ज्ञाने च इमे घटघटत्वे इतीदमेव निर्विकल्पकं ज्ञानम् तस्य च न भवति प्रत्यक्षमिति तत्त्वम् । यतो हि अनुव्यवसाये (घटघटत्व-ज्ञानानन्तरम् सम्बन्धानवगाहिज्ञाने इति यावत्), 'घटमहं जानामि' (घटविषयक-ज्ञानवानहम्) इत्याकारकः प्रत्ययो भवति । ज्ञानवानात्मा, तत्र विशेषणीभूतं ज्ञानम्, ज्ञाने च विशेषणीभूतो घटस्तत्र च घटत्वमिति क्रमः ।

यः प्रकारः स एव विशेषणमित्युच्यते । विशेषणं यद्विशेषणं तद्विशेषणता-वच्छेदकमित्युच्यते । विशेषणतावच्छेदकप्रकारकं ज्ञानं विशिष्टवैशिष्ट्यज्ञाने कारणम् ।

किं विशेषणमिति चेत्तदाह—**यः प्रकार** इति । विशेषणतावच्छेदकं किमिति चेत्तदाह—**विशेषण** इति । इत्थं च विशेषणतावच्छेदकः (विशेषणस्य विशेषणम्) प्रकारः यस्मिन्, एवं भूतं यत् (घटत्वप्रकारक-घटविषयकज्ञानवानहम् इत्याकारकं ज्ञानम्) तदेव विशिष्टवैशिष्ट्यज्ञाने कारणम् ।

निर्विकल्पके च घटत्वादिकं न प्रकारस्तेन घटत्वादिविशिष्टघटादि-वैशिष्ट्यभानं ज्ञाने न संभवति ।

निर्विकल्पकज्ञाने (घटघटत्वे) च घटत्वादिकं न विशेषणीभूतमतो घटत्वादि-विशिष्टस्य घटादिवैशिष्ट्यस्य भानं घटत्वादियुक्तस्य घटादिसम्बन्धस्य प्रत्यक्षं ज्ञाने न संभवति ।

घटत्वाद्यप्रकारकं च घटादिविशिष्टज्ञानं न संभवति जात्यखण्डोपाध्यतिरिक्तपदार्थज्ञानस्य किञ्चिद्धर्मप्रकारकत्वनियमात् ।।

ननु यदि चक्षुः संयोगानन्तरम् निर्विकल्पकज्ञाने घटत्वावच्छिन्नो घट इति ज्ञानम् न भवति, किन्तु इमे घट-घटत्वे इत्येवमयं घट इति ज्ञानं भवति तदा ज्ञाने विशेषणीभूतो घटः, ज्ञानञ्चात्मनि विशेषणीभूतम्, इत्थञ्च विशेषणतावच्छेदको घटः, तस्य ज्ञानरूपविशेषणे विशेषणत्वात्, स च ज्ञाने प्रकारीभूतः । एवञ्च विशेषणतावच्छेदकस्य ज्ञाने प्रकारतया घटादि-विशिष्टं ज्ञानं न सम्भवतीति कुत इत्यत आह—**अखण्डोपाधीति** । अखण्डोपाधिश्च प्रतियोगित्वानुयोगित्वाद्यनिर्वचनीयधर्मस्य नाम, इत्थञ्च जात्यखण्डोपाध्यतिरिक्तपदार्थः घटादिः तज्ज्ञानम् घटादिज्ञानम्, तस्य च किञ्चिद्धर्मप्रकारकत्वनियमेन घटत्वाद्यप्रकारकघटादिविशिष्टज्ञानं यच्छङ्क्यते तत्तु सर्वथैवासम्भवम् इति न तथा ज्ञानम् ।

महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम् ।।५८।।
विषेयेन्द्रियसंबन्धो व्यापारः सोऽपि षड्विधः ।
द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः ।।५९।।
द्रव्येषु समवेतानां तथा तत्समवायतः ।
तत्रापि समवेतानां शब्दस्य समवायतः ।।६०।।
तद्वृत्तीनां समवेतसमवायेन तु ग्रहः ।
प्रत्यक्षं समवायस्य विशेषणतया भवेत् ।६१।।
विशेषणतया तदद्वभावानां ग्रहो भवेत् ।
यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते ।।६२।।

महत्त्वमिति । द्रव्यप्रत्यक्षे महत्त्वं समवायसंबन्धेन कारणम् । द्रव्यसमवेतानां गुणकर्मसामान्यानां प्रत्यक्षे स्वाश्रयसमवायसंबन्धेन । द्रव्यसमवेतसमवेतानां गुणत्वकर्मत्वादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवायसंबन्धेन कारणम् ।

महत्त्वमिति—तेन परमाणूनां न प्रत्यक्षत्वमिति बोध्यम् ।

स्वाश्रयेति—स्वं महत्त्वम्, तदाश्रयं द्रव्यम्, तत्र समवायसम्बन्धेन गुणकर्म-सामान्यानि । **स्वाश्रयसमवेतेति**—स्वं महत्त्वम्, तदाश्रयो द्रव्यम् तत्र समवेतो गुणादिः, तत्समवायो गुणत्वादौ ।

इन्द्रियमिति । अत्रापि षड्विध इत्यनुषज्यते । इन्द्रियत्वम् तु न जातिः पृथिवीत्वादिना साङ्कर्यप्रसङ्गात् । किन्तु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम् ।

इन्द्रियमिति । यथा सकलघटेषु एकं घटत्वम् तथैव सर्वेन्द्रियेषु एक-मिन्द्रियत्वं जातिः स्वीक्रियतामित्याशङ्क्याह—**न जातिरिति ।** कथमिति चेत्तत्राह—**साङ्कर्यादिति ।** पृथिवीत्वात्यन्ताभावो रसनेन्द्रियादौ, इन्द्रियत्वात्यन्ताभावो घटादौ, घ्राणेन्द्रिये चोभयोः समावेशेन सङ्करत्वमिति बोध्यम् । किं तर्हि इन्द्रियत्वमिति चेत्—'शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनः संयोगाश्रयत्वम्' शब्दादितरः यः उद्भूतविशेषगुणो रूपादि, तदनाश्रयत्वे सति ज्ञानस्य कारणं यः मनःसंयोगः तदाश्रयत्वम् इति निष्कर्षः ।

आत्मादिवारणाय सत्यन्तम् । उद्भूतविशेषगुणस्य शब्दस्य श्रोत्रे सत्त्वा-च्छब्देतरेति । विशेषगुणस्य रूपादेश्चक्षुरादावपि सत्त्वादुद्भूतेति । उद्भूतत्वं न जातिः शुक्लत्वादिना साङ्कर्यात् ।

न च ज्ञानकारणमनःसंयोगाश्रयत्वमित्येवोच्यताम् किं शब्देतरोद्भूतविशेष-गुणानाश्रयत्वे सति इत्यनेनेति वाच्यम्, आत्मनोऽपि ज्ञानकारणमनः संयोगाश्रयतया तत्रातिव्याप्तिवारणाय तस्य सार्थक्यात् । तथात्वे चात्मनि शब्देतरोद्भूतविशेष-गुणानां ज्ञानादीनां सत्त्वेन नेन्द्रियत्वम् । ननु तथापि आत्मभिन्नत्वे सति ज्ञानकारण मनः संयोगाश्रयत्वमित्येवोच्यताम् इति चेन्न । येषां मतेन "सुषुप्त्यनुरोधात् चर्ममनः संयोगस्य ज्ञानहेतुत्वम्" इति मूले उक्तम्, तेषां मते चर्ममनःसंयोगस्यापि ज्ञान-हेतुतया तत्रातिव्याप्तिवारणाय तस्यावश्यकत्वात् ।

नन्वेवमपि 'उद्भूतविशेषगुणानाश्रसत्वे सति इत्याद्येवोच्यताम् किं

शब्देवरेणेति चेन्न, उद्भूतविशेषगुणः शब्दः तस्य श्रोत्रेन्द्रियाश्रयत्वमेव नानाश्रयत्वमिति तत्रातिव्याप्तिवारणाय शब्देतरेति विशेषणस्यावश्यकत्वात् ।

ननु तथापि — 'शब्देतरविशेषगुणानाश्रयत्वे सति' इत्याद्येवोच्यताम् किमुद्भूतेनेति चेन्न, शब्देतरविशेषगुणस्य रूपादेः चक्षुरादावपि सत्त्वेन तत्रातिव्याप्तिवारणाय तस्यावश्यकत्वात् । तथात्वे च चक्षुरादिगतरूपादेरनुद्भूतत्वेन तत्राप्युद्भूतविशेषगुणाश्रयत्वं संगच्छते—**साङ्कर्यादिति** । उद्भूतत्वात्यन्ताभावः अनुद्भूतशुक्ले, शुक्लत्वात्यन्ताभावः उद्भूतनीले, उद्भूतशुक्ले चोभयोः समावेशेन साङ्कर्यमाकलनीयम् ।

न च शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यम्, उद्भूतरूपत्वादिना चाक्षुषादौ जनकत्वानुपपत्तेः किं तु शुक्लत्वादिव्याप्यं नानैवानुद्भूतत्वं तदभावकूटश्चोद्भूतत्वम् । तच्च संयोगादावप्यस्ति । तथा च शब्देतरोद्भूतगुणः संयोगादिश्चक्षुरादावप्यस्त्यतो विशेषेति ।

न चेति —शुक्लत्वादिव्याप्यम् अर्थात् यत्र न शुक्लत्वादि न तत्रोद्भूतत्वमिति च (इत्यपि) न वाच्यम्, उद्भूतरूपत्वादिना चाक्षुषादिप्रत्यक्षे जनकत्वानुपपत्तेः । अयम्भावः—'यदि रूपादिषु शुक्लत्वव्याप्यमुद्भूतत्वम्, तिक्तत्वव्याप्यमुद्भूतत्वम्, सुरभित्वव्याप्योद्भूतत्वम् इत्यादिरीत्या नानोद्भूतत्वमङ्गीक्रियते तदा उद्भूतत्वस्य तत्तद्रूपरसादिषु भिन्नतयानेकत्वादन्यूनानतिरिक्तवृत्तित्वाभावेनावच्छेदकत्वासंभवादुद्भूतरूपत्वेनोद्भूतगन्धत्वेन वैवंरीत्या चाक्षुषादिप्रत्यक्षं प्रति जनकत्वमपि न स्यादिति ।' अतश्च शुक्लत्यादिव्याप्यं यन्नानानुद्भूतत्वं तदभावसमूहश्चोद्भूतत्वम् । इत्थञ्चैतदनुद्भूतत्वाभावसमूहरूपं यदुद्भूतत्वम् तत्तु संयोगविभागादावपि वर्तते इति शब्देतरोद्भूतगुणः संयोगादिः तस्य चाक्षुषादावपि वर्तमानतया तत्रातिव्याप्तिवारणाय 'विशेष' पदम् । तथात्वे हि संयोगविभागादीनां विशेषगुणत्वाभावेन न दोषः ।

कालादिवारणाय विशेष्यदलम् । इन्द्रियावयवविषयसंयोगस्यापि प्राचां मते प्रत्यक्षजनकत्वादिन्द्रियावयववारणाय, नवीनमते कालादौ रूपाभावप्रत्यक्षे

सन्निकर्षघटकतया कारणीभूतचक्षुः संयोगाश्रयस्य कालादेर्वारणाय मनः पदम् । ज्ञानकारणमित्यपि तद्वारणाय ।

ननु 'शब्देतरोद्भूत विशेषणानाश्रयत्वम्' इत्येवोच्यताम् किमधिकेनेति चेन्न, कालादीनामपि तथात्वादिन्द्रियत्वापत्तेः । न च 'शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणसंयोगाश्रयत्वमित्येवोच्यताम् किमर्थं 'मनः' पदोपादानमि'ति वाच्यम् । प्राचीनानां नये इन्द्रियावयवविषयसंयोगोऽपि प्रत्यक्षस्य कारणमतो ज्ञानकारण-संयोगः इन्द्रियावयवविषयसंयोगः, तदाश्रयः इन्द्रियावयवः, तत्रातिव्याप्तिवारणाय नवीननाञ्च मते कालादिषु यो रूपाद्यभावः स 'स्व-संयुक्त-विशेषणतासंबन्धेन' गृह्यते तथाहि—स्वं चक्षुरादि, तत्संयुक्तः कालादिः, तत्र रूपाद्यभावस्य विशेषणता (रूपाभाववान्, गन्धाभाववान् वा कालः तद्वानाकाशः इत्यादिप्रतीतेः) एवञ्च पूर्वोक्तविधया रूपाद्यभावस्य प्रत्यक्षे यत् चक्षुरादिसंयुक्तविशेषणतासन्निकर्षरूपं कारणं, तदन्तर्गतो ज्ञानकारणीभूतश्चक्षुरादिसंयोगः, तस्यापि परम्परया रूपाद्यभावज्ञाने कारणत्वम्, तत्संयोगाश्रयश्च कालादिरित्थम् शब्देतरोद्भूतविशेषगुणो रूपादिः, तदनाश्रयत्वे सति ज्ञानकारणं यश्चक्षुरादिसंयोगः तदाश्रयः कालादिरिति तत्रापीन्द्रियत्ववारणाय मनः-पदस्य सार्थक्यात् । किन्तु कालमनःसंयोगः सार्वकालिकः अतः कालादौ रूपाद्यभावप्रत्यक्षकालेऽपि कालमनःसंयोगस्य वर्तमानतया, कालस्य च तत्संयोगाश्रयत्वेन, मनः-पदोपादानेऽपि न किञ्चिद् वैलक्षण्यमत आह—**ज्ञानकारणमिति** । तस्मिन् समये कालमनः संयोगसत्त्वेपि तत्संयोगस्य ज्ञानाकारणतया दोषाभाव इति तत्त्वम् ।

करणमिति । असाधारणं कारणं करणम् । असाधारणत्वं व्यापारवत्त्वम् ।।५८।।

स्पष्टम्

विषयेन्द्रियसंबन्ध इति । व्यापारः सन्निकर्षः । षड्विधं सन्निकर्षमुदाहरणद्वारा दर्शयति—द्रव्यग्रह इति । द्रव्यप्रत्यक्षमिन्द्रियसंयोगजन्यम् । द्रव्यसमवेतप्रत्यक्षमिन्द्रियसंयुक्तसमवायजन्यम् । एवमग्रेऽपि ।

विषयेति—विषयस्य इन्द्रियाणाञ्च सम्बन्धः तथोक्तः व्यापारः सन्निकर्षः ।

सोऽपि षड्विधः। द्रव्यग्रहः द्रव्यप्रत्यक्षम् संयोगाद् भवति। द्रव्यप्रत्यक्षे संयोगः सन्निकर्षः प्रथमः। द्रव्येषु पृथिव्यादिषु समवेतानां समवायसम्बन्धेन वर्तमानानां गुणादीनां ग्रहः संयुक्तसमवायतः भवति। द्रव्यसमवेतगुणादिप्रत्यक्षे संयुक्तसमवायतः भवति। द्रव्यसमवेतगुणादौ समवेतानां (समवायसम्बन्धेन वर्तमानानां) गुणत्वादीनां ग्रहः तस्य, कोऽर्थः संयुक्तसमवेतस्य, समवायतः भवति। द्रव्यसमवेतसमवेतगुणत्वादिप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षस्तृतीयः। शब्दस्य ग्रहः समवायतः भवति। शब्दप्रत्यक्षे समवायः सन्निकर्षस्तुरीयः। तद्वृत्तीनां (शब्दवृत्तीनां) शब्दत्वादीनाम् ग्रहस्तु समवेतसमवायेन भवति। श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायाच्छब्दत्वप्रत्यक्षे समवेतसमवायस्सन्निकर्षः पञ्चमः। यदि स्यात्तर्हि उपलभ्येत इत्येवं यत्र (मीमांसकमते) प्रसज्यते (आपादयितुं शक्यते) तत्र तद्वत् अभावानामपि (अस्मन्मते) विशेषणतया ग्रहो भवेत्। गन्धाभाववज्जलमित्यादौ घ्राणसंयुक्ते जलादौ गन्धाभावस्य विशेषणतया यदि स्यात्तर्हि उपलभ्येत इति मीमांसकवेदान्तिमते आपादयितुं शक्यतेऽभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः षष्ठः। इति कारिकार्थः।

तज्जन्यत्वे सति तज्जन्यजनकत्वरूपव्यापारः श्रोत्रशब्दसम्बन्धे समवायेन सम्भवतीत्यतो नात्र व्यापारो गृह्यते इति लक्षयति—**व्यापारः सन्निकर्ष इति।**

वस्तुतस्तु द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणम्, द्रव्यसमवेतचाक्षुषं प्रति चक्षुः संयुक्तसमवायः कारणम्, द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुः संयुक्तसमवेतसमवायः। एवमन्यत्रापि विशिष्यैव कार्यकारणभावः।

यदि द्रव्यप्रत्यक्षमिन्द्रियसंयोगजन्यमित्येव मन्येत तदा प्रभायास्त्वगिन्द्रियेणसंयोगे चाक्षुषप्रत्यक्षं स्यात्।

एवं घटस्य चक्षुरिन्द्रियेण संयोगे त्वाचप्रत्यक्षं स्यात्तत्र तत्र द्रव्येन्द्रियसंयोगस्य सत्त्वादिति तत्र तत्र दोषवारणाय विशिष्य कार्यकारणभावमाह—**वस्तुतस्त्विति।** द्रव्यस्य घटादेः चाक्षुषप्रत्यक्षं प्रति घटादिना सह चक्षुःसंयोगः कारणम्, अतः प्रभायास्त्वगिन्द्रियेण संयोगसमये चक्षुषा संयोगाभावान्न चाक्षुषप्रत्यक्षम्। द्रव्ये यत् समवेतम्, समवायसंबन्धेन वर्तमानम् गुणादि, तत्प्रत्यक्षं चक्षुःसयुक्तसमवाय-

सम्बन्धेन भवति, तत्र चक्षुःसंयुक्तो घटादिः, तत्र समवेतं गुणादिः, तत्र समवायेन गुणत्वादि । एवमन्यत्रापि—अर्थात् स्पार्शनप्रत्यक्षेऽपि त्वक्संयोगः, त्वक्संयुक्त समवायः, त्वक्संयुक्तसमवेतसमवायः, तथा रासनप्रत्यक्षे रसनासंयोगः, रसनासंयुक्त-समवायः, रसनासंयुक्तसमवेतसमवायः इत्यादि विशिष्य कार्यकारणभूह्यम् ।

परन्तु पृथिवीपरमाणुनीले नीलत्वं पृथिवीत्वं च चक्षुषा कथं न गृह्यते, तत्र परम्परयोद्भूतरूपसम्बन्धस्य महत्त्वसंबन्धस्य च सत्त्वात् । तथापि—नीलत्वं जातिरेकैव घटनीले परमाणुनीले च वर्तते एवं पृथिवीत्वेऽघटादिकमादाय महत्त्वसम्बन्धो बोध्यः ।

ननु येन केनचित् प्रकारेण महत्त्वोद्भूतत्वविशिष्टद्रव्यस्य प्रत्यक्षत्वस्वीकारे पृथिवीपरमाणुगतनीलत्वस्य, तद्गत पृथित्वस्य च चाक्षुषप्रत्यक्षं स्यादित्याशङ्कते—**परन्त्विति** । अयम्भावः—'नीलत्वं जातिस्तु एकैव, अतो या घटगतनीलेऽस्ति सैव परमाणुगतनीलेऽपि, अपरम् महत्त्वसम्बन्धः 'स्वाश्रयसमवेतसमवायसम्बन्धेन' घटगतनीले वर्तते, तत्र स्वशब्देन महत्त्वम्, तदाश्रयः घटः, तत्र समवेतं नीलम् तत्र समवायसम्बन्धेन नीलत्वम् । एवं घटगतनीलगतमहत्त्वमादाय परमाणुगत-नीलेऽपि परम्परया महत्त्वं बोध्यम् । उद्भूतरूपसम्बन्धस्तु उभयत्रापि स्वाश्रय-समवेतसमवायसम्बन्धेनास्ति । स्वं उद्भूतरूपम्, तदाश्रयो घटः परमाणुर्वा, तत्र समवेतं रूपम्, तत्र समवायसम्बन्धेन रूपत्वम् । एवमुद्भूतरूपस्य सम्बन्धः घटस्य परमाणोर्वा सम्बन्धमादाय परमाणुगतनीलगतनीलत्वेऽपि वर्तते । एवं पृथिवी-परमाणोः पृथिवीत्वेऽपि घटादिकमादाय परम्परया 'स्वाश्रयसमवेतसमवायसम्बन्धेन' महत्त्वसम्बन्धो बोध्यः ।' तथाहि—स्वम् महत्त्वम्, तदाश्रयः कपालः; तत्र समवेतो घटः, तत्र समवायसम्बन्धेन पृथिवीत्वम्, पृथिवीत्वञ्च जातिरेकैवेति तत्र पृथिवीत्वं परमाणावप्यतस्तत्रापि परम्परया महत्त्वसम्बन्धस्समायातः ।

एवं वायौ तदीयस्पर्शादौ च सत्तायाश्चाक्षुषप्रत्यक्षं स्यात् ।

एवं वायाविति—स्वाश्रयसमवेतत्वसम्बन्धेन महत्त्वस्य वर्तमानतयेतिभावः । तत्र स्वम् महत्त्वं, तदाश्रयो घटादिः, तत्र समवायसम्बन्धेन सत्ता, या च सत्ता घटादौ, सैव वायावपीति समायातो महत्त्वसम्बन्धः । **तदीयेति**—स्वाश्रयसमवेत-

समवायसम्बन्धेन महत्त्वस्य वर्तमानतयेति भावः । स्वेन महत्त्वम् तदाश्रयो घटादिः, तत्र समवायेन स्पर्शादिः, तत्र समवायेन सत्ता, या च सत्ता घटादिगतस्पर्शे सैव वायुगतस्पर्शेऽपीति तत्रापि महत्त्वसम्बन्ध आयातः ।

तस्मादुद्भूतरूपावच्छिन्न-महत्त्वावच्छिन्नचक्षुः संयुक्तसमवायस्य द्रव्य-समवेतचाक्षुषे तादृशचक्षुः संयुक्तसमवेतसमवायस्य द्रव्यसमवेतसमवेतचाक्षुषे कारणत्वं वाच्यम् ।

समाधत्ते—**तस्मादिति** । द्रव्यसमवेतचाक्षुषप्रत्यक्षे उद्भूतरूपावच्छिन्न-महत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायः कारणम् अत एव घटादिगतनीलप्रत्यक्षे उद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुः-संयुक्तो घटादिः, तत्र समवायेन नीलम्, तद्गतनीलत्वप्रत्यक्षे च उद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तो घटादिः, तत्र समवेतम् नीलम्, तत्र समवेतं नीलत्वम् इति सुतरां तत्तद्ग्रहणम् ।

इत्थं च परमाणुनीलादौ न नीलत्वादिग्रहः, परमाणौ चक्षुःसंयोगस्य महत्त्वावच्छिन्नत्वाभावात् । एवं वाय्वादौ न सत्तादिचाक्षुषम् । तत्र चक्षुः-संयोगस्य रूपावच्छिन्नत्वाभावात् । एवं यत्र घटस्य मध्यावच्छेदेनालोकसंयोगः चक्षुःसंयोगस्त्वग्रावच्छेदेन तत्र घटप्रत्यक्षाभावादालोकसंयोगावच्छिन्नत्वं चक्षुः-संयोगे विशेषणं देयम् ।

परमाणुगतनीलादौ च न नीलत्वादिग्रहः, चक्षुःसंयुक्तस्य परमाणोः महत्त्वावच्छिन्नत्वाभावात्, न वा वाय्वादौ सत्तादि चाक्षुषम्, तत्र चक्षुः संयुक्तस्य वाय्वादे रूपावच्छिन्नत्वाभावात् । ननु यदि द्रव्यप्रत्यक्षे 'उद्भूतरूपावच्छिन्न-महत्त्वावच्छिन्नचक्षुःसंयोगः कारणम्', तदा यत्रान्धकारे आलोकसंयोगो घटस्य मध्यावच्छेदेनास्ति, चक्षुःसंयोगस्तु बाह्यावच्छेदेन जातस्तत्र घटप्रत्यक्षं कथं नेत्यत आह—**विशेषणमिति** । उद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नालोकसंयोगा-वच्छिन्नचक्षुःसंयोगः द्रव्यचाक्षुषप्रत्यक्षे कारणमितिभावः ।। प्रथमः सन्निकर्षः ।

एवं द्रव्यस्पार्शनप्रत्यक्षे त्वक्संयोगः कारणम, द्रव्य समवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवायः, द्रव्यसमवेतसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवेतसमवायः कारणम् । अत्रापि महत्त्वावच्छिन्नत्वमुद्भूतस्पर्शविच्छिन्नत्वं च पूर्ववदेव बोध्यम् ।

एवं द्रव्यस्पार्शनप्रत्यक्षे त्वक्-संयोगः कारणम् । द्रव्यसमवेतगुणादिस्पार्शन-प्रत्यक्षे त्वक्संयुक्तसमवायः कारणम् । त्वक्संयुक्तं द्रव्यम्, तत्र समवायेन गुणादि । द्रव्यसमवेत (गुणादि)-समवेत-(गुणत्वादि)-स्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवेत-समवायः कारणम् । त्वक्संयुक्तं द्रव्यम्, तत्र समवेतं गुणादि, तत्र समवेतं गुणत्वादि । अत्रापि (स्पार्शनप्रत्यक्षेऽपि) उद्भूतस्पर्शावच्छिन्नमहत्त्वावच्छिन्नत्वक्संयोगः द्रव्य-स्पार्शनप्रत्यक्षे कारणमित्यादि पूर्ववदेवाकलनीयम् ।। द्वितीयः सन्निकर्षः ।

एवं गन्धप्रत्यक्षे घ्राणसंयुक्तसमवायः । गन्धसमवेतस्य घ्राणजन्यप्र यक्षे घ्राणसंयुक्तसमवेतसमवायः कारणम् ।

एवं गन्धप्रत्यक्षे पूर्ववदेव उद्भूतगन्धावच्छिन्नमहत्त्वावच्छिन्नघ्राणसंयुक्तं पुष्पादि द्रव्यम्, तत्र समवायसम्बन्धेन गन्धः । गन्धसमवेतस्य गन्धत्वस्य घ्राणजन्य-प्रत्यक्षे उद्भूतगन्धावच्छिन्नमहत्त्वावच्छिन्न-घ्राणसंयुक्तसमवेतसमवायः कारणम् ।। उद्भूतगन्धावच्छिन्नमहत्त्वावच्छिन्न-घ्राणसंयुक्तं पुष्पादि द्रव्यम्, तत्र समवेतो गन्धः, तत्र समवायसम्बन्धेन गन्धत्वम् ।।३।। तृतीयः सन्निकर्षः ।

एवं रसप्रत्यक्षे रसनासंयुक्तसमवायः । रससमवेतरासनप्रत्यक्षे रसना-संयुक्तसमवेतसमवायः कारणम् ।

एवं रसप्रत्यक्षे (द्रव्यसमवेतरसप्रत्यक्षे) उद्भूतरसावच्छिन्नमहत्त्वावच्छिन्न-रसनासंयुक्तसमवायः कारणम् । उद्भूतरसावच्छिन्नमहत्त्वावच्छिन्नरसनासंयुक्त-मामलकादि जलम्, द्रव्यम् वा, तत्र समवायसंबन्धेन रसः । रससमवेतरसत्व-रासनप्रत्यक्षे उद्भूतरसावच्छिन्नमहत्त्वावच्छिन्नरसनासंयुक्तसमवेतसमवायः कारणम् । उद्भूतरसावच्छिन्नमहत्त्वावच्छिन्नरसनासंयुक्तं आमलकजम्बीरादि, तत्र समवेतो रसः, तत्र समवायसम्बन्धेन रसत्वम् ।।४।। तुरीयः सन्निकर्षः ।

शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः शब्दसमवेतश्रावणप्रत्यक्षे श्रोत्रा-वच्छिन्नसमवेतसमवायः कारणम् ।

शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः (श्रोत्रवृत्तिः शब्दसमवायः) कारणम् । शब्दसमवेतशब्दत्वश्रावणप्रत्यक्षे, श्रोत्रावच्छिन्नश्चासौ समवेतः स चासौ

समवायः श्रोत्रावच्छिन्नसमवेतसमवायः श्रोत्रावच्छेदेन (श्रोत्रे) समवेतः समवाय-सम्बन्धेन वर्तमानः एवंभूतः समवायः कारणमिति भावः। श्रोत्रे समवेतः समवाय-सम्बन्धेन वर्तमानः शब्दः, तत्र समवायसम्बन्धेन शब्दत्वम् ॥ ५ ॥ पञ्चमः सन्निकर्षः।

अत्र सर्वत्र प्रत्यक्षं लौकिकं बोध्यम्। वक्ष्यमाणमलौकिकं प्रत्यक्षमिन्द्रिय-संयोगादिकं विनापि भवति।

स्पष्टम्।

एवमात्मनः प्रत्यक्षे मनःसंयोगः आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्त-समवायः, आत्मसमवेतसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवेतसमवायः कारणम्।

एवमात्मनः प्रत्यक्षे मनः संयोगः। आत्मसमवेतसुखादिमानसप्रत्यक्षे मनः संयुक्तसमवायः। मनःसंयुक्त आत्मा, तत्र समवायेन सुखादि आत्मसमवेत सुखादि-समवेतसुखत्वादिमानसप्रत्यक्षे मनःसंयुक्तसमवेतसमवायः कारणम्, मनःसंयुक्त आत्मा, तत्र समवेतं सुखादि, तत्र समवायेन सुखत्वादि।

अभावप्रत्यक्षे समवायप्रत्यक्षे चेन्द्रियसंबद्धविशेषणता हेतुः।

अभावप्रत्यक्ष इति—गन्धाभाववज्जलमित्यादौ इन्द्रियसंयुक्तं जलादि, तद्-विशेषणता अभावेऽतः सा विशेषणतैव सन्निकर्षः। एवमिन्द्रियसंयोगवान् घटः इत्यत्र घटेन्द्रिययोः संयोगसम्बन्धः। संयोगश्च घटे समवायसम्बन्धेनास्ति संयोगस्य गुणत्वेन गुणगुणिनोः (संयोगघटयोः) समवायसम्बन्धत्वात्। स च समवायः विशेषणता संबन्धेन घटे अस्त्येव, यतः समवायस्याप्रधानत्वम् घटस्य च प्रधानत्वम्, अतोऽत्र समवाये या विशेषणता सैव समवायप्रत्यक्षे सन्निकर्षः।

वैशेषिकमते तु समवायो न प्रत्यक्षः।

वैशेषिकमत इति। तेषामयमभिप्रायः—सम्बन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य कारणत्वम्, अतः समवायस्य यावदाश्रयाणां प्रत्यक्षाभावान्न समवायप्रत्यक्षम्। यतो हि यः घटत्वसमवायः पुरोवर्तिघटे वर्तते स एव भूते भाविनि च घटेऽपि

वर्तते; तथाभूत-घटयोश्च वर्तमानकालेन भवति प्रत्यक्षत्वमिति यावदाश्रयप्रत्यक्षाभावान्न समवायप्रत्यक्षत्वम् ।

अत्र यद्यपि विशेषणता नानाविधा तथाहि—भूतलादौ घटाद्यभावः संयुक्तविशेषणतया गृह्यते, संख्यादौ रूपाद्यभावः संयुक्तसमवेतविशेषणतया, संख्यात्वादौ रूपाद्यभावः संयुक्तसमवेतसमवेतविशेषणतया, शब्दाभावः केवलश्रोत्रावच्छिन्न विशेषणतया, कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया, एवं कत्वाद्यवच्छिन्नाभावे गत्वाभावादिकं श्रोत्रावच्छिन्नविशेषणविशेषणतया, एवं घटाभावादौ घटाभावः चक्षुःसंयुक्त-विशेषणविशेषणतया । एवमन्यदप्यूह्यम् तथापि विशेषणतात्वरूपेणैकैव सा गण्यते । अन्यथा षोढासन्निकर्ष इति प्राचां प्रवादो व्याहन्येतेति ।

अत्र यद्यपि अभावनिरूपितविशेषणता नानाविधा, तथापि विशेषणतत्त्वरूपेणैकैव सोच्यते अन्यथा षड्धासंनिकर्षकथनमयुक्तमेव स्यात् । नानाविधात्वमेव प्रदर्शयति—**तथाहीति ।** घटाभाववद्भूतलमित्यादौ घटाभावस्य भूतले विशेषणत्वेन, घटाभावः संयुक्तविशेषणतया गृह्यते । इन्द्रियसंयुक्तं भूतलादि तत्र घटाभावस्य विशेषणता ।

संख्यादाविति—इन्द्रियसंयुक्तं घटपटादि, तत्र समवायसम्बन्धेन वर्तमानम् संख्यादि, तत्र रूपाद्यभावस्य विशेषणता रूपाद्यभाववती संख्या इत्यादि प्रतीतेः । इन्द्रियसंयुक्तं घटपटभूतलादि, तत्र समवेतम् संख्यादि (संख्यादीनामपि गुणत्वेन गुणगुणिनोः समवायात्), तत्र समवेतम् संख्यात्वादि, तत्र रूपाद्यभावस्य विशेषणता रूपाद्यभाववत् संख्यात्वादीति प्रतीतेः । **शब्दाभाव इति**—श्रोत्रावच्छेदेन (श्रोत्रे) वर्तमाना या विशेषणता तयेति भावः । शब्दाभाववच्छ्रोत्रमिति प्रतीतौ श्रोत्रे वर्तमाना या शब्दाभावस्य विशेषणता सैव सन्निकर्ष इति तत्त्वम् । **कादाविति**—श्रोत्रावच्छेदेन वर्तमानं यत् ककारादि, तद्विशेषणतयेति बोध्यम् । खत्वाभाववान् ककारादिरित्यादौ श्रोत्रावच्छेदेन समवेतो यः ककारादिस्तत्र खत्वाद्यभावस्य विशेषणता । **एवमिति**—श्रोत्रावच्छेदेन वर्तमाने खकारादौ तत्र च वर्तमाने कत्वाद्यवच्छिन्नाभावे गत्वाभावे गत्वाभावादिकम् श्रोत्रावच्छिन्नविशेषणविशेषणतया गृह्यते । तत्र श्रोत्रावच्छेदेन वर्तमानः खकारादिः

तत्र कत्वाद्यवच्छिन्नाभावस्य विशेषणता, तत्रापि च गत्वाभावादिकस्य विशेषणता (कत्वाद्यवच्छिन्नरूपाभावे कत्वाद्यवच्छिन्नाभावत्वस्यैव प्रतीतेः) इत्थम् गत्वाभाव-विशिष्टकत्वावच्छिन्नाभावविशिष्टखवच्छ्रोत्रम् इत्यादौ तत्तदूह्यम् । **घटाभावा-दाविति**—अत्रापि चक्षुः संयुक्तभूतलादाविति शेषः । एवञ्च चक्षुःसंयुक्तभूतलादौ, तत्र च वर्तमाने घटाभावादौ वर्तमानः पटाभावः चक्षुःसंयुक्तविशेषणविशेषणतया तत्र चक्षुः-संयुक्तं भूतलादि, तत्र विशेषणता घटाभावस्य, तत्रापि च पटाभावस्य, 'पटाभाववद्घटाभाववद्भूतलम्' इति प्रतीतेः ।

यदि स्यादुपलभ्येतेति—अत्राभावप्रत्यक्षे योग्यतानुपलब्धिः कारणम् । तथाहि—भूतलादौ घटादिज्ञाने जाते घटाभावादिकं न ज्ञायते । तेनाभावोपलम्भे प्रतियोग्युपलम्भाभावः कारणम् ।

यदीपि । इदमत्राकूतम्—मीमांसकाः वेदान्तिनश्च प्रत्यक्षम्, अनुमानम्, उपमानम्, शाब्दम्, अर्थापतिः (परदेशे तिष्ठतः पत्रादिना तत्सत्तानुमितिः) अनुपलब्धिः, एतावन्ति प्रमाणानि समभ्युपनयन्ति । तत्रानुपलब्धेरन्तर्भावो नैयायिकानां नये विशेषणतायाम्, तदेवाभिव्यनक्ति । **अत्रेति**—घटाद्यभावप्रत्यक्षे योग्यस्य घटादेः अनुपलब्धिः कारणम् । तथाहि—यदि भूतलादौ घटादिकं भवति तदा तदभावादिकं न कदापि लभ्यते, अतो ज्ञायते यत् अभावोपलम्भे (अभाव-प्रत्यक्षे) प्रतियोगिनो घटादेः उपलम्भाभावः (उपलब्ध्यभावः) एव कारणम् ।

तत्र योग्यताप्यपेक्षिता । सा च प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रति-योगिकत्वरूपा । तदर्थश्च प्रतियोगिनो घटादेः सत्त्वप्रसक्त्या प्रसञ्जित उपलम्भ-रूपः प्रतियोगी यस्य सोऽभावप्रत्यक्षे हेतुः ।

ननु यद्यभावप्रत्यक्षे उपलब्ध्यभाव एव कारणम् तदाऽन्धकारेऽपि घटानुप-लब्धेर्घटाभावस्य चाक्षुषप्रत्यक्षं स्यात् इत्यत आह—**तत्रेति** । तत्र च प्रतियोगिनि (यदभावजिज्ञासा वर्तते) प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपा—प्रतियोगिनो घटादेः सत्त्वम् (सत्ता) प्रतियोगिसत्त्वम् तस्य प्रसञ्जनम् (प्रसक्तिः) तेन प्रसञ्जितः (उपलब्धः) प्रतियोगी यस्य (अभावस्य) स प्रतियोगिसत्त्वप्रसञ्जन,

प्रसञ्जित-प्रतियोगिकः, तस्यभावस्तत्त्वम्, तदेव रूपं यस्याः सा तथोक्ता योग्यता अभावप्रत्यक्षेऽपेक्षिता। यथा - घटाद्यभाव इत्यत्र प्रतियोगी घटादिः (यस्याभावः स प्रतियोगीति नियमात्) तस्य सत्तायाः या प्रसक्तिः विद्यमानता (कस्मिँश्चित्समये 'घटादिप्रत्यक्षं जातम् इदानी' मितिज्ञानं हृदि वर्तते यद् घटादयो भवन्ति) तया प्रसक्त्या घटादिरूपप्रतियोगिनः प्रतिपादिता इति घटाद्यभावप्रत्यक्षं सुलभम्।

तथाहि—यत्रालोकसंयोगादिकं वर्तते तत्र यद्यत्र घटः स्यात्तर्हि उपलभ्येते-त्यापादयितुं शक्यते, तत्र घटाभावादिप्रत्यक्षं भवति। अन्धकारे तु नापादयितुं शक्यते। तेन घटाभावादेरन्धकारे न चाक्षुषप्रत्यक्षम्, स्पार्शनप्रत्यक्षं तु भवत्येव। आलोकसंयोगं विनापि स्पार्शनप्रत्यक्षस्यापादयितुं शक्यत्वात्। गुरुत्वादिकं यदयोग्यं तदभावस्तु न योग्यस्तत्र गुरुत्वादिप्रत्यक्षस्यापादयितुमशक्यत्वात्। वायावुद्भूतरूपाभावः, पाषाणे सौरभाभावः, गुडे तिक्ताभावः, वह्नावनुष्णत्वा-भावः, श्रोत्रे शब्दाभावः, आत्मनि सुखाभावः एवमादयस्तत्तदिन्द्रियैर्गृह्यन्ते तत्तत्प्रत्यक्षस्यापादयितुं शक्यत्वात्।

एवं च यत्रालोकसंयोगादि-सत्त्वेऽपि घटाभावो वर्तते तत्र 'यदि घटोऽत्र स्यात् तर्ह्युपलभ्येत' इत्यापादयितुम् शक्यते तेन तत्र घटाभावादिप्रत्यक्षं भवति। अन्धकारे तु पूर्वोक्तं न प्रतिपादयितुं शक्यते, तत्र घटसत्त्वेऽपि आलोकसंयोगाभावेन तत्प्रत्यक्षासम्भवात्। अतो घटादेरन्धकारे न चाक्षुषप्रत्यक्षम् किन्तु स्पार्शनमेव, आलोकसंयोगं विनापि तत्सम्भवात्। गुरुत्वादिकायोग्यवस्तुनः प्रत्यक्षाभावात्तद-भावोऽपि न प्रत्यक्षविषयीक्रियते किन्तु यो गुणो यदिन्द्रियेण गृह्यते इत्यनेन तत्र तत्र तत्तद्गुणप्रत्यक्षत्वस्य प्रतिपादयितुं शक्यत्वेन तत्तदभावोऽपि तत्तदिन्द्रियैः वायौ रूपाभाव, पाषाणे सौरभाभावः, गुडे तिक्ताभावः इत्यादौ गृह्यते।

संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता अन्योन्याभावप्रत्यक्षे त्वधिकरण-योग्यताऽपेक्षिता। अतः स्तम्भादौ पिशाचादिभेदोऽपि चक्षुषा गृह्यत एव।

नन्वभावप्रत्यक्षे उपलब्ध्यभावस्य कारणत्वाभ्युपगमे स्तम्भादावालोकसंयोग-सत्त्वेऽपि पिशाचानुपलब्ध्या तदभावप्रत्यक्षमपि स्यादित्यत आह— **संसर्गाभावेति**। अत्यन्ताभावप्रत्यक्षे प्रतियोगिनो घटादिपिशाचादेः योग्यतापेक्षितेति भावः।

तेन पिशाचाभाव इत्यत्र पिशाचरूपप्रतियोगिनः प्रत्यक्षयोग्यताभावान्न तदभाव-प्रत्यक्षत्वमिति तत्त्वम् ।

नन्वेवं स्तम्भः पिशाचो नेत्यपि प्रत्यक्षं न स्यादित्य आह—**अधिकरणेति** । अधिकरणस्य स्तम्भप्रत्यक्षयोग्यत्वेन तत्र पिशाचभेदग्रहणं सुलभमिति भावः । तदेवाह मूले —**'पिशाचादिभेदो चक्षुषा गृह्यत एव'** इति ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥

एवं त्यक्षं लौकिकालौकिकभेदेन द्विविधम् । तत्र लौकिकप्रत्यक्षे षोढा-संनिकर्षो वार्णित. । अलौकिकसन्निकर्षस्त्विदानीमुच्यते—

अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः ।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥६३॥

अलौकिकस्त्विति । व्यापार संनिकर्षः । सामान्यलक्षण इति । सामान्यं लक्षणं यस्येत्यर्थः ।

एवं प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधम्, तत्र लौकिकप्रत्यक्षे षड्धा-सन्निकर्षमुक्त्वाऽलौकिकसन्निकर्ष इदानीमुच्यते **अलौकिकस्त्विति** । अलौकिको व्यापारस्तु सामान्यलक्षणः, ज्ञानलक्षणः, तथा योगजः एवं त्रिविधः परिकीर्तितः । आचार्यैरिति शेषः । सामान्यं लक्षणं स्वरूपं यस्येति सामान्यलक्षणः सन्निकर्षः सम्बन्धः ।

तत्र लक्षणपदेन यदि स्वरूपमुच्यते तदा सामान्यस्वरूपा प्रत्यासत्तिरित्यर्थो लभ्यते । तच्चेन्द्रियसंबद्धविशेष्यकज्ञानप्रकारीभूतं बोध्यम् । तथाहि—यत्रेन्द्रिय-संयुक्तो धूमादिस्तद्विशेष्यकं धूम इति ज्ञानं यत्र जातं तत्र ज्ञाने धूमत्वं प्रकारः । धूमत्वेन च संनिकर्षेण धूमा इत्येवंरूपं सकलधूमविषयकं ज्ञानं जायते ।

तत्र सामान्यं इन्द्रियसम्बद्धविशेष्यकज्ञाने प्रकारीभूतम् बोध्यम् । तच्चैवं प्रदर्शयति—**तथाहीति** ।

अत्र यदीन्द्रियसंबद्धप्रकारीभूतमित्येवोच्यते तदा धूलीपटले धूमत्व-भ्रमानन्तरं सकलधूमविषयकं ज्ञानं न स्यात्, तत्र धमत्वेन सहेन्द्रियसम्बन्धा-

भावात् । मन्मते तु इन्द्रियसम्बद्धं धूलीपटलं तद्विशेष्यकं धूम इति ज्ञानम्, त . प्रकारीभूतं धूमत्वं प्रत्यासत्तिः । इन्द्रियसंबन्धश्च लौकिको ग्राह्यः ।

ननु लाघवाय 'इन्द्रियसम्बद्धप्रकारीभूतं' सामान्यम् इत्येवोच्यताम्, किं ज्ञाने प्रकारीभूतमित्यनेनेति चेन्न, तथात्वे हि धूलीपटले धूमत्वभ्रमानन्तरम् तदानीं धूमत्वेन सह इन्द्रियसम्बन्धाभावात् सकलधूमविषयकज्ञानानुत्पत्तेः । यदि तु 'इन्द्रियसम्बद्धविशेष्यकज्ञाने प्रकारीभूतं सामान्यम्' इति कथ्यते तदा तदानीं धूमत्वेन सह इन्द्रियसम्बन्धाभावेऽपि इन्द्रियसम्बद्धं धूलीपटलम्, तद्विशेष्यकं 'धूमोऽयम्' इति ज्ञानम् तत्र प्रकारीभूतेन धूमत्वेन सकलधूमविषयकं ज्ञानं न व्याहन्येत ।

ननु कस्मिँश्चित् समये घटप्रत्यक्षे जाते पश्चात् इन्द्रियेण घटसंयोगाभावेऽपि अलौकिकप्रत्यासत्त्या प्रत्यक्षविषयीकृतघटप्रकारीभूतघटत्वसन्निकर्षेण घटान्तराणामपि प्रत्यक्षत्वं स्यादित्यत आह– **इन्द्रियेति** । एवञ्च प्रत्यक्षविषयीकृतघटप्रकारीभूत-घटत्वसम्बन्धस्य तदानीं (घटेन सहेन्द्रियसंबन्धाभावकाले) अलौकिकत्वेन दोषाभावः ।

इदं च बहिरिन्द्रियस्थले । मानसस्थले तु ज्ञानप्रकारीभूतम् सामान्यं प्रत्यासत्तिः ।

नन्विन्द्रियसंबद्धज्ञाने प्रकारीभूतस्य प्रत्यासत्तित्वस्वीकारे मनसि अणुत्वेन यत्किञ्चिदनुपस्थितैः अणुभिश्च सहेन्द्रियसंबन्धाभावादणुत्वेन सकलाणुमानसप्रत्यक्षं न स्यादत आह—**इदमिति** । यत् इन्द्रियसम्बन्धेत्यादि पूर्वमुक्तम्, तत्तु बहिरिन्द्रियजन्य प्रत्यक्ष एव बोध्यम् । मानसप्रत्यक्षे तु अविशेषतः 'ज्ञानप्रकारीभूत' । मेतावन्मात्रलक्षणम् । तेन यत्किञ्चिदणुज्ञाने जातेऽणुत्वेन सकलाणुज्ञानं सम्भवत्येव, तत्र ज्ञानमणूनाम् तस्मिन्नणुत्वस्य प्रकारीभूतत्वाद् इति सारांशः ।।६३।।

परन्तु समानानां भावः सामान्यम् । तच्च क्वचिन्नित्यं धूमत्वादि, क्वचिदनित्यं घटादि ।

अलौकिकसन्निकर्षे सामान्यं न तावज्जातिमात्रबोधकमपितु ज्ञानप्रकारीभूतधर्ममात्रबोधकमित्याशयेनाह—**परन्विति** । सामान्यानां एकाकारप्रतीति-

विषयाणाम्, भावः विशेषणम्, सामान्यम् । एकाकारस्य या प्रतीतिः ज्ञानम्, तज्ज्ञानस्य यो विषयः तज्ज्ञानस्य विशेषणमेव सामान्यमिति भावः । यथा अयं घटः, अयं घटः इत्याकारिका या एकाकारा प्रतीतिः (ज्ञानम्) तस्या विषयो घटः तत्र विशेषणीभूतं घटत्वं सामान्यम् । एवं घटवद्भूतलं घटवद्भूतलं इत्येकाकार-प्रतीतौ विषयो घटवद्भूतलं तत्र विशेषणीभूतो घटः सामान्यम् । (घटवदित्युक्तौ घटवति घटस्यैव विशेषणत्वम्, भूतलमित्यस्योपादानन्तु अभिव्यक्त्यर्थमेव क्रियते, घटवदित्यनेन सह तस्याभेदान्वये तदुपादानस्य व्यर्थत्वात्, एवमन्यत्रापि दण्डी पुरुषः, रूपवान् घटः इत्यादावुन्नेयम्) । एवं धूमो धूम इत्याकारकज्ञानस्य विषयो धूमः तत्र विशेषणीभूतं धूमत्वं सामान्यम् । इत्थञ्च क्वचिद्धूमोधूमइत्यादौ धूमत्वादि-सामान्यं नित्यम्, क्वचिच्च घटवद्भूतलमित्यादौ घटाद्यनित्यं सामान्यम् ।

यत्रैको घटः संयोगेन भूतले समवायेन कपाले वा ज्ञातस्तदनन्तरं सर्वेषा-मेव तद्घटवतां भूतलादीनां कपालादीनां वा ज्ञानं भवति तत्रेदं बोध्यम् ।

ननु पारिभाषिकार्थं परित्यज्य एवंभूतविलक्षणार्थस्वीकारे किम्फलमित्यत आह—**यत्रेति** । विशेषणस्य सामान्यत्वस्वीकारे यदा घटवद्भूतलम्, घटवत्क-पालम् इत्युक्तावेको घटः संयोगेन भूतले, समवायेन च कपाले वा ज्ञातस्तदा घटस्य तत्र तत्र विशेषणतया तदनन्तरमनित्यसामान्यलक्षणप्रत्यासत्त्या सर्वेषामेव तद्-घटवताम् (तद्घटवतो भूतलस्य तद्घटवतो वायोः तद्घटवतः कालस्य, एवं यावतां भानं भवितुं योग्यं तेषां सर्वेषामिति भावः) भूतलकपालादीनां भानं भवति, विशेषणस्य सामान्यत्वास्वीकारे तु तत्र तत्र घटरूपसामान्याभावान्न स्यादनित्य-लक्षणप्रत्यासत्त्या तद्भूतलादीनां भानमिति तथा स्वीक्रियते ।

परन्तु सामान्यं येन संबन्धेन ज्ञायते तेन सम्बन्धेनाधिकारणानां प्रत्यासत्तिः । किन्तु यत्र तद्घटनाशानन्तरं तद्घटवतः स्मरणं जातं तत्र सामान्य-लक्षणया सर्वेषां तद्घटवतां भानं न स्यात् सामान्यस्य तदानीमभावात् ।

ननु घटवद्भूतलमित्यादावपि परम्परया घटत्वस्यैवास्तु प्रत्यासत्तित्वम् किं विलक्षणसामान्यस्वीकारेणेत्यत आह—**परन्त्विति** । अयम्भावः । सामान्यं येन संबन्धेन यत्र ज्ञातं भवेत्, तत्र तेनैव संबन्धेनाधिकरणानाम् सामान्येन सह

सम्बन्धो बोध्यः । यथा घटवद्भूतलमित्युक्तौ संयोगसम्बन्धेन घटरूपसामान्यं भूतले ज्ञातम्, अतो भूतलरूपाधिकरणे घटरूपसामान्यं संयोगसम्बन्धेन वर्तते । एवं घटवान् कपाल इत्युक्तौ घटरूपसामान्यं समवायेन कपालरूपाधिकरणे ज्ञातमिति तत्र समवायेन घटरूपसामान्यस्य संबन्धो बोध्यः । तेन घटस्य कपाले समवायेन ज्ञाततया समवायेन घटवतामेव प्रत्यासत्तिरन्यथा समवायेन घटज्ञाने कालिक-सम्बन्धेन घटवताम् पटादीनामपि भानापत्तिः स्यात् । एतत्पर्यन्तं सर्वव्याख्यानम् ।

'सामान्यलक्षण ।' इति पदस्य सामान्यस्वरूपप्रत्यासत्तिरित्यर्थेनाकलनीयम्, किन्तु यदि सामान्यलक्षणस्यायमर्थो भवेत्तदा यस्मिन् स्थले तद्घटनाशानन्तरं तद्घटवताम् भूतलकपालवायुकालादीनां स्मरणं जातम्, तत्रानित्यलक्षणप्रत्यासत्ति-रूपघटस्य नाशात्तद्घटवतां केषामपि भानं न स्यात् । सम्बन्धाभावे सम्बन्धिनो-ऽप्रत्यक्षत्वस्य सुलभत्वादित्थमत्राव्याप्तिर्दोषः ।

किञ्चेन्द्रियसम्बन्धविशेष्यकं घट इति ज्ञानं यत्र जातं तत्र परदिने इन्द्रिय-सम्बन्धं विनापि तादृशज्ञानप्रकारीभूतसामान्यस्य सत्त्वात्तादृशज्ञानं कुतो न जायते ।

अपरञ्च यदा कस्मिँश्चिद्दिने इन्द्रियसम्बद्धविशेष्यकम् घट इत्याकारकम् ज्ञानं जातम्, तदा परस्मिन्दिने इन्द्रियसम्बन्धाभावेऽपि (घटप्रत्यक्षं विनैवेति भावः) घटत्वप्रकारकघटविशेष्यकं ज्ञानं स्यात् । सामान्यस्य नित्यत्वेन तदानीमपि घटत्वरूप-सामान्यस्य वर्तमानतया तादृशप्रत्यक्षे बाधकाभावात् ।

तस्मात् सामान्यविषयकं ज्ञानं प्रत्यासत्तिर्न तु सामान्यमित्याह—

आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते ।

आसत्तिरित्यादि— **आसत्तिः प्रत्यासत्तिरित्यर्थः । तथा च सामान्यलक्षण इत्यत्र लक्षणशब्दस्य विषयोऽर्थः । तेन सामान्यविषयकं ज्ञानं प्रत्यासत्तिरित्यर्थो लभ्यते ।**

इत्थमेवंभूतस्थलेऽतिव्याप्तिर्दोषः स्यादित्यव्याप्त्यतिव्याप्तिरूपदोषसद्भावात्

प्रत्यक्षे सामान्यस्वरूपा प्रत्यासत्तिरित्ययोग्यमित्यरुचेराह—**सामान्येति**। आश्रयाणां अधिकरणानां आसत्तिः प्रत्यासत्तिस्तु सामान्यज्ञानमिष्यते।

सामान्यलक्षण इत्यत्र लक्षणशब्दस्य विषयार्थपरकत्वेन सामान्यविषकं ज्ञानं प्रत्यासत्तिः, न तु सामान्यस्वरूपेति घटनाशात् पूर्वं घटरूपनित्यप्रत्यासत्तेर्ज्ञानं जातमेवातो नाशानन्तरमपि तद्घटनाशवद्भूतलादीनां भानं भवति। परदिने च घटदर्शनाभावात् सामान्यज्ञानमन्तरेण न घटविषयकं ज्ञानमेवं सर्वं अनवद्यम्।

ननु चक्षुःसंयोगादिकं विनापि सामान्यज्ञानं यत्र वर्तते तत्र सकलघटादीनां चाक्षुषादिप्रत्यक्षं स्यादत आह—

तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते ।।६४।।

तदिन्द्रियजेति—अस्यार्थः। **यदा बहिरिन्द्रियेण सामान्यलक्षणया ज्ञानं जननीयं तदा यत्किञ्चिद्धर्मिणि तत्सामान्यस्य तदिन्द्रियजन्यज्ञानस्य सामग्री अपेक्षिता। सा च सामग्री चक्षुःसंयोगालोकसंयोगादिकम्। तेनान्धकारादौ चक्षुरादीनां तादृशं ज्ञानं न जायते ।।६४।।**

ननु सामान्यविषयकज्ञानस्य स्वीकारेऽपि प्रत्यासत्तित्वे, एकस्मिन् दिने इन्द्रियसम्बद्धविशेष्यके घट इत्यकारके ज्ञाने जातेऽपरस्मिन्निन्द्रियसम्बन्धाभावेऽपि घटत्वरूपसामान्यविषयकज्ञानस्य तदानीं वर्तमानतया पूर्वोक्तातिव्याप्तिर्दुष्परिहारैव, किञ्च सामान्यस्य नित्यत्वेनान्धकारदावपि तत्सत्त्वात् सकलघटादीनाम् इन्द्रियसम्बन्धमन्तरेणैव चक्षुषा प्रत्यक्षं स्यात्, इत्यत आह—**तदिति**। अयमत्राभिप्रायोऽवगन्तव्यः। 'यदा बहिरिन्द्रियेण चक्षुरादिना सामान्यलक्षणया ज्ञानं कर्तुं स्यात् तदा यत्किञ्चिद्धर्मिणि (घटादौ) तत्सामान्यस्य तदिन्द्रियजन्यज्ञानस्य (चक्षुरादीन्द्रियजन्यज्ञानस्य) चक्षुःसंयोगालोकसंयोगादिरूपा सामग्र्यपेक्षिता। तेनान्धकारेऽपरस्मिन् दिने वा घटादिना चक्षुरादिसम्बन्धाभावान्न तादृशं ज्ञानम् ।।६४।।

ननु ज्ञानलक्षणा प्रत्यासत्तिर्यदि ज्ञानरूपा सामान्यलक्षणापि ज्ञानरूपा तदा तयोर्भेदो न स्यादत आह—

विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ।

विषयीति । सामान्यलक्षणाप्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जनयति । ज्ञानलक्षणा प्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिरिति ।

ननु प्रत्यासत्तिद्वयस्य ज्ञानस्वरूपत्वे (सामान्यज्ञानस्वरूपत्वे) तयोर्भेदो न स्यादिति भेदमापादयितुमाह—**विषयीति** । ज्ञानलक्षणः ज्ञानलक्षणा प्रत्यासत्तिर्यस्य विषयी तस्यैव व्यापारः सन्निकर्ष इति भावः । सामान्यलक्षणाप्रत्यासत्तिस्तदाश्रयस्य ज्ञानमुत्पादयति । यथा घटत्वधूमत्वादिज्ञाने जाते सामान्यलक्षणाप्रत्यासत्त्या तदाश्रयाणां कालान्तरीयदेशान्तरीय-सकलधूमघटादीनां ज्ञानं भवति । ज्ञानलक्षणाप्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तस्यैव ज्ञानमुत्पादयति । यथा कुत्रचित् स्थले घ्राणेन चन्दनखण्डसौरभस्य प्रत्यक्षं जातम्, पश्चात् क्वापि चक्षुषा चन्दनखण्डे दृष्टे एव घ्राणेन्द्रियसन्निकर्षमन्तरेणापि, स्वजन्यप्रत्यक्षोद्बोधितसंस्कारजन्यस्मृतिविषयत्वसम्बन्धेन ज्ञानलक्षणया सौरभभानं जायते । इत्थं स्पष्ट एव तयोर्भेदः ।

अत्रायमर्थः । प्रत्यक्षे सन्निकर्षं विना भानं न सम्भवति तथा च सामान्यलक्षणां विना धूमत्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनां च भानं कथं भवेत्तदर्थं सामान्यलक्षणा स्वीक्रियते ।

ननु किमर्थमभ्युपगम्यते सामान्यलक्षणाप्रत्यासत्तिरिति चेच्छृणु—प्रत्यक्षे सम्बन्धमन्तरे भानं न भवति, अतः सामान्यलक्षणप्रत्यासत्तिर्न यद्यभ्युपगम्येत तदा प्रत्यक्षधूमे धूमत्वज्ञानानन्तरं प्रत्यक्षवह्नौ वह्नित्वज्ञानानन्तरं च कालान्तरीयदेशान्तरीय-धूमवह्नीनामनुपस्थितत्वेन धूमत्वेन सकलधूमानां, वह्नित्वेन सकलवह्नीनाञ्च ज्ञानं भवेदिति तदावश्यकत्वम् ।

न च सकलवह्निधूममानाभावे का क्षतिरिति वाच्यम्, प्रत्यक्षधूमे वह्निसम्बन्धस्य गृहीतत्वादन्यधूमस्य चानुपस्थितत्वाद्धमो वह्निव्याप्यो न वेति संशयानुपपत्तेः । मन्मते तु सामान्यलक्षणया सकलधूमोपस्थितौ कालान्तरीयदेशान्तरीयधूमे वह्निव्याप्यत्वसंदेहः सम्भवति । न च सामान्यलक्षणास्वीकारे प्रमेयत्वेन

सकलप्रमेयज्ञाने जाते सार्वज्ञ्यापत्तिरितिवाच्यम्, प्रमेयत्वेन सकलप्रमेयज्ञाने जातेऽपि विशिष्य सकलपदार्थानामज्ञातत्वेन सार्वज्ञ्याभावात् ।

न च, मास्तु कालान्तरीय-देशान्तरीय-वह्निधूमज्ञानं का हानिरिति वाच्यम्, प्रत्यक्षधूमे वह्निसम्बन्धगृहीतत्वेन धूमान्तरस्य चानुपस्थितत्वेन धूमो वह्निव्याप्यो न वेति सन्देहानुपपत्तेः । तत्स्वीकारे तु तयैव प्रत्यासत्त्या धूमत्वेन सकलधूमानां, वह्नित्वेन च सकलवह्नीनां समुपस्थितौ कालान्तरीय-देशान्तरीय-धूमे वह्निव्याप्यत्व-सन्देहो नानुपपन्नो भवति ।

नन्वेवं सामान्यलक्षणया प्रमेयत्वेन सकलप्रमेयपदार्थज्ञाने जाते सति सर्व एव सर्वज्ञः स्यादिति चेन्न, प्रमेयत्वेन सकलप्रमेयपदार्थज्ञाने जातेऽपि विशिष्य तत्तत्सकलपदार्थानामज्ञातत्वेन सार्वज्ञ्यापत्तेरभावात् ।

एवं ज्ञानलक्षणाया अस्वीकारे सुरभि चन्दनमिति ज्ञाने सौरभस्य भानं कथं स्यात् ।

नन्वस्तु तर्हि सामान्यलक्षणैव, किमर्थमभ्युपेयते ज्ञानलक्षणापीति चेत्-श्रूयताम्—ज्ञानलक्षणाप्रत्यासत्त्यस्वीकारे चन्दनशकलस्य चाक्षुषप्रत्यक्षे जाते तदानीं सौरभज्ञानजनक-घ्राणेन्द्रियसन्निकर्षाभावेन सुरभिचन्दनमिति ज्ञानेऽपि पश्चात् क्वचित् सौरभस्य भानं न स्यात् । अतो ज्ञानलक्षणाप्रत्यासत्तिरङ्गीक्रियते ।

यद्यपि सामान्यलक्षणयापि सौरभज्ञानं सम्भवति तथापि सौरभत्वस्य भानं ज्ञानलक्षणया । एवं यत्र धूमत्वेन धूलीपटलं ज्ञातं तत्र धूलीपटलस्यानुव्यवसाये भानं ज्ञानलक्षणया ।

ननु यथैकस्मिन् दिने घटत्वरूपसामान्यलक्षणया घटज्ञाने जाते, परस्मिन् दिने घटे दृष्टे एव घटत्वेन घटस्मरणं जायते, तथैव सुरभि चन्दनमिति ज्ञानेऽपि सौरभत्वप्रकारकस्मृतिसामग्र्याः सत्त्वेन सामान्यलक्षणयैव सौरभत्वेन सौरभज्ञान-सम्भवे किमनया ज्ञानलक्षणयेत्यत आह—**यद्यपीति** । इदमिहाकूतम्—'सामान्य-लक्षणा तु सामान्याश्रयस्य ज्ञानं जनयति, ज्ञानलक्षणा च यद्विषयकं ज्ञानं तस्यैव

प्रत्यासत्तिरिति' मूले एवोक्तम् । अर्थात् सामान्यलक्षणया धर्मिज्ञानं भवति, ज्ञानलक्षणया च धर्मज्ञानम्, अतो ज्ञानलक्षणाभावे सौरभत्वेन सौरभज्ञाने जातेऽपि स्वरूपतः सौरभत्वभानकरणदशायाम् सौरभत्वे धर्मान्तरानुपस्थित्या सामान्यलक्षणया सौरभत्वभानं न स्यात् । किञ्च, यत्र धूमत्वेन धूलीपटलं ज्ञातम्, तत्र धूलीपटले धूमत्वस्य सम्बन्धाभावात् सामान्यलक्षणया सकलधूमविषयकं भानं न स्यात् । ज्ञानलक्षणास्वीकारे तु धूलीपटले धूमत्वाभावेऽपि धूमत्वप्रकारकज्ञानस्य सत्त्वेन सम्भवत्येवानुव्यवसायेन सकलधूमविषयकं ज्ञानमित्यदोषः ।

योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ।

योगजो द्विविध इति । योगाभ्यासजनितो धर्मविशेषः श्रुति-पुराणादि प्रतिपाद्य इत्यर्थः । युक्तयुञ्जानभेदत इति । युक्तयुञ्जानरूपयोगिद्वैविध्याद्धर्मस्यापि द्वैविध्यमिति भावः ।

एवमलौकिकसन्निकर्षेषु सामान्यलक्षणज्ञानलक्षणरूपसन्निकर्षद्वयं व्याख्यायेदानीं योगजसन्निकर्षम् व्याचष्टे—**योगज इति ।** योगजः योगाभ्यासोत्पन्नः सन्निकर्षः, युक्तयुञ्जानभेदतः द्विविधः प्रोक्तः । युक्तयुञ्जानभेदेन योगिनां द्वैविध्येन सन्निकर्षस्यापि द्वैविध्यम् ।

युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः ॥६५॥

युक्तस्य सर्वदाभानमिति । युक्तस्य तावद्योगजधर्मसहायेन मनसा आकाशपरमाण्वादि-निखिलपदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति । द्वितीयस्य चिन्ताविशेषोऽपि सहकारीति ॥६५॥

॥ इति श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचितायां
सिद्धान्तमुक्तावल्यां प्रत्यक्षखण्डम् ॥

पूर्वोक्तसन्निकर्षद्वये कदा कः सन्निकर्ष इत्यत आह—**युक्तस्येति ।** यः युक्तः सिद्धः योगी तस्य तु योगाभ्यासोत्पन्नधर्मसाहाय्येन चेतसाऽऽकाशपरमाण्वादि-

निखिलपदार्थगोचरं सर्वदैव ज्ञानं भवति। युञ्जानस्य योगाभ्यासं कुर्वाणस्य तु चिन्ताविशेषोऽपि सहकारिकारणमिति ।।६५।।

। शुमन्धुरीति ।

प्रत्यक्षे छात्रबोधाय या कृता बालबोधिनी।
तया सर्वेष्टदातारौ प्रीणयेतां वृषाकपी ।।१।।

प्रत्यक्षेऽपि विदन्ति नैव सकले संशेरते येऽञ्जसा
पश्यन्तोऽनुपदं रहस्यमखिलं शैलूषकृत्यं यथा।
तेऽन्तेवासिजना न के यदि भवेत्तेषामियं मोदिका
सर्वार्थप्रतिपत्तये गुरुनिभा, सिद्धः प्रयासो मम ।।२।।

प्रत्यक्षेऽपि = (ग्रन्थपक्षे) प्रत्यक्षनामकेऽपि, (शैलूषकृत्यपक्षे) प्रत्यक्षेऽपि = समक्षेऽपि। सकले = (ग्रन्थपक्षे अलङ्कारविन्मते सशयोरभेदात्) शकले = खण्डे, (पक्षे) सम्पूर्णे (विषये इति शेष)। सशयो. सावर्ण्यास्वीकारे तु सकले = सम्पूर्णे इत्युभयत्रापि समानम्। शैलूषस्य = नटस्य । कृत्यम् = कर्तव्यम् । यथा = इव । पश्यन्तः = अवलोकयन्तः। अन्तेवासिजनाः = (ग्रन्थपक्षे) विद्यार्थिनः, (पक्षे) समीपवर्तिजनाः । अखिलं = निश्शेषम्। रहस्यम् = तत्त्वम् । नैव विदन्ति = नैवावधारयन्ति । अपितु अनुपदम् = पदे पदे। ये अञ्जसा = शीघ्रम्। संशेरते = सन्दिहन्ति। ते = एवंभूताः। के अन्तेवासिजनाः (उभयत्रापि योज्यम्) न; अपितु सर्व एव। यदि = चेत्। तेषाम् = सन्दिहानानाम्। सर्वार्थप्रतिपत्तये = सर्वार्थसम्यग्ज्ञानाय। गुरुणा तुल्या गुरुनिभा = गुरुतुल्या। इयम् = बालबोधिनी। मोदिका = आनन्ददायिनी। भवेत् = जायेत। तदा। मम = ग्रन्थनिर्मातुः। प्रयासः = यत्नः। सिद्धः = सफलः ।।

।। इति श्रीरामशरणत्रिपाठिकृतायां बालबोधिन्यां प्रत्यक्षखण्डः ।।

॥ श्रीलश्रीः ॥

मुक्तावली-प्रत्यक्षखण्ड-प्रश्नोत्तरी

भिन्तो यौ संशयग्रन्थिं छिन्तोऽज्ञानान्धकारताम् ।
तावङ्घ्री सम्प्रणम्येते, गुरूणामुकनीसदाम् ॥१॥
प्रणत्य गिरिजाजानिमब्धिजाजानिमप्यथा ।
ततो मुक्तावली - प्रश्नोत्तरीयं सम्वितायते ॥२॥

प्रश्नः—चूडामणीकृतेतिश्लोके तत्प्रतिपक्षदोषं निरस्य ग्रन्थारम्भे मङ्गलस्य प्रयोजनं तत्रत्यभेदश्च शङ्कासमाधिपूर्वं निरूप्यताम् ॥

उत्तरम्—विशेषणान्वयेन शान्ताकाङ्क्षस्य विशेष्यवाचकपदस्य विशेषणान्तरेणान्वयार्थं पुनरनुसन्धानं यत्र भवति तत्र समाप्तपुनरात्तत्वमिति तल्लक्षणेन चूडामणीकृतेत्यत्र चूडामणीकृतविधुर्वलयीकृतवासुकिरिति विशेषणद्वयेन शान्ताकाङ्क्षस्य विशेष्यवाचकस्य भव इति पदस्य, लीलाताण्डवपण्डित इति विशेषणान्तरेणान्वयार्थं पुनरनुसन्धानतयोक्तदोष इति शङ्का, किमर्थं विधोश्चूडामणीकरणम् किमर्थं वा वासुकेर्वलयीकरणमिति शङ्काया: जागरूकत्वेन भव इति विशेष्यवाचकपदस्य शान्ताकाङ्क्षत्वाभावेन, भवन्ति भूतान्यस्मादिति व्युत्पत्त्या भव पदस्य जगदुत्पत्तिकर्तृरूपार्थकतया यौगिकत्वमभ्युपगत्य तस्यैव विशेषणत्वेन लीलाताण्डवपण्डित इत्यस्य च विशेष्यत्वेन वा निरसनीया ॥

ग्रन्थारम्भे विघ्नविघाताय मङ्गलं क्रियते, तत्र विघ्नानां विघातो-विघ्नविघात इति षष्ठीसमासबलेन नवीनानां मते विघ्नध्वंस फलम् । विघ्नानां विघातो यस्मिन् कर्मणि तद्विघ्नविघातमिति बहुव्रीहिणा प्राचीनानाम् मते समाप्तिः फलमिति भेदः ।

तत्र प्राचीनानामयमाशयो यत्—'कादम्बर्यादौ सत्यपि मङ्गले समाप्त्यदर्शनात्, किरणावल्यादौ च मङ्गलाभावेऽपि निर्विघ्नपरिसमाप्ति-

दर्शनात् 'मङ्गलं निष्फलम्, फलविशेषशून्यत्वात्, जलताडनवत्' इत्यनुमानेन तस्य निष्फलत्वं न कल्पनीयम्; 'अविगीतिशिष्टाचारविषयत्वेन मङ्गलं सफलम्, अविगीतशिष्टाचारविषयत्वात्, दर्शश्राद्धवत्' इत्यनयारीत्या तस्य सफलत्वे, तत्र च फलजिज्ञासायां सम्भवति दृष्टफलकत्वेऽदृष्टफलकल्पनाया अन्याय्यत्वात् उपस्थितत्वाच्च 'मङ्गलं समाप्तिफलकम् समाप्त्यन्याफलकत्वे सति, सफलत्वात् यन्नैवं तन्नैवम्' इति व्यतिरेकिणा तस्य समाप्तिफलकत्वात्। इत्थञ्च यत्र किरणावल्यादौ मङ्गलाभावेऽपि समाप्तिस्तत्रापि 'नास्तिकग्रन्थः समङ्गलः, समाप्तिमत्त्वात्, यो यो हि समाप्तिमान् स स मङ्गलवान् सिद्धान्तकौमुद्यादिवत्' इत्यनुमानेन मङ्गलत्वं कल्प्यते। यत्र च कादम्बर्य्यादौ सत्यपि मङ्गले समाप्तिर्न दृश्यते तत्र प्रचुरस्यैव मङ्गलस्य बलवत्तरविघ्ननिराकरणकारणत्वेन मङ्गलस्य स्वल्पत्वं विघ्नस्य च प्राचुर्यं बलवत्तरत्वं वा कल्प्यते। मङ्गलस्य समाप्तिमात्रफलकत्वे विघ्नध्वंसो भवतु मा वा, समाप्तिरेव स्यादिति तु कल्पितुमशक्यम्। विघ्नध्वंसस्य मङ्गलद्वारत्वेन तद्विना समाप्तेः सर्वथाऽसम्भवात्।

नवीनानामाशयस्त्वयम् यत्— समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापादेव संभवतीति मङ्गलस्य विघ्नध्वंस एव फलम्। विघ्नाशङ्कया सर्वत्र स्थले तथैव शिष्टाचारं विविच्य मङ्गले कृते सति स्वतःसिद्धविघ्नविरहवता कृतस्य मङ्गलस्य निष्फलत्वापत्तिस्तु इष्टैव। सत्यपि विघ्ने तन्नाशस्य वेदबोधितत्वेन 'समाप्तिकामो मङ्गलमाचरेत्' इत्यादि वेदस्यापि प्रामाण्ये न कापि विप्रतिपत्तिः। 'सर्वे विघ्नाः शमं यान्ति गणेशस्तवपाठतः' इत्याद्युक्त्या गणेशस्तवेनैव विघ्नध्वंससम्भवे मङ्गलाव्यवहितोत्तरजायमानविघ्नध्वंसम्प्रत्येव तस्य कारणत्वात्। प्रतिबन्धकसंसर्गाभावस्यैव कार्यजनकत्वेन क्वचिच्च विघ्नात्यन्ताभावस्यैव समाप्तिसाधनत्वमवगन्तव्यम्। इत्थञ्च किरणावल्यादौ जन्मान्तरीयमङ्गलजन्यदुरितध्वंसस्य स्वतःसिद्धविघ्नात्यन्ताभावस्य वा कल्पनेनादोषः इतिदिक्।

प्रश्नः—ईश्वरसाधकानुमानप्रणाली कीदृशी ? द्यावाभूमीत्याद्यागमप्रमाणादेवेश्वरसिद्धौ अनुमानोपन्याससार्थक्यं लिख्यताम ।

उत्तरम्—नन्वीश्वरसत्तायां किम्प्रमाणम् ? न च सहस्रशीर्षेत्यादि तद्बोधकवेद एव प्रमाणमिति वाच्यम्, यावदीश्वरसत्तैव खपुष्पायते तावत्तदुच्चरितवेदस्यापि सर्वथाऽप्रामण्यादतोऽनुमानप्रमाणमुपन्यस्यति आचार्यः **संसारेत्यादि**—संसार एव महीरुहो वृक्षः तस्य बीजाय निमित्तकारणायेत्यथः । एतदेवेश्वरसत्तायां प्रमाणं भवति अनुमानप्रयोगश्चेत्थम्—

'क्षित्यङ्कुरादिकं कर्तृजन्यम् कार्यत्वात् घटवत्' तत्र क्षित्यङ्कुरादिकर्तृत्वस्यास्मदादीनां सर्वथा असम्भवतया तत्कर्तृत्वेनेश्वरः सिध्यति । न चास्मिन्ननुमाने 'कर्त्रजन्यत्वरूपसाध्याभावसाधकशरीराजन्यस्वरूपहेत्वन्तरस्य वर्तमानत्वेन सत्प्रतिपक्षहेत्वाभास' इति वाच्यम्, कर्त्रजन्यत्वमस्तु, शरीराजन्यत्वं मास्तु इत्याकारकव्याभिचारशङ्कायाम् अनुकूलतर्काभावात् । ममानुमानेन तु कर्तृजन्यत्वाभावे कार्यत्वमेव न स्यादित्यनुकूलतर्कस्य कार्यकारणभावरूपस्य वर्तमानतया अदोषः । एवमनुमानेनेश्वरसिद्धौ द्यावाभूमीत्याद्यगमाः अपि प्रमाणत्वेनोपयुक्ता इति ।

प्रश्नः—शक्तिसादृश्ययोरतिरिक्तपदार्थत्वशङ्कामुत्पाद्य निराकुरु ।

उत्तरम—ननु शक्तिसादृश्ययोरपि पृथक्पदार्थयोः सतोः कथमेत एव पदार्था ? शक्तिसादृश्यसत्तायामेव किम्प्रमाणमिति चेच्छृणु—चन्द्रकान्तमणिमन्त्रादि समवधानेन वह्निना दाहो न जन्यते, तदभावे तु जन्यते, तत्र मण्यादिनाऽग्नौ दाहानुकूलाशक्तिर्नाश्यते, मण्याद्यपसारणे सूर्यकान्तमण्यादिसमवधानेन वा तच्छक्तिर्जन्यतेऽतो ज्ञायते यद्दाहम्प्रति वह्निगतशक्तेरेवकारणत्वम न वह्नेः, अन्यथा मण्यादिसमहितेनापि वह्निना दाहः कथं न जायेत । इत्थं शक्तेरतिरिक्तपदार्थत्वमायातम् । एवं सादृश्यस्याप्यतिरिक्तपदार्थत्वम्, तच्चेत्थम्—'यथा गोत्वं नित्यं तथाऽश्वत्वमिति सादृश्यप्रतीतौ तस्य जातावपि वर्तमानतया, भावत्वेन प्रतीयमानादभावेऽपि तदन्तर्भावाभावात्तथैव योग्यत्वादिति चेन्न, मण्याद्यभावविशिष्टवह्न्यादेः स्वातन्त्र्येण

मण्यभावादेर्वा दाहादिकम्प्रति हेतुत्वकल्पनेनैव सर्वसामञ्जस्येऽनन्तशक्ति-तत्प्रागभावध्वंसकल्पनाऽनौचित्यात् । न च सूर्यकान्तमणिसत्त्वे प्रतिबन्धक-सद्भावेऽपि कथं दाह इति वाच्यम् । उत्तेजकाभावविशिष्टमण्यभावस्य दाहादिकम्प्रति हेतुत्वकल्पने उत्तेजकमणिसमवहिताग्नावुत्तेजकमण्यभाव-विशिष्टमण्यभावस्यावर्तमानतया दोषाभावात् । एवं चन्द्रवन्मुखमित्यादौ चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्त्वरूपसादृश्यस्य मुखे सत्त्वेन तद्भिन्नत्वे सति तद्गतभूयो धर्मवत्त्वमिति महिम्ना सादृश्यस्य पूर्वोक्त-धर्मवत्त्वेन धर्मस्य च गुणतया सादृश्यगुणेऽन्तर्भावान्नपृथक्त्वमिति दिक् ।।

प्रश्नः—**द्रव्यत्वजातिसाधनपुरस्सरं तमसो द्रव्यान्तरत्वं निरसनीयम् ।**

उत्तरम्—ननु द्रव्यत्वजातौ किम्प्रमाणम् ? पामराणां घृतजतुप्रभृतिषु द्रव्यत्व-व्यवहारदर्शनादिदं द्रव्यमिति अनुगतप्रतीतिस्तु वक्तुमशक्येति चेच्छृणु—कार्यमात्रम्प्रति तादात्म्येन द्रव्यस्य कारणत्वम्, कारणता च किञ्चिद्धर्मा-वच्छिन्नैव, अवच्छेदकधर्मश्चान्यूनानतिरिक्तवृत्तिरेवेति द्रव्यत्वस्यैवाव-च्छेदकतया नित्यत्वे सत्यनेकसमवेतत्वरूपजातिलक्षणेनानुमानाद् द्रव्यत्वं जातिः सिध्यति । अनुमानप्रयोगस्तु –'समवायसम्बन्धावच्छिन्ना कार्यत्वा-च्छिन्ना कार्यतानिरूपिताभेदसम्बन्धावच्छिन्ना या द्रव्यनिष्ठा कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वात्, या या कारणता सा सा किञ्चिद्धर्मावच्छिन्ना घटगतकार्यतानिरूपितकपालगतकारणतावत्' एवं बोध्यम् ।

किन्तु कार्यत्वस्य ध्वंसरूपकार्येऽपि वर्तमानतया तस्य च स्व-रूपेणैवोत्पत्तौ कार्यत्वस्य समवायसम्बन्धावच्छिन्नत्वाभावादस्यानुमान-स्यायोग्यतयाऽनुमानान्तरार्थं संयोगस्येति प्रतिपादयति । एवञ्च समवाय-सम्बन्धावच्छिन्नसंयोगत्वावच्छिन्नेत्याद्यनुमानस्वरूपं विधाय द्रव्यत्वं साधनीयम् । परन्तु येषां मते विभुद्वयसंयोगस्तेषां मते संयोगत्वस्य विभुद्वयसंयोगेऽपि वर्तमानतया तस्य च नित्यगतत्वेन नित्यत्वात्संयोग-त्वस्य कार्यतावच्छेदकत्वाभावेनेदमप्यनुमानमयोग्यमित्यरुचेराह—विभाग-स्येति ।

इत्थञ्च समवायसम्बन्धावच्छिन्नविभागत्वावच्छिन्नेत्याद्यानुमानस्य निर्दुष्टत्वेन साध्या द्रव्यत्वजातिरिति ।

ननु गुणाश्रयत्वे सति क्रियाश्रयत्वं द्रव्यत्वमिति द्रव्यत्वलक्षणस्य नीलतमश्चलतीति प्रयोगे तमस्यपि समन्वयतया तमसोऽपि द्रव्यत्वं कथयित्वा दशद्रव्याणि इति कथं नोक्तम् ? यतो हि तन्न कस्मिँश्चिद्द्रव्येऽन्तर्भवति, तथाहि—तमो न पृथिवी निर्गन्धत्वात्, न जलादिकम् नीलरूपवत्त्वात्, एवं न क्वाप्यन्तर्भावः । द्रव्यप्रत्यक्षविषये "गृह्णाति चक्षुः संयोगादालोकोद्भूतरूपयोः" इति वक्ष्यमाणतया तमसो द्रव्यत्वे तस्याप्यालोकसंयोगेनैव चक्षुषा प्रत्यक्षं भविष्यतीति तु वक्तुमशक्यम्, तत्प्रत्यक्षे आलोकनिरपेक्षचक्षुषः सापेक्षत्वादित्थम्, यद्यपि दशमद्रव्यत्वं सम्भवति, तथाप्यावश्यकतेजोऽभावे एव एतदुत्पत्तौ द्रव्यान्तरकल्पनस्यायोग्यतया तन्न योग्यम् । कथं तत्र रूपवत्ताप्रतीतिरिति चेत्, आकाशवत्साभ्रमरूपैवेति गृहाण, एवं कर्मवत्ताप्रतीतिरपि वाष्पगन्त्र्यादिस्थजनानां वृक्षादिगमनवद्भ्रमयुक्तावधेयेति शम् ।

प्रश्नः—प्रतिपदव्यावृतिपुरस्सरं जातिलक्षणं व्याख्याय विभुद्वयसंयोगाभ्युपगमे तत्रातिव्याप्तिर्वारणीया ।

उत्तरम्—नित्यत्वे सत्यनेकसमवेतत्वम् सामान्यम् (जातिः)। नन्वनेकसमवेतत्वमित्येवोच्यताम् किं नित्यत्वे सतीत्यादिना ? संयोगादीनामपि अनेकसमवेतत्वेन तत्रातिव्याप्तेः । न चैवमपि नित्यत्वे सति समवेतत्वमित्येवास्त्विति वाच्यम्, गगनपरिमाणमहत्त्वादीनामपि तथात्वेन तत्रातिव्याप्तेः । नन्वेवमपि नित्यत्वे सत्यनेकवृत्तित्वमित्येवास्तु, तदपि न, अत्यन्ताभावेऽपि नित्यत्वे सत्यनेकवृत्तित्वस्य वर्तमानतया दोषवारणाय वृत्तित्वसामान्यं विहाय समवेतत्वमिति कथनस्य सार्थक्यात् । यद्यपि नित्यत्वे सतीत्यादि लक्षणेन न विभुद्वयसंयोगस्वीकारे तत्रातिव्याप्तिस्तथापि विभुद्वयसंयोगास्वीकर्तृमते एव तल्लक्षणस्य सत्त्वेनादोषः ।

प्रश्नः —जातिबाधकसङ्ग्रहं सम्यङ् निरूप्य सामान्यत्वस्य जातित्वसंभवेऽपि तस्यानेकसमवेतत्वाभावाज्जातित्वासंभवेनानवस्थाऽऽपादनं कथं सङ्गच्छत इति साधूपपादय ।

उत्तरम्—प्रश्नोऽयं बालबोधिनीव्याख्यया गतार्थो बोध्यः ।

प्रश्नः —विशेषपदार्थस्वीकारे युक्तिमुपन्यस्य तस्य निष्कृष्टं लक्षणं लिख ।

उत्तरम् —सावयवानां द्व्यणुकपर्यन्तघटादीनामवयवभेदात्परस्परम् भेदसिद्धावपि निरवयवपरमाणूनां भेदसाधकोपायान्तराभावेन परस्परमभेदे द्व्यणुकादीनामप्यभेदापत्तौ लघुमहन्नीलपीतपुष्पादीनाम् लघुमहद्घटादीनामप्यभेदापत्तिरिति तद्वारणाय विशेषाख्यः पदार्थः स्वीक्रियते तथा सति 'अयं परमाणुरस्माद्भिन्नो विशेषात्' इत्यनुमानेनावयवभेदसिद्धौ 'अयं घटो घटान्तराद्भिन्नः भिन्नावयवारब्धत्वात् पटवत्' इत्यनुमानेन परस्परं भेदः सिध्यति । विशेषपदार्थास्वीकारे तु परमाणुभेदसाधकाभावादवयवाभेदेऽवयविभेदः स्पष्ट एवेति । तन्निष्कृष्टलक्षणन्तु—"जातिभिन्नत्वे सति जातिमद्भिन्नत्वम्" बोध्यम् ।।

प्रश्नः —समवायसिद्धिप्रकारो विस्तरेण वाच्यः ।

उत्तरम् —अवयवावयविनोर्जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवायः । तत्त्वञ्च, नित्यसम्बन्धत्वम् । तत्र प्रमाणन्त्वनुमाननम् तथाहि—गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वात्, दण्डीपुरुष इति विशिष्टबुद्धिवत् । द्वयोर्द्रव्ययोरेव संयोगसंबन्धो भवतीति दण्डपुरुषवदत्र संयोगसंबन्धस्य वक्तुमशक्यत्वेन, अयुतसिद्धयोः स्वरूपसम्बन्ध इति मते सिद्धसाधनत्वापत्त्या, समवायसाधने प्रवृत्तानां नैयायिकानां मतेऽर्थान्तरत्वापत्त्या चाभावस्थले सिद्धस्य स्वरूपसम्बन्धस्यापि कल्पितुमशक्यत्वेनानन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवाल्लाघवादेकसमवायसिद्धिः । न च समवायस्यैकत्वे रूपसमवाय-स्पर्शसमवाययोरेकत्वेन वायौ स्पर्शसमवायस्य वर्तमानतया

तत्र रूपवत्तापत्तिरिति वाच्यम्। वायौ रूपसमवायसत्त्वेऽपि रूपाभावाद्रूपवत्ताबुद्धेः सर्वथाऽसंभवात्। नन्वेवमभावस्यापि सर्वत्र स्वरूपसम्बन्धेन वर्तमानतयाऽनेकस्वरूपाणां सम्बन्धत्वकल्पने गौरवाल्लाघवाय समवायवद्वैशिष्ट्यं सम्बन्धान्तरं कल्प्यतामिति चेन्न, स्वीक्रियमाणसम्बन्धस्य नित्यत्वस्वीकारे घटमपसार्य पुनरानयनेऽपि अभावस्य नित्यतया तत्र वर्तमानत्वाद्वैशिष्ट्यस्य च तत्र सत्त्वेन घटाभावबुद्धिप्रसङ्गात्। अन्यथा घटाभावस्थलेऽपि तत्प्रतीतौ प्रलयापत्तिरेव स्यात्। समवायस्यैकत्वस्वीकारे तु पाकेन रक्ततादशायाम् श्यामरूपस्य नष्टत्वाच्छ्यामसमवायसत्त्वेऽपि न श्यामवत्ताबुद्धिः। स्वीक्रियमाणवैशिष्ट्यस्य चानित्यत्वस्वीकारे अनन्तवैशिष्ट्यकल्पनायां गौरवं प्रत्यक्षमेवेति तत्कालिकतत्तद्भूतलादिकस्य तत्तदभावानां सम्बन्धत्वकल्पने सिद्धान्तेऽप्यभावस्य नित्यतया घटमपसार्यानयनकाले न घटात्यन्ताभावबुद्धिरिति दिक्॥

प्रश्नः —अत्यन्ताभावं निरूप्यभावानामधिकरणात्मकत्वं निराकुरु।

उत्तरम्—'अत्यन्ताभावत्वञ्च नित्यसंसर्गाभावत्वम्'। नन्वत्यन्ताभावस्य नित्यत्वे घटादिकमपसार्य पुनरानयनकालेऽपि तदत्यन्ताभावबुद्धिः स्यादिति चेन्न, तत्तत्कालिकतत्तद्भूतलादेः तत्तदभावानां सम्बन्धत्वमिति पूर्वमुक्ततया घटानयनकाले घटकालस्य सम्बन्धाघटकतयाऽत्यन्ताभावस्य नित्यत्वेऽपि घटानयनभावबुद्धेरप्रसङ्गात्।

केचित्तु अत्यन्तमभावोऽत्यन्ताभाव इति व्युत्पत्तिबलेन त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताको योऽभावः सोऽत्यन्ताभाव इत्यभिप्रायेण शशविषाणाभावः इत्यादिस्थले एव तं स्वीकृत्य घटाद्यानयनकाले उत्पादविनाशशालिनश्चतुर्थमभावमभ्युपयन्ति। ननु घटानयनकाले मास्तु तदत्यन्ताभावबुद्धिः किन्तु घटानयनात्प्राक् कथं न तदत्यन्ताभावबुद्धिरिति चेन्न, श्यामघटे रक्तो नास्ति, रक्तघटे श्यामो नास्तीति बुद्धिः प्रागभावं ध्वसञ्चावगाहते, न तु तदत्यन्ताभावमिति प्राचीनानाम्मते ध्वंसप्रागभावयोरधिकरणेऽत्यन्ताभावाभावात्। नवीनास्तु तत्र विरोधे न किमपि प्रमाणमिति ध्वंसादिकालावच्छेदेनात्यन्ताभावप्रतीतिमाहुः।

ननु घटाभावावद्भूतलमित्यादौ घटाभावस्य भूतलादिस्वरूपस्वीकारेणैव सिद्धौ किमर्थमभावः पृथगभ्युपेयते इति चेन्न, अत्यन्ताधिकरणात्मकत्वकल्पनापेक्षयाऽतिरिक्तकल्पनायाः एव लघीयस्त्वात् । अतएवाधाराधेयभावोऽप्युपपद्यतेऽन्यथा स्वस्य स्वाधिकरणत्वासम्भवाद् घटाभाववद्भूतलमित्यादौ आधाराधेयभावो नोपपद्येत । किञ्च गन्धाभाववज्जलमित्यादौ गन्धाद्यभावस्य जलादिस्वरूपताङ्गीकारे 'यो गुणो यदिन्द्रियेण गृह्यते तन्निष्ठाजातिस्तदभावेऽपि तेनैवेन्द्रियेण गृह्यते' इति नियमेन जलादीनां तत्तदिन्द्रियैरग्राह्यत्वापत्तिः स्यात् । अतएव नाभावो ज्ञानस्वरूपो न वा कालस्वरूपः, घटाभाववद्भूतलमित्यादौ घटाभावस्य ज्ञानादिस्वरूपत्वे तत्तदिन्द्रियैरप्रत्यक्षत्वापत्तेरिति शम् ।।

प्रश्नः—द्रव्यादय पञ्चभावा अनेके समवायिनः । सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः ।। अस्याः कारिकायाः मुक्तावत्युक्तदिशा व्याख्या क्रियताम् ।

उत्तरम्—द्रव्यगुणकर्मसामान्यविशेषाणाम् साधर्म्यमनेकत्वं समवायित्वञ्च । यद्यप्यनेकत्वमभावेऽप्यस्ति तथाप्यनेकत्वे सति भावत्वं पञ्चानां साधर्म्यम् । तथा चानेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वमिति फलितोऽर्थः, तेन प्रत्येकं घटादावाकाशादौ च नातिव्याप्तिः । समवायित्वञ्च समवायसम्बन्धेन सम्बन्धित्वम् न तु समवायत्वं सामान्यादावभावात् । तथा च समवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वमिति फलितोऽर्थः, तेन नित्यद्रव्येषु नातिव्याप्तिः ।

सत्तेति—तत्र आद्यास्त्रयः सत्तावन्तः । द्रव्यगुणकर्मणाम् सत्तावत्त्वं साधर्म्यमितिभावः । गुणादिरिति—गुणकर्मणोर्निर्गुणत्वं निष्क्रियत्वञ्च साधर्म्यमिति तत्त्वम् । यद्यपि गुणक्रियाशून्यत्वमाद्यलणे घटादावतिव्याप्तं क्रियाशून्यत्वञ्च गगनादावतिव्याप्तं तथापि गुणवदवृत्तिधर्मवत्त्वं, कर्मवद्वृत्तिपदार्थविभाजकोपाधिमत्त्वं मदर्थः । न हि घटत्वादिकं द्रव्यत्वं वा गुणवद्वृत्ति, किन्तु गुणत्वादिकम् तथा आकाशादिकं तु न पदार्थविभाजकोपाधिः ।

प्रश्नः —सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः । एषा कारिका साधु व्याख्यातव्या ।

उत्तरम् —सामान्यादीनां सामान्यानधिकरणत्वं साधर्म्यम् । अणुपरिमाणुभिन्नानाञ्च कारणत्वं साधर्म्यम्, परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियम इति महदारब्धस्य महत्तरत्ववदणुजन्यस्याणुतरत्वप्रसङ्गादणुपरिमाणं तु न स्वाश्रयारब्धद्रव्यपरिमाणारम्भकमिति न कस्यापि कारणम् । एवमेव परमहत्परिमाणातीन्द्रियसामान्यविशेषाणामप्यकारणत्वं साधर्म्यम् बोध्यम् । ननु योगिनामणुप्रत्यक्षं तद्गतपरिमाणप्रत्यक्षञ्च भवतीति तत्तद्विषयकप्रत्यक्षम्प्रति विशेषस्य तादात्म्येन कारणतया, अणुपरिमाणस्य योगिप्रत्यक्षम्प्रति कारणत्वेनाणुपरिमाणस्याकारणत्वमपितु निर्विषयकमेवेतरेषां ज्ञानमन्यथा तेषां भूतभाविज्ञानित्वं व्याहन्येतेत्यभिप्रायेण तथोक्तेः ।

ननु योगिनामेकस्मिन्परमाणौ दृष्टेऽणुत्वेन सामान्यलक्षणया सकलाणुप्रत्यक्षं भवतीति सकलाणुप्रत्यक्षेऽतीन्द्रियसामान्यस्यापि कारणतयाऽतीन्द्रियसामान्यं तु न कस्यापि कारणमिति कथनमयोग्यमिति चेन्न, ज्ञायमानसामान्यं न प्रत्यासत्तिरपितु सामान्यज्ञानमेवान्यथा धूलीपटले धूमत्वभ्रमानन्तरं तदानी धूमत्वेन सहेन्द्रियसम्बन्धाभावाद्धूमत्वे सकलधूमविषयकं ज्ञानं न स्यात् । सामान्यज्ञानस्य कारणत्वे तु कस्मिँश्चित्काले धूमज्ञानं जातमेवेति धूमत्वेन सकलधूमविषयकज्ञानेन किमपि बाधकमिति तात्पर्येण तदुच्चारणम् ।

ननु परमाणूनां परस्परभेदसाधको विशेष एवेति मूल एवोक्ततया 'अयं परमाणुरस्माद्भिन्नः विशेषात्' इति परमाणूनां परम्परभेदसाधकानुमितौ विशेषस्य कारणत्वेन तस्याकारणत्वप्रतिपादनमयोग्यमिति चेन्न, ज्ञायमानं लिङ्गं नानुमितिकारणमपितु लिङ्गज्ञानमेव, अन्यथा 'अयं पर्वतो वह्निमान् आसीत् भूतधूमात्' 'अयं पर्वतो वह्निमान् भविष्यति भाविधूमात्' इत्यादौ लिङ्गस्य तदानीमभावादनागतादिलिङ्गेनानुमितिर्न

स्यात् इत्याकूते न तथा भणितेः। एवं महत्परिमाणस्यापि न कारणत्वमिति बोध्यम्।

अनुमानप्रत्यक्षे आत्ममहत्त्वस्य कारणत्वेन परममहत्परिमाणं न कस्यापि कारणमिति कथं सङ्गच्छत इति चेत्तदा तेनाकाशादि परममहत्परिमाणस्य ग्रहणेनादोषो अवगन्तव्यः। यत्तु मानसप्रत्यक्षम्प्रति केचिदात्ममहत्त्वस्यापि न कारणत्वमिति वदन्ति तन्न, ज्ञानातिरिक्तं प्रत्येवाकारणताया आचार्यैरुक्तत्वादिति दिक्॥

प्रश्नः —असमवायिकारणस्य सामान्यं लक्षणमुच्यताम्।

उत्तरम्—कार्यैकार्थकारणैकार्थान्यतर प्रत्यासत्त्या समवायिकारणे प्रत्यासन्नं कारणं ज्ञानादिभिन्नमसमवायिकारणमिति असमवायिकारणस्य सामान्यं लक्षणं बोध्यम्।

प्रश्नः —तृतीयामन्यथासिद्धिं सोदाहरणां स्फुटीकुरु।

उत्तरम्—अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यम्प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यम्प्रति अन्यथासिद्धत्वमिति तृतीयान्यथासिद्धिलक्षणम्। तथाहि—आकाशस्य घटादिकम्प्रत्याकाशत्वेनैव कारणतयाऽऽकाशत्वस्य च शब्दसमवायिकारणत्वेन शब्दम्प्रति कारणत्वमादायैव घटादिकम्प्रति तस्य कारणतेति लक्षणसमन्वये स्फुटमेव तृतीयान्यथासिद्धत्वम्। घटादिकम्प्रत्याकाशस्य शब्दाश्रयत्वेन कारणत्वे तु तत्र पञ्चममन्यथासिद्धत्वमाकलनीयम्, तृतीयान्यथासिद्धिलक्षणस्य तत्राप्रवृत्तेः। ननु शब्दम्प्रत्याकाशस्य समवायसम्बन्धेन शब्दाश्रयत्वे किमवच्छेदकम्? शब्दाश्रयत्वं नाम, शब्दविशिष्टत्वम् तच्च शब्दवानाकाश इत्यत्र "प्रकृतिजन्यबोधे प्रकारो भावः" इति नियमेन शब्दात्मकम् इति स्वस्य स्वावच्छेदकत्वासंभवाच्छब्दस्यावच्छेदकत्वं तु वक्तुमशक्यम् इत्याशङ्क्य समाधत्ते—ककत्वादिकमिति। ककारादीनाम् बहुत्वेनावच्छेदकबहुत्वरूपारुचिमाकल-

व्यावच्छेदकान्तरमप्याह--विशेषपदार्थो वेति । सकलशब्दानुगमक-विशेषस्यैवावच्छेदकत्वस्वीकारे दोषाभाव इति भावः ।

प्रश्नः —चतुर्थीमन्यथासिद्धिं स्फुटं लिख ।

उत्तरम्—यत्कार्यजनकम्प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यम्प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम् ।

उदाहरणं यथा--कुलालपितुर्घटम्प्रति तुरीयान्यथासिद्धत्वम् । कुलालपितुर्घटम्प्रति कुलालपितृत्वेन कारणत्वस्वीकारे सिद्धकारणभावैः कुलालादिभिरेव घटरूपकार्यसंभवे तत्पितुरन्यथासिद्धत्वम् । यदि तु कुलाल-त्वेन कारणताऽभ्युपगम्यते तदा तु कुलालमात्रस्य घटरूपकार्यम्प्रति निमित्ततया भवेदेव कारणत्वं नान्यथासिद्धत्वमिति दिक् ।

प्रश्नः —भूतत्वं कुतो न जातिः ? तच्च केषां साधर्म्यम्, किंस्वरूपञ्चेति तत्रत्यशङ्कासमाधिपूर्वकं निरूपय ।

उत्तरम्—परस्परात्यन्ताभावसमानाधिकरणधर्मयोरेकाधिकरणवृत्तित्वे साङ्कर्येण तस्य च जातिबाधत्वाद् भूतत्वात्यन्ताभाववति मनसि मूर्त्तत्वस्य, मूर्तत्वा-त्यन्ताभावति आकाशे भूतत्वस्य च वर्तमानतया पृथिव्यादिचतुष्टये चोभयोः सत्त्वेनोक्तदोषसद्भावान्न भूतत्वं जातिः ।

भूतत्वं पृथिव्यप्तेजोवाय्वाकाशानां साधर्म्यम्, तत्स्वरूपन्तु 'बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम्' । भूतत्वलक्षणघटकग्राह्यत्वं नाम 'लौकिकप्रत्यक्षस्वरूपयोग्यत्वम्' (लौकिकसन्निकर्षाधीनबहिरिन्द्रियजन्य-लौकिकप्रत्यक्षविषयतावच्छेदकधर्मवत्त्वम्) बोध्यम् । तेन सुरभि चन्दनम् ज्ञातो घट इत्यादि प्रत्यक्षे ज्ञानलक्षणया ज्ञानस्य ज्ञानविषयत्वेऽपि तस्य लौकिकप्रत्यक्षविषयतावच्छेदकधर्मवत्त्वात्तथाभूतज्ञानवदात्मनि नाति-व्याप्तिः । परमाणोश्च महत्त्वलक्षणकारणान्तरासन्निधानात्प्रत्यक्षत्वाभावे-ऽपि तत्र स्वरूपयोग्यत्वान्नातिव्याप्तिरिति तत्त्वम् ।।

प्रश्नः —आकाशात्मनां साधर्म्यं स्फुटं निरूप्यताम् ।

उत्तरम्—आकाशात्मनाम् अव्याप्यवृत्तिक्षणिकविशेषगुणवत्त्वं साधर्म्यम् । तथाहि—आकाशस्य विशेषगुणः शब्दः, स च यदा किञ्चिदवच्छेदेनोत्पद्यते तदाऽन्यावच्छेदेन तदभावस्यापि सत्त्वादव्याप्यवृत्तिः (यथा प्राण्यधिष्ठितदेशावच्छेदेन शब्दः उत्पद्यते चेत्तदा घटाद्यवच्छेदेन तदभावोऽपि तिष्ठत्येव) क्षणिकत्वञ्च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम् । योग्यविभूनामाकाशात्मादीनाम् विशेषगुणाः शब्दादयः स्वोत्तरवर्तिगुणैर्नाश्या भवन्ति इति द्वितीयशब्देन प्रथमशब्दो नाश्यते । एवं रीत्याऽऽकाशस्याप्यवृत्तिविशेषगुणवत्त्वं, क्षणिकविशेषगुणवत्त्वञ्च समायातम् । एवमेवात्मनोऽपि । तथाहि आत्मनो विशेषगुणो ज्ञानादिः, स च यदा आत्मनि विभौ शरीराद्यवच्छेदेनोत्पद्यते तदा घटपटाद्यवच्छेदेन तदभावोऽपि तिष्ठत्येवेति ज्ञानादेरव्याप्यवृत्तित्वम्, क्षणद्वयस्थायितया च क्षणिकत्वमिति आत्मन्यपि । अव्याप्यवृत्तिविशेषगुणवत्त्वस्य, क्षणिकविशेषगुणवत्त्वस्य च वर्तमानतया सुतरां साधर्म्यम् । पृथिव्यादावतिव्याप्तिवारणायाव्याप्यवृत्तिविशेषगुणरूपं विशेषणद्वयम् । यदि तु रूपादीनामपि कदाचित्तृतीयक्षणे नाशसंभवात् क्षणिकविशेषगुणवत्त्वस्य क्षित्यादावतिव्याप्ततया दोषः समुद्भाव्यते, तदा क्षणिकविशेषगुणवत्त्वमित्यस्य चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वमित्यर्थोऽभ्युपगन्तव्यः । एवाञ्चापेक्षाबुद्धेः क्षणत्रयवृत्तितया कस्यापि जन्यज्ञानस्य क्षणचतुष्टयवृत्तित्वाभावेन रूपत्वादीनाञ्च क्षणचतुष्टयस्थायिरूपादिवृत्तितया सर्वसामञ्जस्यमाकलनीयम् ।

लक्षणे जन्येत्युक्तिस्तु ईश्वरज्ञानस्य चतुःक्षणवृत्तित्वाज् ज्ञानत्वस्य च तद्वृत्तित्वादव्याप्तिवारणाय बोद्धव्या । यदि त्वाकाशजीवात्मनोरेव साधर्म्यमुच्यते तदा द्वेषत्वादिकमादाय लक्षणसमन्वये जन्यपदं हेयम् । विशेषेत्युक्तिस्तु परममहत्त्वस्य चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्गुणत्वाच्चतुर्थक्षणे द्वित्वादीनामपि नाशाभ्युपगमाद् द्वित्वादीनामपि च तथात्वात्पृथिव्यादावतिव्यप्तिवारणाय ज्ञेया । द्वेषेच्छादिकमादाय परमात्मनि

जीवात्मनि च लक्षणसमन्वयसंभवे त्रिक्षणवृत्तित्वम्वा लाघवाय तदर्थो-ऽभ्युपेय इति दिक् ।।

प्रश्नः —पृथिवीत्वजातौ प्रमाणमुपन्यस्य पाषाणे गन्धवत्त्वं साधयत ।

उत्तरम् —गन्धसमवायिकारणतयाऽनुमानेन पृथिवीत्वं जातिः सिध्यति । अनुमान-प्रयोगश्चेत्थम् —समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नगन्धनिष्ठकार्यता-निरूपिताभेदसम्बन्धावच्छिन्ना पृथिवीनिष्ठा कारणता किञ्चिद्धर्मावच्छिन्ने-त्यादि । ननु पाषाणे प्रत्यक्षतो गन्धानुपलब्धेर्गन्धवत्त्वमव्याप्तमिति चेन्न, तत्राप्यनुमानेन गन्धसिद्धेः । अनुपलब्धौ कारणन्त्वनुत्कटत्वमेवेति बोध्यम् कथमन्यथा पाषाणभस्मनि गन्धः समुपलभ्येत । भस्मनो हि—यद्द्रव्यम् यद्द्रव्यध्वंसजन्यम् तत्तदुपादानोपादेयमिति व्याप्त्या पाषाणध्वंसजन्य-त्वात्पाषाणोपादानोपादेयत्वं सिध्यति । इत्थञ्च 'पाषाणं गन्धवत् पृथिवी-त्वात्, घटवत्' स्वरूपासिद्धिवारणाय 'पाषाणं पृथिवी, पृथिवीजन्यत्वे सति द्रव्यत्वात् घटवत्' 'पाषाणपरमा पृथिवी, पृथिवीसमवेतत्वात् कपालवत्' 'पाषाणभस्माणुः पाषाणसमवायिकारण-समवायिकारणकम् पाषाणध्वंस-जन्यत्वात्' इत्याद्यनुमानेन पाषाणस्य पृथिवीत्वे सिद्धे तत्र गन्धवत्त्वे न किमपि बाधकम् ।।

प्रश्नः —परमाणुपुञ्जैरेवोपपत्तौ पृथगवयविनः स्वीकारे किम्मानम् ?

उत्तरम् —नन्वयं घट इत्याद्याकारकप्रतीतेः परमाणुपुञ्जैरेव संभवेऽवयवभिन्नो-ऽवयवी किमर्थमभ्युपगम्यते ? न च परमाणवोऽतीन्द्रिया इति तद्भिन्ना-वयव्यस्वीकारे घटादीनां 'परमाणुपुञ्जोऽयमिति' कथिते प्रत्यक्षत्वं न स्यादिति वाच्यम्, दूरस्थैककेशाप्रत्यक्षत्वेऽपि तत्समूहप्रत्यक्षवदेक-परमाणोरतीन्द्रियत्वेऽपि तत्समूहरूपघटादिप्रत्यक्षे बाधकाभावात् । न चैकस्मिन् घटे परमाणूनां बहुत्वात्तेषामतीन्द्रियत्वाच्च "एको घटः स्थूलः" इति बुद्धिर्न स्यात् । घटरूपद्रव्ये बहुष्वतीन्द्रियेषु च परमाणुषु एकत्वस्थूलत्वबुद्धेरसिद्धत्वादिति वाच्यम्, धान्यराशौ "एको महान्

धान्यराशिः'' इतिवत्तत्रापि एकत्वस्थूलत्वबुद्धिव्यवहारसिद्धेः। तन्न, परमाणोरतीन्द्रियत्वेन तत्समूहस्यापि प्रत्यक्षायोग्यत्वात्। नन्वेवं केशसमूहस्यापि प्रत्यक्षत्वं न स्यादित्याशङ्क्याह **दूरस्थेति**—न च घटोत्पत्तिकालेऽदृश्यपरमाणुपुञ्जादृश्यपरमाणुपुञ्जस्योत्पन्नत्वान्न प्रत्यक्षे कोऽपि विरोध इति वाच्यम्, अदृश्यस्य दृश्यानुपादानत्वात्, **अन्यथा चक्षुरूष्मादि**सन्ततेरपि कदाचिद् दृश्यत्वप्रसङ्गः स्यात्। न चातितप्ततैलादौ जलप्रक्षेपे कथमदृश्याग्निसन्ततेर्दृश्यदहनोत्पत्तिरिति वाच्यम्, तत्र तदन्तर्वर्तिभिरदृश्यदहनावयवैः स्थूलदहनोत्पत्तेरुपगमात्। न चादृश्येन द्व्यणुकेन कथम् दृश्यत्रसरेणोरुत्पत्तिरिति वाच्यम्, स्वभावाद्दृश्यत्वाद् दृश्यत्वकथनस्याविवक्षणेन महत्त्वोद्भूतरूपादिकारणसमुदायवशाद् दृश्यत्वस्य, तदभावे चादृश्यत्वस्याभ्युपगमनेन सर्वसामाञ्जस्यात्। इत्थञ्च त्रसरेणौ महत्त्वस्य सत्त्वेन द्व्यणुके चासत्त्वेन तयोः प्रत्यक्षत्वाप्रत्यक्षत्वे समाकलनीये। न चैतत्तव परमाणुपुञ्जैरुत्पत्तिस्वीकर्तुमंते संभवति, परमाणौ महत्त्वाभावात्। तथा च घटप्रत्यक्षानुरोधेनातिरिक्तोऽवयवी सिध्यतीति दिक्॥

प्रश्न : —परमाणुसिद्धिर्विस्तरेण वाच्या।

उत्तरम्—नैयायिकैरवयवव्यतिरिक्तः परमाणुरपि स्वीक्रियते। अन्यथा अवयवधारायाः अनन्तत्वेऽवयवानन्त्यस्योभयत्रापि तुल्यत्वान्मेरुसर्षपयोरपि साम्यप्रसङ्गः स्यात्, अतः क्वचिद्विश्रान्तिर्वाच्या, यत्र तु विश्रान्तिस्तस्यानित्यत्वेऽसमवेतभावकार्योत्पत्तिप्रसङ्गः स्यात् इति यत्र विश्रान्तिस्तस्य नित्यत्वम्।

महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिवाणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वमस्तीति तस्य परमाणुत्वसिद्धिः।

प्रश्नः —शरीरत्वस्य परिष्कृतं विश्वनाथोक्तलक्षणं किम? कश्च तस्य समन्वयप्रकारः। तस्य जातिमत्त्वमस्ति न वेति मुक्तावल्युक्तदिशा विविच्यताम्।

उत्तरम्—शरीरत्वस्य परिष्कृतं विश्वनाथोक्तलक्षणम्—'चेष्टाश्रयत्वम्' इति। एवञ्च वृक्षादीनामपि चेष्टाश्रयत्वात्तत्र नाव्याप्तिः। वृक्षादेः शरीरत्वं

मास्त्विति तु न, आध्यात्मिकवायुसम्बन्धेन हेतुना तत्र तदनुमानात्। अध्यात्मिकवायुसम्बन्धस्यापि भग्नक्षतसंरोहणादिनाऽनुमानात् । न च चेष्टाश्रयत्वेन हस्तादीनामपि शरीरत्वापत्तिरिति वाच्यम्—'अन्त्यावयवित्वे सति चेष्टाश्रयत्वम्' इति लक्षणस्वीकारेणादोषात्। यत्र शरीरे चेष्टा न जाता तत्राव्याप्तिस्तु न, तादृशप्रमाणाभावात्। मृतशरीरे तथात्वस्य संभवो लक्ष्यते चेत्तदा 'चेष्टावदन्त्यावयवविवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य' 'अन्त्यावयविमात्रवृत्तिचेष्टावद्वृत्तिजातिमत्त्वस्य' वा विवक्षणेन तत्रापि शरीरत्वसङ्गतेः।

मनुष्यत्व-चैत्रत्व-जातिमादाय च लक्षणसमन्वयः। नृसिंहशरीरे कथं लक्षणसमन्वयः, नृसिंहत्वस्यैकव्यक्तिवृत्तित्वेन देवत्वस्य च जलीय-तैजसशरीरवृत्तित्वेन परस्परात्यन्ताभावसमानाधिकरणधर्मयोरेकत्र समावेशरूपसाङ्कर्यदोषग्रस्ततया जातित्वाभावादिति तु न, अवान्तरभेदेन नृसिंहशरीरस्यापि अनेकव्यक्तितया एकव्यक्तिवृत्तित्वरूपजातिबाधकदोषस्यासत्त्वेन लक्षणसमन्वयात् ।।

प्रश्नः —घ्राणेन्द्रियं पार्थिवत्वे विश्वनाथोक्तं प्रमाणं विस्तरेण लिख ।

उत्तरम्—'घ्राणेन्द्रियम् पार्थिवम्,रूपादिषु मध्ये गन्धस्यैवाभिव्यञ्जकत्वात् कुङ्कुमगन्धाभिव्यञ्जकगोघृतवत्' इत्यनुमित्या घ्राणेन्द्रियस्य पार्थिवत्वसिद्धेः। न च गोघृतस्य स्वकीयरूपस्यापि व्यञ्जकतया गन्धमात्रव्यञ्जकत्वाभावेन कुङ्कुमगन्धाभिव्यञ्जकगोघृतवदिति दृष्टान्तासिद्धिरिति वाच्यम्, परकीयरूपाद्यव्यञ्जकत्वस्य हेतुत्वस्वीकारेण गोघृतस्य स्वकीयरूपाद्यव्यञ्जकत्वेऽपि दीपवत् परकीयरूपाव्यञ्जकत्वेनादोषात्। न च नवशरावगन्धव्यञ्जकजलेऽनैकान्तिकत्वमिति वाच्यम्, तस्य सक्तुरसाभिव्यञ्जकत्वेन गन्धमात्रव्यञ्जकत्वाभावात्, परकीयपदानुपादनेऽपि वायूपनीतसुरभिभागस्य दृष्टान्तत्वसंभवे दोषाभावाच्च। न च घ्राणेन्द्रिययोः सन्निकर्षस्यापि गन्धमात्रव्यञ्जकतया तत्रानैकान्तिक-हेत्वाभास इति वाच्यम्, द्रव्यत्वे सति गन्धमात्रव्यञ्जकत्वस्य हेतुत्वस्वीकारेण सन्निकर्षस्य द्रव्यत्वभावादेव व्यभिचारवारणात्।

प्रश्नः —परमाणुसाधारणजलत्वतेजस्त्वान्यतरजातिसिद्धिः कार्या ।

उत्तरम्—बालबोधिनीतो गतार्थः ।

प्रश्नः —स्वर्णस्य तेजसि का वाचोयुक्तिः ?

उत्तरम्—स्वर्णस्य तैजस्त्वे मानन्तु—'स्वर्णं तैजसम्, असति प्रतिबन्धकेऽत्यन्तानल-संयोगेऽप्यनुच्छिद्यमानजन्यद्रवत्वात्, यन्नैवं तन्नैवम्, यथा पृथिवी'त्यनुमानम् ।

न चेदमप्रयोजकम् पृथिवीद्रवत्वस्य जन्यजलद्रवत्वस्य चात्यन्तानल-संयोगनाश्यत्वात् । न च पीतिमगुरुत्वाश्रयस्य पार्थिवस्यापि तदानीं द्रुतत्वात्तत्र व्यभिचार इति वाच्यम्, जलमध्यस्थमषीक्षोदवत्तस्याद्रुतत्वात् । केचित्तु अग्निसंयोगे पीतिमगुरुत्वाश्रयो विजातीयरूपप्रतिबन्धकद्रवद्रव्य-संयुक्तः अत्यन्ताग्निसंयोगेऽपि पूर्वरूपविजातीयरूपानधिकरणपार्थिवत्वात्, जलमध्यस्थपीतपटवदिति तादृशद्रवद्रव्यस्य च पृथिवीजलभिन्नस्य तेजस्त्व-सिद्धिरित्याहुः ।

प्रश्नः —शब्दाधिकरणं नवमं कथं सिध्यति ?

उत्तरम्—आकाशस्यैकव्यक्तित्वाद् व्यक्तेरभेद इति जातिबाधकत्वेनाकाशत्वं न जातिः किन्तु शब्दाश्रयत्वम् । तत्र प्रमाणन्तु विशेषगुणान्तरव्यवच्छेदाय कारिकोक्तवैशेषिकपदमेव । तथा हि शब्दो विशेषगुणः चक्षुग्रहणायोग्य-बहिरिन्द्रियग्राह्यजातिमत्त्वात् स्पर्शवत् । शब्दो द्रव्यसमवेतो गुणत्वात् संयोगवद्रूपवद्वा, इत्यनुमानेन शब्दस्य द्रव्यसमवेतत्वे सिद्धे, शब्दो न स्पर्शवद्विशेषगुणः, अग्निसंयोगासमवायिकारणकत्वाभावे सत्यकारणगुण-पूर्वकप्रत्यक्षत्वात् सुखवत् ।

पाकजरूपादौ व्यभिचारवारणाय सत्यन्तम् । पटरूपादौ व्यभि-चारवारणायाकारणगुणपूर्वकेति । जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षेति । ततः शब्दो न दिक्कालमनस्त्वं गुणः, विशेषगुणत्वात् । नात्मविशेषगुणो बहिरिन्द्रियग्राह्यत्वात् रूपवत् ।

इत्थञ्च परिशेषतः शब्दाधिकरणं नवमं द्रव्यं गगननामकं सिध्यति ।

प्रश्नः —वायोः प्रत्यक्षं संभवति न वेति सप्रमाणमुल्लिख ।

उत्तरम् —प्राचां नये वायावुद्भूतरूपाभावान्न वायोः प्रत्यक्षम् । नवीनास्तूद्भूत-रूपस्य चाक्षुषं प्रत्येव हेतुत्वाद्वायोः स्पार्शनप्रत्यक्षं भवत्येव, तत्रोद्भूत-स्पर्शस्य हेतुत्वादित्याहुः ।

प्रश्नः —आत्मत्वं जातिः कथं सिध्यति ? सा चेश्वरेऽस्ति न वेति सविस्तरमु-ल्लिख्यताम् ।

उत्तरम्—समवायसम्बन्धावच्छिन्नसुखत्वदुःखत्वैतदन्यतरावच्छिन्नकार्यतानिरूपिता-भेदसम्बन्धावच्छिन्ना कारणता किञ्चिद्धर्मावच्छिन्ना, कारणतात्वात्, या या कारणता सा सा किञ्चिद्धर्मावच्छिन्ना'—इत्यनुमानेनात्मत्वं जातिः सिध्यति । अदृष्टादिरूपकारणाभावात्सुखदुःखाद्युत्पत्त्यभावेऽपि नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभाव इति नियमस्याप्रयोजकत्वेन चेश्वरेऽपि सा जातिरस्त्येव । ज्ञानवत्त्वेन जीवेश्वरयोर्विभागादृशमद्रव्यत्वा-पत्तिरपि नेति शरीरस्येन्द्रियाणाञ्च परम्परया चैतन्यसम्पादकत्वमपि तस्यैवावगमेलिमम् ।

अहं जाने, सुखीत्याद्यात्मनः प्रत्यक्षविषयत्वेऽपि विवादिनम्प्रति प्रथमत एव शरीरादिभिन्न-तत्प्रतिगोचर इति प्रतिपादयितुमशक्यत्वेन च्छिदादिकरणानां फलोपधानस्यापि कर्तारमन्तरेणाभावादतिरिक्त एव संसार्य्यात्मा कल्प्यते ।

प्रश्नः —शरीरादेः कर्तृत्वमाशङ्क्य चार्वाकमतं कया युक्त्या निरसितं विश्वनाथेन ?

उत्तरम् —ननु ज्ञानादिरूपचैतन्यस्य नैयायिकमते मुक्तात्मस्विव मृते शरीरेऽपि अभावेन, प्रमाणाभावाज्ज्ञानाभावस्य सिद्धेः किमिति शरीरादिभिन्न आत्मा कल्प्यते इति चेन्न, शरीराणामवयवोपचयापचयैरुत्पादविनाशशालित्वात्तत्-

तत्कालिकशरीराणां भिन्नत्वेनानन्तसंस्कारकल्पने गौरवात्पूर्वशरीरोत्पन्न-संस्कारेण द्वितीयशरीरे संस्कारोत्पत्तेश्च स्वीकर्तुमशक्यत्वेन बाल्ये विलोकितस्य स्थाविरे तच्छरीराभावात्स्मरणानुपपत्तेः। किञ्च शरीरस्य चैतन्ये प्रवृत्तिम्प्रतीष्टसाधनताज्ञानस्य कारणतया स्तन्यपानदशायाम् इष्टसाधनतास्मारकाभावाद् बालस्य स्तन्यपानेऽपि प्रवृत्तिर्न स्यात्, अतिरिक्तकल्पने तु जन्मान्तरानुभूतेष्टसाधनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः। न च जन्मान्तरानुभूतमन्यदपि स्मर्यतामिति वाच्यम्। उद्बोधकाभावात्, अत्र त्वगत्या जीवनादृष्टमेवोद्बोधकम् कल्प्यतेऽन्यथा शुष्ककण्ठतया बालो म्रियते। इत्थं शरीरस्यानादितयाऽऽत्मनोऽनादित्व-सिद्धौ अनादेश्च नाशासंभवान्नित्यत्वं सिध्यति।

ननु विरोधे प्रमाणाभावाज्ज्ञानादिकम्प्रति इन्द्रियाणामेव कारणत्वं कर्तृत्वं चास्त्विति चेन्न, पूर्वं चक्षुषा साक्षात्कृतस्य चक्षुर्नाशेऽनुभवितुश्च-क्षुषोऽभावेनानुभवस्मरणयोः सामानाधिकरण्यात्कार्यकारणभावेनान्यदृष्ट-स्यान्येनस्मरणाभावात्स्मरणानुपपत्तेः॥

प्रश्नः —क्षणिकविज्ञानस्यात्मत्वं निराकरणीयम्।

उत्तरम्—नन्वहमित्याकारकं विज्ञानमेवात्मा, विज्ञानस्य स्वतः प्रकाशरूपत्वाच्चेतन-त्वम्। ज्ञानसुखादिकमपि तस्यैवाकारः, भावत्वादेव च क्षणिकत्वम्। ननु सुषुप्तौ ज्ञानाभावेनात्मा न सिद्धयतीति चेन्न, सुषुप्तावायालयविज्ञान-धाराया अवस्थानात्। न च विज्ञानस्य क्षणिकत्वेन तन्निवृत्तौ कालान्तरे स्मरणं न स्यादनुभवितुर्विज्ञानस्य तदानीमभावादिति वाच्यम्, मृगमद-वासनावासितवसन इव पूर्व-पूर्व-विज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञाने सङ्क्रान्तत्वात्स्मरणादेर्निर्वाहात्। इत्थञ्च नैयायिकानामतिरिक्तात्म-कल्पनमयुक्तमिति चेन्न, विज्ञानस्य सर्वविषयकत्वे सार्वज्ञ्यापत्तिः यत्किञ्चिद्विषयकत्वे विनिगमनाविरहः ज्ञानस्य सविषयकत्वनियमात् अन्यथा सुषुप्तौ विषयावभासप्रसङ्गात्, निर्विकल्पकचित्संततेः स्वप्रकाशत्वे प्रमाणाभावात्। तस्या अपि स्वप्रकाशत्वे घटस्यापि स्वप्रकाशत्वापत्तिः।

घटादेरपलापस्याशक्यतया सममेव विज्ञानमित्यपि न, नाप्याकारविशेष एवेत्यपि, तस्य तदतिरिक्तत्वविज्ञानमित्यस्यैक्ये च नीलाकारस्य पीतत्वम्, अनीलव्यावृत्तोऽपोहरूपो विज्ञानधर्म इत्यपि न विरुद्धयोरेकत्रासंख्यानात्, अन्यथा विरोध एव न स्यात् ।

वासनासङ्क्रमोऽपि च न, मातृपुत्रयोरपि तत्र प्रसङ्गात् । वासनायाः सङ्क्रमासंभवेनोपादानोपादेयभावस्याप्यनियामकत्वात् ।

उत्तरत्रोत्पत्तिरेव सङ्क्रम इति तु वक्तुमशक्यम् तदुत्पादकाभावात् । चितामुत्पादकत्वे संस्कारानन्त्यम् । क्षणिकविज्ञाने विलक्षणशक्तिकल्पने प्रमाणाभावाद् बीजादावपि सहकारिसमवधानासमवधानाभ्यामेवोत्पत्तेः कुर्वद्रूपत्वाकल्पनाच्च । अनया रीत्या क्षणिकशरीरस्यापि चैतन्यं निराकृतम् ।

प्रश्नः—**नित्यविज्ञानस्यात्मत्वं केषां सम्मतम् ? कथञ्च तन्मतमनादृतं नैयायिकैरिति सशङ्कासमाधि लिख ।**

उत्तरम्—ननु विज्ञानस्य पूर्वोक्तस्य बौद्धसम्मतस्य क्षणिकत्वेन स्मरणादेरनुपपत्त्याऽऽत्मत्वासंभवेऽपि नित्यविज्ञानस्यैवात्मत्वमङ्गीक्रियताम्—'अविनाशी वाऽऽरेऽयमात्मा सत्यं ज्ञानमनन्तं ब्रह्म', इत्यादि श्रुतिरपि नित्यविज्ञानस्यात्मत्वे सत्येव सङ्गच्छत इति चेन्न, सविषयत्वासम्भवस्य क्षणिकविज्ञानवादखण्डनावसरे दर्शितत्वान्निर्विषयस्य ज्ञानत्वे मानाभावात् ।

सत्यं ज्ञानमिति तु ब्रह्मपरम्, न तु जीवात्मपरम् ज्ञानाज्ञानादिभिर्जीवानां भेदसिद्धौ न जीवब्रह्मणोरैक्यम् । अन्यथा द्वयोरैक्येऽयं बद्धोऽयं मुक्तः इति व्यवहारविलोपप्रसङ्गः । ईश्वराभेदबोधको वेदस्तत्त्वमसीत्यादिरपि केवलमेकत्वे न स्तौति अतएव सर्वं एवात्मनि समर्पिताः इत्याद्याधाराधेयभावोऽपि उपपद्यते । भेदस्य नित्यत्वेन नाशायोगान्मोक्षदशायामपि नाभेदः तन्नाशेऽपि व्यक्तिद्वयावस्थानाच्च न तथा, निर्धर्मके ब्रह्मणि सत्यत्वाभावेऽपि सत्यस्वरूपमितिवद्द्वित्वाभावे व्यक्तिद्वयावस्थाने

बाधकाभावाद् भेदनाशे द्वित्वस्यापि नाश इत्यपि न, मिथ्यात्वाभावोऽधिकरणात्मकस्तत्र सत्यत्वमिति चेन्न, एकत्वाभावे व्यक्तिद्वयात्मको द्वित्वमित्यपि तथा प्रत्येकमेकत्वेऽपि पृथिवीजलयोर्न गन्ध इतिवदुभयं नैकमित्यस्य सर्वजनसिद्धत्वात्। अतएव निरञ्जनस्य परमं साम्यमित्येव, न तु तत्त्वम्। ईश्वरोऽपि न ज्ञानस्वरूपः सुखस्वरूपो वा किन्तु ज्ञानाश्रयः एव,' यः सर्वज्ञः स सर्ववित्' इत्यनुरोधाच्च। आनन्दमित्यस्यापि आनन्दवदित्यर्थः अन्यथा पुल्लिङ्गत्वापत्तिः।

अस्तु वा तस्मिन्नानन्दः, नत्वसौ आनन्दः, 'असुखम्' इति श्रुतेः। सुखभिन्नमिति हि तदर्थः, सुखस्वरूपत्वे तदसङ्गतिः न विद्यते। सुखं यस्येत्यर्थकल्पने तु क्लिष्टकल्पनमिति नित्यविज्ञानभिन्न एवात्मा न तु तत्स्वरूप इति दिक्।

प्रश्नः — प्रकृतेः कर्तृत्वं कथं सांख्यसम्मतम्। तन्मताङ्गीकारे च नैयायिकानां किं बीजमिति लिख्यताम्।

उत्तरम्—ननु प्रकृतिरेव कर्त्री, पुरुषस्तु पुष्करपलाशवन्निर्लेपः किन्तु चेतनः, कार्यकारणयोरभेदात्कार्यनाशे कारणस्यापि नाशेन संसारनाशे पुरुषस्यापि नाशापत्त्या तस्याकारणत्वकल्पनात्। ननु प्रकृतेरेव सर्वकार्यनिर्वाहसंभवेऽतिरिक्तपुरुषकल्पनं निष्फलमिति चेन्न। क्वचित्प्रसिद्धस्यैवारोपसंभवेन पुरुषाभावे चितेरप्रसिद्धया बुद्धौ चैतन्याभिमानकल्पनानुपपत्त्याऽतिरिक्तपुरुषकल्पनम्। तस्याः सत्त्वासत्त्वाभ्यां पुरुषस्य संसारापवर्गौ बुद्धिश्च प्रकृतेः परिणामः, सैव महत्त्वम् अन्तःकरणमित्युच्यते। बुद्धेरेव च घटादिना चक्षुःसंयोगे तत्प्रणालिकया ज्ञानरूपापरिणतिर्घटादिना सम्बन्धः, प्रकृतिस्त्वपरिणामिनी 'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्नविकृतिः पुरुषः' इति सिद्धान्तत्वात्। नन्वेवं बुद्धेः कर्तृत्वे अहं कर्त्तेत्यस्य प्रत्ययस्य का गतिरिति चेन्न, चन्द्रगतप्रकाशमयत्वस्य जले भानवत् पुरुषगतचैतन्यस्य बुद्धौ जलचाञ्चल्यस्य च मानवबुद्धिगतकर्तृत्वभोक्तृत्वादेः पुरुषे भानात्। ममेदं कर्तव्यमिति

मदंशः पुरुषसम्बन्धः बुद्धेः स्वच्छतया तत्प्रतिबिम्बादतात्त्विकः दर्पणे मुखोपरागवत्। इदमंशश्च विषयसम्बन्धः इन्द्रियप्रणालिकया परिणतिभेदस्तात्त्विकः निःश्वासाभिहतदर्पणस्येव मलिनिमा। कर्तव्यमिति व्यापारांशः, तेनांशत्रयवती बुद्धिः, तत्परिणामभूतेन ज्ञानेन पुरुषस्यातात्त्विकः सम्बन्धः, यथा दर्पणमलिम्ना मुखस्योपलब्धिरिति ज्ञानवत्सुखदुःखेच्छाद्वेषधर्माधर्मा अपि बुद्धेरेव तेषां कृतिसामानाधिकरण्यात्, न च बुद्धिश्चेतना परिणामित्वादिति चेन्न, कृतदृष्टभोगानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेस्तद्भिन्ने मानाभावाच्च। यदि चेतनोऽहं करोमि इति चैतन्यांशे भ्रम इति चेत् कृत्यंशेऽपि किन्नेष्यते? एवञ्च बुद्धौ कर्तृत्वमपि नेति पुरुष एव कर्तेति भावः अन्यथा चेतनकर्त्रोर्भेदाङ्गीकारे बुद्धेर्नित्यत्वे मोक्षस्यासंभवः, अनित्यत्वे तदुत्पादनात्पूर्वं सर्वेषां मुक्तिरेव न तु बन्धनमिति। ननु प्रकृतेरचेतनत्वाद् बुद्धेरचैतन्यं कार्यकारणयोरभेदादिति चेन्न, असिद्धेः, कर्तुर्जन्यत्वायोगात्। कर्तुश्च वीतरागजन्मादर्शनादनादित्वमेव, वीतरागजन्मादर्शनादित्यस्य सरागजन्मादर्शनादित्यर्थः अनादेश्च नाशासंभवान्नित्यत्वम्, एवञ्च त्वदुक्तं कार्यबुद्धेः कर्तृत्वं न विदुषामामोदावहम् तेन प्रकृत्यादिकल्पना न प्रामाणिकी। न च "प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहंकारविमूढात्मा कर्ताहमिति मन्यते" इति भगवदुक्त्या प्रकृतेरेव कर्तृत्वम् न तु पुरुषस्येति, तत् पुरुषकर्तृत्वकल्पने विरुद्धमिति वाच्यम्। प्रकृतिपदस्यादृष्टार्थकत्वं स्वीकृत्य अदृष्टस्य गुणैर्जन्यैरिच्छादिभिः कर्ताहमेवेत्यस्य तदर्थत्वात्, एवञ्चैतद्वचनमपि पुरुषस्य कर्तृत्वे सत्यनुकूलमेवातस्तदतिरिक्तप्रकृत्यादिकल्पनं न युक्तमिति शम्॥

प्रश्नः —ईश्वरप्रत्यक्ष-साधारणप्रत्यक्षलक्षणम् किम्? तच्च कतिविधम्? 'ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्' इत्यनेन किमर्थं प्रत्यक्षस्य लक्षणान्तरं व्याख्यातम् विश्वनाथेन? परतश्च वस्तुतस्तु कल्पे किमर्थमनुमितेर्लक्षणान्तरमाख्यातमिति ग्रन्थसंवादेन प्रकटय।

उत्तरम्—इन्द्रियजन्यं ज्ञानं प्रत्यक्षम्। अत्र ज्ञानमात्रस्य मनोरूपेन्द्रियजन्यत्वेऽपि इन्द्रियत्वेन रूपेण यत्र ज्ञाने करणत्वं तत्प्रत्यक्षस्यैव विवक्षणेन मनसस्तत्र तत्र मनस्त्वेन रूपेण कारणत्वाददोषः। 'इन्द्रियार्थसन्निकर्षोत्पन्नम्' इति सूत्रे जन्यप्रत्यक्षस्यैवोक्ततया ईश्वरप्रत्यक्षमिह न लक्ष्यम्। अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षमितीश्वरप्रत्यक्षसाधारणलक्षणं स्वीकृत्यानुमितौ व्याप्तिज्ञानस्योपमितौ सादृश्यज्ञानस्य शाब्दबोधे पदज्ञानस्य स्मृतावनुभवस्य कारणत्वात्तत्र तत्रादोषो बोध्यः। इत्थमीश्वरप्रत्यक्षसाधारणलक्षणे जाते तस्य घ्राणजरासनचाक्षुषश्रावणस्पार्शनमानसभेदेन षड्विधत्वं बोध्यम्।

अनुमितेर्लक्षणं तु 'परामर्शजन्यत्वे सति ज्ञानत्वम्'। यद्यपि परामर्शप्रत्यक्षादेरपि परामर्शजन्यत्वम् तथापि 'परामर्शजन्यत्वे सति हेत्वविषयकं यज्ज्ञानम्' तदेवानुमितिरिति स्वीकारेणादोषः। न चास्य लक्षणस्य 'वह्निव्याप्यधूमवान् पर्वतो वह्निमान्' इत्याकारकहेतुविषकानुमित्यात्मकज्ञानेऽव्याप्तिरिति वाच्यम्, तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षणेनादोषात्।

वस्तुतः सर्वेषामासाधारणं लक्षणम् मूले "वस्तुतः" इत्यादिना यां काञ्चिदनुमित्यादिव्यक्तिमादाय तद्व्यक्तिवृत्ति-तद्भिन्नावृत्तिजातिमत्त्वमिति रीत्याऽनुमित्यादिलक्षणस्वीकारान्न दोषः॥

प्रश्नः—**त्वङ्मनःसंयोगस्य ज्ञानसामान्यहेतुत्वे का युक्तिः प्रदर्शिता विश्वनाथेनेति ग्रन्थाक्षरस्वारस्येन विविच्यताम्।**

उत्तरम्—त्वङ्मनःसंयोगो ज्ञानसामान्ये कारणम्, अत एव सुषुप्तिकाले त्वचं त्यक्त्या पुरीतति वर्तमानेन मनसा ज्ञानं न जन्यते, तदानीं त्वचा मनसः संयोगाभावात्। ननु सुषुप्तौ किं ज्ञानं भविष्यति, अनुभवरूपं स्मरणरूपम्वा ? यदर्थं त्वङ्मनःसंयोगस्य तद्धेतुत्वं कल्पनीयम्, नाद्यः, अनुभवसामाग्र्यभावादेव तदसंभवात्। ज्ञानादेरभावादेव च न चाक्षुषं प्रत्यक्षम्। एवं व्याप्तिज्ञानाभावान्न शाब्दबोधः। नान्त्यः, स्मरणम्प्रति उद्बोधकस्य

हेतुत्वेन तदानोमुद्बोधकाभावादिति चेन्न, सुषुप्तिप्राक्कालोत्पन्नेच्छादि-व्यक्तेस्तत्संबन्धेनात्मनश्च प्रत्यक्षत्वप्रसङ्गात् । सुषुप्तिप्राक्काले निर्विकल्पकमपि न, प्रमाणाभावात् । ननु ज्ञानमात्रे त्वङ्मनःसंयोगस्य कारणत्वे चाक्षुषप्रत्यक्षकाले त्वाचप्रत्यक्षं स्यात्, तदानीं विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च सत्त्वात्- यद्वा तत्प्रत्यक्षम्प्रति तद्भिन्नप्रत्यक्ष-सामाग्र्याश्च प्रतिबध्यप्रतिबन्धकभावेनोभयोरप्यप्रत्यक्षत्वापत्तिरिति चेद् चोच्यते, पूर्वोक्तमुक्त्या त्वङ्मनःसंयोगस्य ज्ञानहेतुत्वे सिद्धे चाक्षुषादि-सामग्र्याः स्पार्शनादि प्रतिबन्धकत्वमनुभवानुरोधात्कल्प्यते ।

अन्ये तु सुषुप्तौ ज्ञानानुत्पादानुरोधेन चर्ममनःसंयोगस्यैव ज्ञानहेतुत्वम्, अतश्चाक्षुषादि प्रत्यक्षकाले त्वङ्मनःसंयोगाभावान्न स्पार्शेन प्रत्यक्षमिति वदन्ति ।

प्रश्नः —'अयं घट' इत्यादि सविकल्पेनैव सिद्धौ निर्विकल्पकज्ञानस्वीकारे विश्वनाथोक्तयुक्तयः प्रदर्श्यन्ताम् ।

उत्तरम् —विशिष्टबुद्धिम्प्रति विशेषणज्ञानस्य कारणतया घटादिप्रत्यक्षविषये घटेन चक्षुःसंयोगानन्तरं घटत्वादिविशेषणज्ञानस्याभावेन विशेषणविशेष्य-भावावगाहिसविकल्पकज्ञानासंभवेन तदनवगाहि यदज्ञानं तदेव निर्विकल्पकपदाभिधेयं भवति तच्च न प्रत्यक्षम् । वैशिष्ट्यानवगाहि-ज्ञानस्य प्रत्यक्षं न भवति घटमहं जानामीतिप्रत्ययात्, तत्रात्मनि ज्ञानं प्रकारीभूय भासते, ज्ञाने च विषयतया घटः, तत्र घटत्वम् समवायेन प्रकारः, विशेषणे यद्विशेषणं तदेव विशेषणतावच्छेदकम् । विशिष्ट-वैशिष्ट्यानवगाहिज्ञाने च विशेषणतावच्छेदकप्रकारकज्ञानस्य हेतुतया निर्विकल्पके—'घटघटत्वे इति' वैशिष्ट्यानवगाहिज्ञानेन घटत्वादि-विशिष्टज्ञानस्यासंभवात् । घटत्वाद्यप्रकारकञ्च घटादिविशिष्टज्ञानं न संभवति जात्यखण्डोपाध्यतिरिक्तपदार्थज्ञानस्य किञ्चिद्धर्मप्रकारकत्व-नियमात् ।

प्रश्नः —प्रतिपदव्यावृत्तिपूर्वकमिन्द्रियलक्षणं व्याख्यायताम् ।

उत्तरम् इन्द्रियत्वात्यन्ताभाववति घटे पृथिवीत्वस्य, पृथिवीत्वात्यन्ताभाववति रसनेन्द्रिये चेन्द्रियत्वस्य, घ्राणेन्द्रिये चोभयोर्वर्तमानत्वेन परस्परात्यन्ताभावसमानाधिकरणधर्मयोरेकत्रसमावेशरूपसाङ्कर्यदोषादिन्द्रियत्वं न जातिः। किन्तु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वम्। अत्र सत्यन्तानुक्तौ ज्ञानकारणमनःसंयोगाश्रयत्वस्यात्मनि सत्त्वेनातिव्याप्तिरतः सत्यन्तम्। विशेषगुणस्य रूपादेः चक्षुरादावपि सत्त्वात्तत्राव्याप्तिवारणायोद्भूतेति। उद्भूतत्वं न जातिः। उद्भूतत्वा भाववति अनुद्भूते शुक्लत्वम्, शुक्लत्वाभाववति नीले चोद्भूतत्वम्, उद्भूतशुक्ले चोभयोः सत्त्वेन साङ्कर्यात्। न च शुक्लत्वव्याप्यं यदि नानोद्भूतत्वम् तर्हि चाक्षुषादि प्रत्यक्षम्प्रति उद्भूतरूपत्वादिना जनकतायां कारणतावच्छेदके गौरवमतः शुक्लत्वव्याप्यम् यन्नानानुद्भूतत्वम्, तदभावकूटश्चोद्भूतत्वम् तस्य च संयोगादावपि सत्त्वेनोद्भूतगुणस्य चक्षुरादावपि सत्त्वादव्याप्तिरतो विशेषेति। कालादिवारणाय च विशेष्यदलम्। इन्द्रियावयवविषयसंयोगस्यापि प्राचीनमते प्रत्यक्षहेतुत्वेनेन्द्रियावयवे इन्द्रियत्वातिव्याप्तिवारणाय, नवीनमते च कालादौ रूपाभावप्रत्यक्षे संनिकर्षघटकतया कारणीभूतचक्षुःसंयोगाश्रयस्य कालादेश्च वारणाय मनः पदम्। ज्ञानकारणपदमपि कालादिवारणार्थकमेवेति बोध्यम्॥

प्रश्नः — परमाणुनीले नीलत्वस्य, पृथिवीत्वस्य च चाक्षुषप्रत्यक्षं कथं न? कथञ्च पृष्ठावच्छेदेनालोकसंयोगे सत्यपि अग्न्यवच्छेदेन घटस्य न प्रत्यक्षमिति साधकबाधकयुक्तिप्रदर्शनपुरस्सरं सिद्धान्तो निरूप्यताम्।

उत्तरम्—ननु प्रत्यक्षम्प्रति महत्त्वोद्भूतरूपादीनां कारणत्वेऽपि पृथिवीपरमाणुनीलगतनीलत्वस्य तद्वृत्तिपृथिवीत्वस्य च चाक्षुषप्रत्यक्षापत्तिः परम्परया महत्त्वसम्बन्धोद्भूतसम्बन्धयोः सत्त्वात् तद्यथा यावन्नीलगतं नीलत्वं जातिस्वरूपमेकमेव तथा च महत्त्वसम्बन्धस्य स्वाश्रयसमवेतसमवेतत्वादिसम्बन्धेन तयोः सत्त्वं वर्तते एव; तत्र स्वत्वम्, तदाश्रयो घटः, तत्समवेतो नीलः, तन्निरूपितं समवायसम्बन्धेन वृत्तित्वम् नीलत्वे, एवमुद्भूतरूपाश्रयो घटः, सत्समवेतनीलसमवेतत्वम् नीलत्वे, इत्थमेव परमाणुगतपृथिवीत्वेऽपि

घटादिवृत्तिमहत्त्वस्य परम्परया योगः । एवं वायौ तदीयस्पर्शादौ च सत्तायाश्चाक्षुषप्रत्यक्षं स्यादिति चेन्न, उद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्य द्रव्यसमवेतचाक्षुषे, उद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवेतसमवायस्य द्रव्यसमवेतसमवेतचाक्षुषे हेतुत्वेन परमाणौ चक्षुःसंयोगस्योद्भूतरूपसमानाधिकरणत्वेऽपि महत्त्वावच्छिन्नत्वाभावेन निरुक्तसामग्र्यभावान्न प्रत्यक्षम् । वाय्वादौ महत्त्वावच्छिन्नत्वस्य सत्त्वेऽपि उद्भूतरूपावच्छिन्नत्वाभावात् । एवमालोकसंयोगावच्छिन्नत्वस्य चक्षुःसंयोगे विशेषणाद् घटस्य पृष्ठावच्छेदेनालोकसंयोगेऽन्यवच्छेदेन चक्षुःसंयोगे चक्षुःसंयोगस्यालोकसंयोगावच्छिन्नत्वाभावान्न दोषः ।

प्रश्नः —सन्निकर्षषट्कं सोदाहरणं व्याख्येयम् ।

उत्तरम्—घटप्रत्यक्षे चक्षुःसंयोगः कारणम् । घटीयरूपप्रत्यक्षे चक्षुःसंयुक्तसमवायः कारणम् । चक्षुःसंयुक्ते घटे रूपस्य समवायात् । रूपत्वसामान्यप्रत्यक्षे चक्षुःसंयुक्तसमवेतसमवायः कारणम् । चक्षुःसंयुक्ते घटे रूपसमवेतम् तत्र रूपत्वस्य समवायात् । शब्दप्रत्यक्षे समवायः सन्निकर्षः कारणम्, कर्णशष्कुल्यवच्छिन्ननभसः श्रोत्रसंज्ञा, गुणगुणिनोश्च समवायात् । शब्दत्वप्रत्यक्षे श्रोत्रसमवेतसमवायः कारणम्, श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् । घटाभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः, घटाभाववद्भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् । एतान्येव संनिकर्षषट्कोदाहरणानि । उदाहरणान्तराण्यपि यथा संख्यादौ रूपाद्यभावः स्वसंयुक्तसमवेतविशेषणतया, संख्यात्वादौ रूपाद्यभावः स्वसंयुक्तसमवेतसमवेतविशेषणतया, शब्दाभावः केवलश्रोत्रावच्छिन्नविशेषणतया, कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया, एवं कत्वाद्यवच्छिन्नाभावे गत्वाभावादिकं श्रोत्रावच्छिन्नविशेषणविशेषणतया। एवं घटाभावादौ पटाभावः चक्षुःसंयुक्तविशेषणविशेषणतया । एवमन्यदप्यूह्यम् । किन्तु विशेषणतात्वरूपेणैकैव सा गण्यतेऽन्यथा षोढा सन्निकर्षः इति प्राचां प्रवादो व्याहन्येतेति दिक् ।

प्रश्नः —अभावप्रत्यक्षे योग्यानुपलब्धेः कारणत्वं वदतां भाट्टानाम् मतं विश्वनाथोक्तदिशा निराकृत्य तन्मतं युक्त्या लिख ।

उत्तरम्—अभावप्रत्यक्षे योग्यानुपलब्धिः कारणम् । योग्यस्य प्रत्यक्षयोग्यस्य घटादेरनुपलब्ध्या घटाभावो ज्ञायते, अतोऽभावप्रत्यक्षे तस्या एव कारणता। तदभावादेव योग्यानुपलब्धेरसत्त्वात् । अतोऽनुपलब्धिनामकं प्रमाणान्तरमिति तन्मतम्—'यदि स्यादुपलभ्येतेति' कारिकार्द्धेन स्पष्टम् तन्न, इन्द्रियैरभावप्रत्यक्षेऽनुपलब्धेः सहकारितामात्रेणैवोपपत्त्या विशेषणतासन्निकर्षस्यैव च हेतुत्वेन सकलेष्टसिद्धावनुपलब्धेरतिरिक्तप्रमाणान्तरकल्पनम् गौरवग्रस्तम् । योग्यानुपलब्धेः कारणत्वञ्च तन्मते यथा भूतलादौ घटादिज्ञानेजाते घटाभावादिकं न ज्ञायते, तेनाभावोपालम्भे प्रतियोग्युपलब्धेरभावः कारणम्, तत्र योग्यता अप्यपेक्षिता, सा च प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपा, प्रतियोगिनः सत्त्वस्य विद्यमानताया प्रसक्त्या आरोपेण प्रसञ्जितः आपादितः इत्याद्यर्थः । तथाहि यत्रालोकसंयोगादिकं वर्तते तत्र यदि घटः स्यात्तर्हि उपलभ्येत इत्यापादयितुं शक्यतेऽतस्तत्र घटाभावप्रत्यक्षम् । अन्धकारे तु यथा वक्तुमशक्यत्वेन न घटाभावादेश्चाक्षुषप्रत्यक्षम्, स्पार्शनप्रत्यक्षं तु भवत्येव, आलोकसंयोगं विनाऽपि स्पार्शनप्रत्यक्षे बाधकाभावात् । एवं गुरुत्वाभावादेरपि, गुरुत्वादेरयोग्यतया तदभावस्यापि न प्रत्यक्षम् तथा च योग्यानुपलब्धेः सहकारितामात्रेणैवोपपत्तौ नोचितमतिरिक्तकल्पनमिति बोध्यम् ।।

प्रश्नः —सामान्यलक्षणज्ञानलक्षणयोर्भेदं सोदाहरणं प्रदर्श्य सामान्यलक्षणप्रत्यासत्त्यां ज्ञानलक्षणप्रत्यासत्तेरन्तर्भावो न वेति समयङ् निरूपयत ।

उत्तरम्—सामान्यं लक्षणं स्वरूपं यस्य इत्यर्थेन सामान्यस्वरूपा प्रत्यासत्तिरित्यर्थो लभ्यते । तत्र सामान्यञ्चेन्द्रियसंबद्धविशेष्यकज्ञानप्रकारीभूतं बोध्यम् । तथाहि —इन्द्रियसंयुक्तो धूमः, तद्विशेष्यकम् धूम इति ज्ञानप्रकारीभूतं धूमत्वमिति धूमत्वरूपसंबन्धेनातीतानागतसकलधूमानां ज्ञानं भवति,

इन्द्रियसंबद्धप्रकारीभूतोक्तौ तु धूलीपटले धूमत्वभ्रमानन्तरम् सकलधूम-विषयकं ज्ञानं न स्यात्, धूमत्वेन सहेन्द्रियसंबन्धाभावात् । इन्द्रियसंबन्धश्च लौकिकः । इदञ्च बहिरिन्द्रियस्थले मानस्थले तु ज्ञानप्रकारीभूतं सामान्यमेव तथा ।

ज्ञानलक्षणप्रत्यासत्तेश्च ज्ञानस्वरूपेत्यर्थः । एषा च यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिं जनयति, अस्याश्चास्वीकारे सुरभिचन्दनमितिज्ञाने सौरभस्य भानं कथं स्यात् ? सामान्यलक्षणया सौरभांशस्य भानेऽपि सौरभत्वस्य भानं ज्ञानलक्षणयैव । सौरभत्वे सौरभत्वत्वरूपसामान्यस्या-भावेन तत्र सामान्यलक्षणया सौरभत्वप्रत्यक्षासंभवात् ।

सामान्यलक्षणायाश्चास्वीकारे धूमत्वेन सकलधूमानाम्, वह्नित्वेन च सकलवह्नीनाम् भानं कथं भवेत् ? न च मास्तु सकलधूमप्रत्यक्षं का क्षतिरिति वाच्यम्, प्रत्यक्षधूमे वह्निसंबन्धस्य गृहीतत्वादन्यधूमस्य तदानीमसत्त्वात् धूमो वह्निव्याप्यो न वेति संशयानुपपत्तेः । तत्स्वीकारे तु सकलधूमोपस्थितौ कालान्तरीयदेशान्तरीयधूमे संदेहः संभवत्येव । न च सामान्यलक्षणया प्रमेयत्वेन सकलप्रमेयज्ञाने सार्वज्ञ्यापत्तिरिति वाच्यम् विशेषरूपेण सकलपदार्थज्ञानस्यैवोपकारकत्वादिति ॥

॥ शुभम् ॥

॥ समाप्तेयं मुक्तावली-प्रत्यक्षखण्ड-प्रश्नोत्तरी ॥